No. ४३१४

Title प्रयोग रत्न माला इय प्रश्नः

Author चौण्डपा चार्यः

Extent ६८ Age

Subject तन्त्र पद्धतिः

ह्रामस्तम्भीयाध्युरतंत्रस्वतंत्रव्याख्या प्रयोग
रत्नमाला तृतीय प्रश्नः

पत्र ५४

हरिः। ॐ॥ इडामेके पूर्वं समामनंति प्राशित्रमेके। इडाशब्दो देवतावचनः तत्संबंधाद्द्रव्ये कर्मणि च प्रयुज्यते। प्राशित्रशब्दो। द्रव्यवचनः। तत्संबं
धात्कर्मणि। नहि हसामर्थ्यात्। कर्मपरौ वेदितव्यौ। नन्तः प्राशित्रपूर्वकत्वः सूत्रकृतैवानुक्रमिष्यते। यदा लितरः तदावदानेषु प्राशनेचे
डापूर्वी भवति। यथाभिघार्येडां प्राशित्रमवद्यति प्राश्येडां मार्जयित्वा प्राशित्रं प्राश्नातीति। आग्नेयं पुरोडाशं प्राचं तिर्यंचं वा विरु
ज्यांगुष्ठेनोपमध्यमया चांगुल्या व्यूह्य मध्यात्प्राशित्रमवद्यति यवमात्रं पिप्पलमात्रं वा अज्यायो यवमात्रात्। इदं हविरिति। वि
रुज्य मस्तकं भंक्त्वा उपमध्यमया ऽनामिकया व्यूह्य अभ्यंतरमंगुलिंगमयित्वा मध्यात् पुरोडाशोदरात् पिप्पलमात्रं हि प्रमाणमि
त्यर्थः। तथा च भारद्वाजः। प्राशित्रं पिप्पलमात्रमिति श्रीहिमात्रं स्यादिति। विश्वेदेवा अनुष्टुप्। अज्यायो यवमात्राद् दाग्व्याधात्क
ृत्यतामिदं। मा रूरुपाम यज्ञस्य शुद्धं स्विष्टमिदं हविः। पुरा दाचित् रुद्रो यज्ञसाधनस्य पुरोडाशस्य किंचिदंशमवीध्यत्। तथा
च ब्राह्मणं देवा वैयज्ञाद्रुद्रमंतरायन् स यज्ञमविध्यदिति। तस्माद् दाग्व्याधाद्धि द्रुप्रदेशात् इदं हविः कृत्यतां मिद्यतां कियत् यवमात्राद
ज्यायो यवपरिमितमेव न तु ततोधिकं यथैयज्ञस्य पुरोडाशरूपस्य शरीरं मा रूरुपाम रोपणं विमोहनमुपद्रवः तच्छकं न करवाम
अधिकावदाने ह्युपद्रवः स्यात्। तथा चाम्नातं। यज्ज्यायो वद्येद्रोपयेदिति। इदं तु यवमात्रं हविर्देवैः छिन्नं तत्कुर्द्दं निरकृत यवेन संमि
तं तस्माद्यवमात्रमवद्येदिति। किंचेदं हविः स्विष्टं शोभनयागहेतुः तदप्याम्नातं स्विष्टं बैन इदं भविष्यतीति। एवमुत्तरस्यावद्यतीति।

एवं विरोजनादिन विधिनावद्यति। तत्रा विरुज्योत्तरस्मा द्वितितुसत्याषाढभारद्वाजौ। तथ्याचरोर्न प्राशित्र मिति। भारद्वाजः नसान्नाय्या
त्प्राशित्रं पुरोडाशस्याधिकारात्। सर्वेभ्यो हविर्भ्य इती डायां विशेषवचनाच्च। उपस्तीर्यना भिघारयत्येतद्वा विपरीतमपिवोपस्तृणात्य
भिघारयति। अन्यतरत्कर्तव्यमुभयं नेत्यर्थः। अत्र यजमानो ऽग्निर्मादुरिष्टात्पातिति प्राशित्रमवदीयमानमनुमंत्रयते। प्रा
जापत्यं यजुः। अग्निर्मादुरिष्टात्पातु सविताघशंसाद्योमेंतिदूरेरातीयतितमेतेन जेषं। इति अग्निर्मादुरिष्टादपायात्पातु।
सविता देवो घशंसात् पापप्रख्यापकात्शत्रोर्मा पातु यः शत्रुर्मे मां ति अंतिके दूरे चारातीयति शात्रवं भजते तं शत्रुमेतेन
प्राशित्रावदानेन जेषं जयेयं। अत्र ब्रह्मा मित्रस्य त्वा चक्षुषइ तिप्राशित्रमवदीयमानं प्रेक्षते। मंत्रो निर्वापेव्याख्यातः। अत्रैवा।
स्य परिहरणप्राशनमेके समामनंति यदिडा पूर्वी प्राशित्रं वा तयोरुभयोरपि कल्पयोरवदानानंतरमेव प्राशित्रस्य परिहरण।
प्राशने भवत इत्यर्थः। इडापात्रमुपस्तीर्य सर्वेभ्यो हविर्भ्य इडामवद्यति चतुरवत्तां पंचावत्तां वा। चतुरवत्तां॰ पंचावत्तां वेत्यविशे। राम
षवचनेपि न पंचावत्तिनश्चतुरवत्तमिष्यते तस्य पंचावत्तं सर्वत्रे तिनियमात् द्विरभिघारयेत् पंचावत्तिन इति लिंगाच्च विनिवेश १
विकल्पो वा प्रयुक्तव्यवस्थानुरोधेनावधेयः चतुरवत्तिपंचावत्तिनो वैकल्पिको विकल्प इत्यन्ये। मनुना दृष्टां॰ एकतो मुखामिला
मेयस्य पुरोडाशस्य दक्षिणार्द्धात् प्रथममवदानमवद्यति संभेदाद्वितीयं। यो वदानदेशयोर्मध्ये स्थितो हविरंशः। ससंभेदः

ततो दक्षिणार्द्धो द्वितीयमवद्यति ॥ ॥ विश्वेदेवा अनुष्टुप्। पनुना दृष्टां घृतपदीं मित्रावरुणसमीरितां। दक्षिणार्द्धादसंभिन्दन्न
वद्याम्येकतो मुखां। दक्षिणार्द्धो खुरोडाशस्य दक्षिणभागादसंभिंदं नितरावदानैरसंमिश्रयन्नहमिडामुद्दिश्यावद्यामि पुरोडा
शांशमेव खंडयामि। कीदृशीमिडां मनुना प्रथमं दृष्टां तथा घृतपदीं घृतपदान्निष्पीडितं यस्याः सा घृतपदी तां मित्रावरुणाभ्यां
सम्यक् प्रेरितां एकतोमुखां एकदिशि अनुखप्रभवां दक्षिणदिश्येवावस्थितां न तु दिगंतर इत्यर्थः ॥ ॥ अत्र यजमानः सुरूप
वर्षवर्ण एहीतीडामवदीयमानामनुमंत्रयते। प्राजापत्यं यजुः। सुरूपवर्षवर्ण एहीमान् भद्रां कुर्यात् अभ्येहि मामनुव्रतान्यु
षिषाणि मृद्व्रुद्रिष्ट एह्यादितए हि सरस्वत्येहि रंतिरसि रमतिरसि सूनर्यसि जुष्टे जुष्टिं ते सीयोपहूत उपहवं ते सीय ॥ ॥ यो
शरीरधारी एप इडाख्यायाः देवतायाः संबोधनं सुरूपवर्षवर्ण इति। शृंगपुच्छादिकं रूपं वर्षं पुष्टि वर्णः शुक्लादिः शोभना रू
पवर्षवर्णा यस्याः सा तथो क्ता शृंगादीनामतिदीर्घत्वादिपरिहारेण दर्शनीयत्वरूपस्य शोभनीत्वं वर्षं द्विविधमुदकरूपं घृतरू
पं च तत्रेडास्वकीयात्स्वादाद्घृतं वर्षतीति तथा च मंत्रात् इडायाः पदे घृतवतीति मानवी घृतपदी मैत्रावरुणीति। च। इडायाः पदं घृतवदि
ति च। तथा ब्राह्मणमपि सा यत्र यत्रानुक्रामन्ततो घृतमपीड्यत तस्माद्घृतपद्युच्यत इति वृष्टिर्वा इडा वृष्ट्यै वै निक्रमणे घृतं प्रजाः
संजीवंतीः पिबंतीति च। तदिदं घृतरूपत्वं वर्षस्य शोभनत्वं कर्बुरादिसंकीर्णत्वपरिहारेण विस्पष्टं कृष्णकपिलत्वादिवर्णत्व।

स्वशोभनत्वं। तथाविधे हे इडे इमामस्मदीयान् भद्रान् स्तु। स्वैरक्रयज्ञसाधनसंपूर्णान् दुर्यान् यज्ञगृहान् प्रत्यागच्छ गृहा वै दुर्या इ
ति श्रुतेः। किंच मामभिलक्ष्य अनुव्रता अस्मिन् यज्ञव्रते अनुकूला सती एहि आगच्छ उशब्दः समुच्चये अपि च हे इडा विशेषा
यूयमस्मदीयानि शिरांसि निमृद्ध्व नूइतरान् ब्राह्मणादिनाशो ध्वयध्वं। तएवेडा विशेषा इडादिभिः सूनर्यैतैः षड्भिर्नाम विशेषैस्स्व
स्त्रीक्रीयन्ते इडादीनां गोनाम विशेषत्वं सप्तमकांडे समाम्नातं इडे ते दिते सरस्वती। प्रिये प्रेयसि महि विश्रुत्ये तानि ते। अघ्न्ये
येनामानीति। एतेषां प्रदर्शनार्थत्वाय रमत्यादिकमपि द्रष्टव्यं। हे जुष्टे प्रिये सेव्येवा। ते जुष्टिं त्वदीयां प्रीतिमशीय प्राप्नुयां।
हे उपहूते इड एहीत्येवमागमनाय अस्माभिरनुज्ञाते अहमपि ते उपहवं त्वदीयामनुज्ञामशीय प्राप्नुयां। पूर्वार्द्धं च यजमा
नभागमएकमिव दीर्घ्वं अवद्यतीति संबंधः इव ईषदर्थे। तमाज्येन संतृप्य ध्रुवायाउपोहति। संतृप्य समज्य। ध्रुवायाउपोह
ति ध्रुवासमीपं गमयति। तत्राग्रेण ध्रुवामिति भारद्वाज बौधायनौ अपि वा दक्षिणार्द्धादवदाय यजमानभागमप्यसंभेदा राम
त् दक्षिणार्द्धात्प्रथममिडावदानमवदाय ततो यजमानभागवद्यति। ततः संभेदाद्द्वितीयमिडावदानमित्यर्थः। इडावदानस्व २
पपदार्थस्यैकत्वाच्छन्नात्रापि मंत्रावृत्तिः। यजमानभागव्यवायदत्तमं त्रित्रा। वृत्तिरित्येके। एवमुत्तरस्यावद्यति। एवं मनुना हृष्ट्वा
दित्यादिना विधिना उत्तरस्य हविषः पुरोडाशस्य सानाय्यस्य च। वद्यति सर्वेभ्यो ह विभ्य इत्यधिकारात्। अभिघार्य इडां होत्रे प्र

दायदक्षिणेन होतारमतिक्रामत्यनुत्सृजन्। पंचावत्तायां त्विडायां द्विरभिघारणेन संख्यासंपत्तिः द्विरभिघारयेत् पंचावत्तिन इति लिं
गात् पश्चाद्धि तृतीयापि पंचावत्ताया मिति तु सत्याषाढः। होत्रे प्रदायेडां तामनुत्सृजन्नेवातिक्रामति होतुः पश्चाद्गच्छति। तदंगु
ल्यभ्यंजने प्राङ्मुखत्वार्थं तथा च सत्याषाढभरद्वाजौ दक्षिणातिक्रां पंपश्चात्प्रत्यङासीनो होतुरंगुलिपर्वणी अनक्तीति। हो
तेड्याध्वर्युं परिगृह्णाति। होता विडामादाय तयाध्वर्युमतिक्रामंतं परिगृह्णाति दक्षिणतो हूत्वोर्ध्वेडामंतराध्वर्युमात्मा
नं च करोतीत्यर्थः। अपि वा प्राचीमिडामपोह्य दक्षिणत आसीनः स्रुवेण होतुरंगुलिपर्वणी अनक्त्यपरमंत्रात्पूर्वमितद्वा
पविपरीतं। अपि वाध्वर्युर्होत्रे इडामदत्वा प्राचीमपोह्य स्वयं च पश्चादागत्वा होतुर्दक्षिणत उदङ्मुख आसीनस्तदंगुलि
पर्वणी अनक्ति ततइडां ददातीत्यर्थः। अत्राश्वलायनः। प्रदेशिन्याः पर्वणी उत्तमे अंजयित्वोष्ठयोरभ्यात्मान्निमार्ष्टि वाच
स्पतिना प्राश्नामीत्युत्तरमुत्तरे मनसस्पतिना प्राश्नामीति अधरमधरे स्पृष्टोदकमंजलिनेडां प्रतिगृह्य सव्ये पाणौ कृत्वा
पश्चादस्या उदगंगुलिं पाणिमुपधायावांतरेलामवदापयीतीतांतरेणांगुष्ठमंगुली स्वयं द्वितीयमाददीतेति। अयमर्थः।
प्रदेशिन्यग्रसंधिद्वयमध्वर्युणांजयित्वा वाचस्पतिनेत्युत्तरस्मिन्नोष्ठमुत्तरं मनसस्पतिनेत्यधरोष्ठेऽधरं मंत्रेणैव मोष्ठयो
र्वागपवर्गं पर्वणी निमृज्योदकं स्पृष्ट्वांजलिं कृत्वेडां प्रतिगृह्य सव्ये पाणौ निधायेडायाः पश्चादुदगंगुलिं पाणिमुपनिधाया

ध्वर्युणा वांतरे प्रथमं प्रथममवदानमवदापयीत अंगुल्यंगुष्ठयोर्मध्यप्रदेशेन स्वयमेवांतरे अर्थं द्वितीयमाददीतेति। वामदेवे
यजुषी। वाचस्पतिना ते हुतः स्येषे प्राणभ्य प्राश्नामि। हे अंगुलिपर्व वाचस्पतिना वाक्पालकेनाध्वर्युणा हुतस्य ते।। अ
3 क्तां ता मिषे न्नाय प्राणाय प्राण स्विंत्यर्थं प्राश्नामि निमा र्जि मनसस्पतिना हुतस्यो र्जे पानाय प्राश्नामि। हे अंगुलि पर्व
मनसस्पतिना मनःपालकेनाध्वर्युणा हुतस्य अक्तं तामुर्जे अन्नायापानाय अपान स्थिरत्यर्थं प्राश्नामि। अधरेण निमा।
र्जि। आपस्तंबसूत्रं इडामादायाध्वर्युणाक्तामंगुमिषे प्राणायेति मुखदेश ऊर्ध्वमुष्टो र्जे पानायेति अवाचीनं नियच्छती।
ति। सौत्रे यजुषी। इषे प्राणाय। अन्नाय प्राणस्थिरत्यर्थं वांगुलिमूर्ध्वमुत्कर्षामीत्यर्थः। ऊर्जे अपानाय अन्नायापन स्थि।
रत्यर्थं वांगुलिमवाङ् नियच्छामीत्यर्थः। उपस्तृष्टोदकाय पुरस्तात्प्रत्यङ्आसीनइडायाहोतुर्हस्ते वांतरेडामवद्यति उपस्तृ
ष्टोदकस्य होतुर्हस्ते इडातो वांतरेडामिडैकदेशमवद्यतीत्यर्थः। अध्वर्युः प्रथममवदानमवद्यति स्वयं होतोत्तरमेतद्वा विपरी राम
तं होतेत्येव सिद्धे स्वयंग्रहणाद्धोतुः कार्यापन्नस्यापि मैत्रावरुणस्य नावांतरेडा। लेपादुपस्तरणाभिघारणे भवतः। लेपादिडा ३
गताल्पलेपाद्विरभिधारयेत्। पंचावत्तिनः व्यक्तं। अत्राश्वलायनः। प्रसालध्वांगुष्ठेनाभिसंगृह्य प्रत्याहृत्यांगुलीरमुष्टिं कृ
त्वा दक्षिणतइडां प्रतिगृह्यास्य संमितां उपह्वयते प्राणसंमितां वाइडी लोपहूता० दृष्टिह्वयता मित्येकपांशु अथो ब्रवे रिलोप

हूतोपहूताऽस्मिन्नुपहूतइतीति। अयमर्थः। सव्यहस्तेनगृहीतामध्वर्युणाप्रत्यालब्धामिडांअंगुलीःप्रत्याहृत्यमुष्टिंकृत्वाबहिःस्थितां
गुष्ठेनाभिसंगृहीतावांतरेडेनदक्षिणहस्तेनदक्षिणतःपरिगृह्यास्यसंमितांनासिकासंमितांवाकृत्वोपहूतेत्यादिनिगदेनह्वयतां
मित्यंतमुपांशुस्वरेणार्थात। उच्चैःस्वरेणपुरामानवीशब्दाउपहूतेति उपहूतामनुष्याइतिदेवीदेवपुत्रइतित्रीण्यवसानानिकुर्व
स्तामुपह्वयतइति। वामदेव्योनिगदः। इलोपहूतासहदिवाबृहतादित्येनोपास्मांइलाह्वयतांसहदिवाबृहतादित्येनेलोपहू
तासहांतरिक्षेणवामदेव्येनवायुनोपास्मांइलाह्वयतांसहांतरिक्षेणवामदेव्येनवायुनेलोपहूतासहपृथिव्या। रथंतरेणाग्नि
नोपास्मांइलाह्वयतांसहपृथिव्यारथंतरेणाग्निनोपहूतागावःसहाशिरउपमांगावःसहाशिराह्वयंतामुपहूताधेनुःसहर्षभो
पमांधेनुःसहऋषभाह्वयतांमुपहूतागौघृतपद्युपमांगौघृतपदीह्वयतांमुपहूतादिव्याःसप्तहोतारोपमांदिव्याःसप्तहो-
तारोह्वयंतामुपहूतःसखाभक्षउपमांसखाभक्षोह्वयतामुपहूतेलावृष्टिरुपमांइलावृष्टिर्ह्वयतामिलोपहूतोपहूतेलोपा-
स्मांइलाह्वयतामिलोपहूता। मानवीघृतपदीमैत्रावरुणीब्रह्मदेवकृतमुपहूतंदैव्याध्वर्यवउपहूतामनुष्याः। यइमंयज्ञ
मवान्येचयज्ञपतिंवर्धानुपहूतेद्यावापृथिवीपूर्वजेऋतावरीदेवीदेवपुत्रेउपहूतोयंयजमानउत्तरस्यांदेवयज्यायामुप-
हूतोभूयसिहविष्करणइदंमेदेवाहविर्जुषंतामितितस्मिन्नुपहूतः। मनुःपृथिव्याइत्यादिब्राह्मणप्रतिपादितागोरूपधारि-

णीलादेवी दिवाद्युलोकेन बृहता साम्नादित्येन च देवेन वृष्टिहेतुभिः सहवृष्ट्यर्थं मयोपहूतास्मत्समीपं प्रस्ताहूता सा चेला द्युलोकादिभिः
सहास्मानुपह्वयतां स्वसमीपं प्रसाह्वय तु तथेयमिलांतरिक्षेण लोकेन वामदेव्येन साम्ना वायुना देवेन च। पशुहेतुभिः सहपि पा-
श्वार्थं मयोपहूतसा चांतरिक्षादिभिः सहास्मानुपहूयतां तथेयमिला पृथिव्या लोकेन रथंतरेण साम्ना अग्निना देवेन चान्न
५ हेतुभिः सह मयोपहूता सा च पृथिव्यादिभिः सहास्मानुपह्वयतां। तथा सहाशिरक्षीरादिसहिता गावो यज्ञसाधनभूतास्तास्तथाविधा
याः गावो मामुपह्वयंतां तथा सहऋषभा ऋषभसहिता प्रजासंपत्तिहेतुः। धेनुः प्रीतिसाधनमिडादेवी मयोपहूता सा च तथावि
धा मामुपह्वयतं। तथा दिव्या दिविभवाः सप्तहोतारो महाहविर्नामादित्यः सत्यहविः प्रजापतिरच्युतपाजा वायुः रच्युतमना विक्र
रनाधृष्य इंद्र अप्रतिधृष्यो रुद्र। अयास्यो गिरा इत्येते सप्तहोतारो मयोपहूतास्ते च मामुपह्वयंतां। तथा सखा सखेव सुखसाध
नं भक्षोऽमृतापरपर्यायः सोमो मयोपहूतः स च मामुपह्वयतां तथा वृष्टिः इष्टवर्षणहेतुरियमिडा मयोपहूता सा च मामुपह्वय-
तां अभ्यास आदरार्थः। एवं मया अनेकवारमुपहूतेडा मामुपह्वयतां तथा मनवी मनुना प्रथमदृष्टा घृतपदी पादेभ्यो घृतं अ राम
क्षइतं मैत्रावरुणी मित्रावरुणाभ्यां समीरितेयमिडा मयोपहूता तथा देवकृतपुरादैवैरुपहूतं ब्रह्मस्वरूपं जगदुपादानमेवोपहू ४
तं तथा दैव्या दिविभवा अध्वर्यवः सामाध्वर्युः द्यौरध्वर्युरित्यादयः मनुष्याश्च यज्ञशर्मादयो मयोपहूताः ये उभये ऽध्वर्युवो

ज्ञोयज्ञंरक्षंतियेचयज्ञपतिंवर्द्धयंतिसम्यग्यज्ञसाधनेनेत्यर्थः। तथापूर्वजेसर्वस्मात्पूर्वमुत्पन्नेऋतावरीऋतशब्दसा[illegible]ध्योयज्ञो
ऽनयोर्वर्त्ततइतिऋतावर्यौदेवीद्योतमानेदेवपुत्रैर्देवैरादित्यादिभिः पुत्रैः पुत्रवत्यौद्यावापृथिव्यौमयोपहूतेतथाऽयंयजमानः
मयोपहूतः तथाउत्तरस्यांदेवयाज्यायांसोमयुगादिरूपायांप्रजासंपत्त्यर्थंमयोपहूतः किंचयोयंयजमानः इदमिदंमदीयं
हविः देवाः जुषंतामित्युत्तरोत्तरंकर्मानुष्ठातुमिच्छतिसोयंतस्मिंस्तस्मिन्कर्मणिमयोपहूतः सचमामुपह्वयतामित्यर्थः। आ
पस्तंबस्तुयथाध्वर्युर्यवमवत्तामवांतरेडांमुष्टिंकृत्वांगुलीभिरभिनिगृह्येडांमुखसमानांकृत्वोपह्वयतइति। प्राजापत्योनिगदः।
उपहूतंरथंतरंसहपृथिव्योपमांरथंतरंसहपृथिव्याह्वयतामुपहूतंवामदेव्यंसहांतरिक्षेणोपमांवामदेव्यंसहां
तरिक्षेणह्वयतामुपहूतंबृहत्सहदिवोपमांबृहत्सहदिवाह्वयतामुपहूताः सप्तहोत्राउपमांसप्तहोत्राह्वयंतामुपहूताधेनुः
सर्षभोपमांधेनुः सहर्षभाह्वयतामुपहूतोभक्षः सखोपमांभक्षः सखाह्वयतामुपहूतांहोइडोपहूतोपहूतेडो·पोअस्मां
इडाह्वयतामिडोपहूतोपहूतेडा· मानवीघृतपदीमैत्रावरुणीब्रह्मदेवकृतमुपहूतंदैव्याअध्वर्यवउपहूताउपहूतामनु
ष्याः यइमंयज्ञमवान्येयज्ञपतिंवर्धानुपहूतेद्यावापृथिवीपूर्वजेऋतावरीदेवीदेवपुत्रैः उपहूतोयंयजमानउत्तरस्यांदेव
यज्यायामुपहूतोभूयसिहविष्करणउपहूतोदिव्येधामन्नुपहूतइदंमेदेवाहविर्जुषंतामितितस्मिन्नुपहूतोविश्वमस्य

प्रियमुपहूतं विश्वस्य प्रियस्योपहूतस्योपहूतः। सप्तहोत्राः होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाग्नीध्रोऽच्छावाकश्चेति। उपहूतांहो
उपहूतोहं॰ अत्र रंगप्लुतिः दूरादाह्वानस्यासंभवाहादरार्थाल्मोपह्वयते। तथा च ब्राह्मणं आत्मा ह्युपहूतानां वसिष्ठ इति इडोप
हूते साघारोहावरोहउभयोर्वीक्षयो द्विरावृत्या चतुर्वारमुपाह्वानं। गोरूपायाइडायाः पश्चूनां चतुष्पादत्वादेतदुपपन्नं॥ त
था च ब्राह्मणं॰ चतुरुपह्वयते चतुष्पादो हि पशव इति॰ दिव्ये धामन्नुपहूतः दिव्ये धामनि॰ स्वर्गे साध्ये अयं यजमान उपहू
तः विश्वमस्य प्रियमित्यादि॰ अस्य यजमानस्य यत् प्रियं तत्सर्वमुपहूतं॰ तस्य चोपहूतस्य सर्वस्य प्रियस्य स्वामी यजमान
उपहूतः। इतरच्चारव्यातं। उपहूयमानामन्वारभेते अध्वर्युर्यजमानश्चैदेव्या अध्वर्यव उपहूता इत्यभिज्ञायोपहूतः पशु
मानसानीत्यध्वर्युर्जपत्युपहूतोयं यजमान इत्यभिज्ञायेतमेव मंत्रं यजमानः। व्यक्तानि। अयमेतन्नयजुः। उपहूतः पशुमा
नसानि। उपहूतोहं पशुमान्भूयासं। अत्र यजमानो भूयस्येहीत्यादि सप्तदेवगवी रूपी भूपह वे जपित्वा विद सीत्यादि सप्त राम
मनुष्यगवीर्दैवीर्दैवेरितिचोद्भेरुपह वे जपित्वा होतारमीक्षमाणो वायविडा ते मातेति वायुमन साध्यालोत्तरस्यी देवयज्या ५
यामित्यभिज्ञाय सामेसत्याशीरा शीर्मऊर्जमितिवजपित्वा इडाया अहमितीडामुपहूतामनुमंत्रयते। अत्रत्यमंत्रार्थः।
वामदेवः चतुर्दश यजूंषि॰ भूवस्येहि श्रेयस्येहि वसीयस्येहि चित्तएहि दधिषएहीडएहि सूनृतएहि। देवगोरूपायाइडा

याआगमनं सप्तभिर्गुणनामभिः सूनृतः सूनरी सप्तभिरेतैर्मनुष्यगोरूपेडा स्तूयते। हेइडे त्वं चिदसि चैतन्यरूपासि मनामननरूपा
चासि धीरध्यवसायरूपासि रंतिः सुखात्मिकासि रमतिः रमयित्र्यसि सूनृतः शोभनस्तुतिरसि सूनरी शोभनपुत्रभृत्यादिमद
सि। गायत्री। देवीर्देवैरेभिमानिवर्त्तध्वं स्योनास्योनेन घृतेन मासमुक्षत। हे देवीः देवमनुष्यमविरूपा देव्यः यूयं मामभिमां
प्रति निवर्त्तध्वं आगच्छतः आगत्य च स्योनाः सुखयित्र्यो यूयं देवैर्द्युलोकवृहत्सामादित्यादिभिः सह स्योनेन सुखसाधनेन
घृतादिवर्षेण मांसमुक्षतः मामाप्याययत्त· त्रिष्टुप्। नमइदमुपदं भिषगृषिर्ब्रह्माय द्देसमुद्रादुदचन्निवत्सुचावागग्रे वि
प्रस्यातिष्ठतिभृंगेभिर्दशभिर्द्दिशन्नू। ऋषिर्ज्ञानवान् ब्रह्मा ब्राह्मणो ध्वर्युस समुद्रात् समुद्रस्थानीयात् पुरोडाशात् उदचन्नि
वउह्रुह्नन्नि वस्त्रुचाहस्तेनावदायप यद्देदत्तवानूयद्वा वाग्रूपं हविः दशभिः भृंगेभिः अनेकैर्न्नतावदान्नैरितिउत दिश
न्नूप्रयच्छन्नू विप्रस्यहोतुरग्ने तिष्ठति तदिदं नमोनमीडारूपं उपदं उपेत्यदत्तं भिषग निष्ट निवारणमस्तु। वायविडा ते माता।
हे वायो ते वत्सभूतस्य इयमिडामाते तिध्यानप्रकारो मंत्रो वा। प्राजापत्यो निगदः। सामेसत्याशीरस्य यज्ञस्य भूयाद रे उता
मनसा तच्छकयं यज्ञो दिवं रोह तु यज्ञो दिवं गच्छतु यो देवयानः पंथास्तेन यज्ञो देवां अप्येतु अस्मास्विंद्र इंद्रियं दधातु अस्मा
जायउतयज्ञाः सर्वं तामस्मासुसंत्वाशिषः सा नः प्रियासुप्रतूर्त्तिर्मघोनी जुष्टिरसि जुषस्व नो जुष्टानो सिजुष्टं ते गमेयं। हे

इडे अस्य यज्ञस्य येयमाशीः फलप्रार्थना सा मे सत्या भूयात् अरे उत अनादरं कुर्वता मनसा तत् फलं साधयितुं शक्ये यं तत्प्रसादात् कृंन्नो
भूयासं मयानुष्ठितो यज्ञः निश्रेणीमिव क्रमेण दिवमारोहतु आरुह्य च यस्यां दिवि यज्ञो हविर्भोजो वह्निर्वसंति तीं दिशं स्वर्गप्र
6 देशविशेषं गच्छतु तत्र गत्वा समायां उपविष्टाः देवाः येन मार्गेण हविर्भोजनशालायां गच्छंति तेनैव मार्गेण यं यज्ञो यज्ञसाध
नानि यज्ञाः उत करिष्यमाणा यज्ञा अपि सर्वं तां आश्रयंती आशिषस्त घ यज्ञफलान्यस्मासु संतु सा तादृशी तिनः अस्मान्
प्रति प्रियाप्रीतिगमेयं प्राप्नुयी। विश्वेदेवास्त्रिष्टुप्। आशीर्म ऊर्जमुत सुप्रजास्त्वमिषंदधातु द्रविणं सवर्चसं। संजयन्क्षे
त्राणि सहसाहमिंद्र कृण्वानो अन्यां अधरान्सपत्नान्॥ हे इडे मम येयमाशीः प्रार्थना भवान् संजयन् ऊजयन् तदर्थं धार
यतु प्रयच्छत्वित्यर्थः। उतापि च सुप्रजास्त्वं शोभनायस्त्वं इषमन्नं द्रविणं धनं सवर्चसं बल सहितं प्रयच्छतु अहं तत्प्रसादात्
क्षेत्राणि वैरसंबंधीनि सहसा बलेन संजयन् स्वामिनि संबंधयन् अन्यान् सपत्नान् वैरिणः अधरान् कृण्वानः अस्मदाज्ञानु राम
सारिणः कुर्वाणो भूयासं। वामदेव्यं यजुः। इडाया अहं देवयज्यया पशुमान्भूयासं। इडाया देवयज्यया देवता संबंधि कोपा ६
ख्यानेनाहं पशुमान्भूयासं। उपहूतायाम ग्नेणाहवनीमं ब्रह्मणे प्राशित्रं परिहरति। ब्रह्मणे परिहरति तत्सकाशं नीत्वा प्रयच्छ
तीत्यर्थः। प्रदर्शनमिदमन्यस्यापि प्रस्तरादेर्यज्ञांगस्य। तत्रांतरानयनेप्यदोष इत्येके। अत्र ब्रह्मा। कृतस्य पथा पर्येहीति

परिह्रियमाणः॥ सूर्यस्य त्वा चक्षुषा प्रतिपश्यामीत्याह्रियमाणं। प्रतीक्ष्य। देवस्य त्वेति प्रतिगृह्य अंतर्वेदि सूत्र तृणानि प्रादाय आस्त्वेति सादयित्वा अदब्धेन त्वेत्यवेक्ष्य देवस्य त्वेत्यंगुष्ठेनोपमध्यमया चांगुल्यादाय अग्नेस्त्वास्येनेति दंतैरनभिगृह्णन्नुपिगीर्य या अप्स्वंतरित्यद्भिः।
प्राशित्रमभ्यवनीयाचम्य घासि नामेति नाभिदेशं वाङ्म आसन्निति यथालिंगमंगानि अरिष्टा विश्वानीत्यवशिष्टान्यंगान्यभिमृश्य पात्रं प्रक्षाल्य पूरयित्वा दिशो जिन्वेति पराचीनं निनीय पुनः पूरयित्वा मां जिन्वेत्यात्मोपरि निनयति। वामदेव्यं यजुः। ऋतस्य पथा पर्येहि। हे प्राशित्र ऋतस्य यज्ञस्य पथा मार्गेण पर्येहि मां प्रत्यागच्छ। प्राजापत्यं यजुः। सूर्यस्य त्वा चक्षुषा प्रतिपश्यामि। आरोग्यप्रदस्य सूर्यस्य त्वां प्रतिपश्यामि। आरोग्यप्रदस्य सूर्यस्य संबंधिना अनेन मदीयेन चक्षुषा हे प्राशित्र त्वां प्रतिं पश्यामि। देवस्य त्वेति प्रतिगृह्णामीति मंत्रा ततः। असिदादानमंत्रेण व्याख्याताः। वामदेव्ये यजुषी। पृथिव्यास्त्वा नाभौ सादयामीडायाः पदे। हे प्राशित्र पृथिव्याः विस्तीर्णायाः वेदेर्नाभौ नाभिस्थानीये इडायाः गोरूपायाः पदे अस्मिन्नंतर्वेदिदेशे त्वां सादयामि। अदब्धेन त्वा चक्षुषावेक्षे। हे प्राशित्र अनुपहितेन चक्षुषा त्वां अवेक्षे। देवस्य त्वेत्यसिदादाने व्याख्यातं। वामदेव्य उपरिष्टाद्बृहती। अग्नेस्त्वास्येन प्राश्नामि ब्राह्मणस्योदरेण बृहस्पतेर्ब्रह्मणेंद्रस्य त्वा जठरे सादयामि। प्लोषं दमरण्यं दहतोप्यग्नेरास्यं केनापि न हिंस्यत इति तदास्येन आह्लादो परार्थं भुंजानस्यापि ब्राह्मणस्योदरं केनापि प्रत्यवायेन न हिंस्यत इति तमुदरेण बृहस्पतेर्मंत्र बिन्नमस्येब्रह्मणा मंत्रेण हे प्राशित्र त्वा महं

प्राश्नामिप्राशय्यं चेंद्रस्यपरमेश्वरस्यजठरे वैश्वानररूपेतांस्थापयामि। वामदेवउह्निकू। या अस्वंतर्देवतास्ताइदं शमयंतु स्वाहाकृतं
जठरमिंद्रस्यगच्छ स्वाहा। अप्स्वंतरपामंतर्यादेवताः अप्सुषदोमहिनैकादशस्थेत्संतांस्तोदेवताः इदममाप्राशित्रं अंतर्यथादह
तितयाँथाशमयंतुहे आपः स्वाहाकृतं स्वाहाकृताः इंद्रस्यपरमेश्वरस्यजठरं प्राशित्रावस्थापनदेशमेवगच्छत स्वाहा सुहुताभ
वत। वामदेव्यंयजुः। घसिनामेमासंपृक्था ऊर्ध्वंमे नाभेः सीदेंद्रस्यत्वाजठरेसादयामि। हे प्राशित्रत्वंमेममघसिनातुनभारेण।
मासंपृक्थाः मासंपर्कंकुरु किंतुमामनाभेरूर्ध्वंसीदमंत्रसामर्थ्यात् यतस्त्वामिंद्रस्यजठरेसादयामि। आग्नेयानिबजूंषि। वा
ङ्म आसन्नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाहुवोर्बलमूरुवोरोजः। अरिष्टाविश्वान्यंगानितनूस्तनुवामेसहनमस्ते अस्तु
मामाहिंसीः। मेवागिंद्रियं आसन् आस्य एवस्वाधिष्ठानेवर्त्तनं। एवमुत्तरत्रापि। नसोः नासापुटयोः प्राणः प्राणवायुः अक्ष्योः
अक्षिगोलयोः चक्षुरिंद्रियं कर्णयोः कर्णशष्कुल्योः श्रोत्रमिंद्रियं बाहुवोः बाह्वोर्बलं हस्तेंद्रियं · ऊरुवोः ऊर्वोः पादयोरोजोगमन
हेतुरिंद्रियं विश्वान्यंगानि अवशिष्टानि सर्वाण्यंगानि त्वक्पायूपस्थादीनि अरिष्टानि अविकलानि संतु तथा मेतनूः लिंगश राम ७
रीरं तनुवा स्थूलशरीरेण सहाविकलास्तु · हे प्राशित्र ते नमोस्तु तुभ्यं नमस्करोमि ततः प्राशितोमांमाहिंसीः। वामदेव्ये यजुषी। दि
शोजिन्व। हे उदक दिशः प्रीणय। मांजिन्व। स्पृष्ट्वा तस्मिन्प्राशिते हो। तावांतरेडां प्राश्नाति वाचस्पतये त्वा हुतं प्राश्नामि सस्पतये त्वा

हुतंप्राश्नामीति। व्यक्तं। प्राजापत्यंयजुः। वाचस्पतयेत्वाहुतंप्राश्नामिसदसस्पतयेत्वाहुतंप्राश्नामि। हेपुरोडाशइडोयाह्वानरूपायाः
वाचः पालकायजीवात्मनेहुतंत्वांभक्षयामितथासदस्तोयज्ञसभायाः पतयेहोतुर्जीवात्मनेहुतंत्वांभक्षयामि। आश्वलायनः उप
हूयावांतरेळांप्राश्नीयादिळेभागं० सर्वपुरुषाइतिवेति। वामदेवकाशक्करी। इळेभागंजुषस्वनः पिन्वगाजिन्वार्वतोरायस्पोषस्ये।
शिषेतस्यनोरास्वतस्यनोदास्तस्यास्तेभागमशीमहिसर्वात्मानः सर्वत्तनवः सर्ववीराः सर्वपूरुषाः सर्वपुरुषाइतिवेति। हेइडादे
विनः अस्माकंभागंजुषस्वप्रीतिपूर्वकंअनुमन्यस्वततोगाः गोमहिष्यादीन्पिन्वक्षीरवर्षणेनक्षीरंसमवर्द्धयेत्यर्थः। अर्वतः।
श्वोअन्नजिन्वप्रीणयअतश्चरायस्पोषस्यधनवृष्टेः ईशिषेप्रभुरसितस्यतंधनपोषंनः अस्मान्रासदेहितस्यनोदाः सए
वार्थआदरार्थंपुनरुक्तः तस्यास्तेतादृश्यास्तवभागमशीमहिवयंभक्षयामः कीदृशाः वयंसर्वात्मानः सर्वैः क्षेत्रज्ञादिभिः सहिताः
सर्वतनवः स्थूलसूक्ष्मशरीरोपेताः सर्ववीराः सर्वपुत्रादिसहिताः सर्वपूरुषाः सर्वभृत्यादिसहिताश्च। प्राशितायामिडेभागं० सर्व
गणाइतियजमानपंचमाइडांप्राश्यवाग्यताआसतआमार्जनात्। वाग्यताआसतेवाग्यताभवंतीत्यर्थः। विश्वेदेवाअनुष्टुप्।
इडेभागंजुषस्वनोजिन्वगाजिन्वार्वतः। तस्यास्तेभक्षिवाणस्यामसर्वात्मानःसर्वगणाः। हेइडादेविनः अस्माकंमहाभागः प्रीति
पूर्वंअनुमन्यस्वततोगाः गवादीनर्वतोऽश्वांश्चजिन्वप्रीणयसमर्द्धयेत्यर्थः। तस्यास्तेतवभक्षिवाणोभक्षयितारः सर्वात्मानःत्र

विकलस्वरूपाः सर्वैः पुत्रपौत्रादिगणैश्च सहिताः स्याम। अत्र यजमानः इडाधेनुरिति भक्षाया ह्रियमाणामिडामनुमंत्रयते। वामदे
वो विराड्रूपा त्रिष्टुप्। इडाधेनुः सहवत्सा न आगादूर्जं दुहाना पयसा प्रपीना। सा नो अन्नेन हविषोत गोभिरिडाभ्यस्माँ आगात्।
धेनुर्वत्सहेतुत्वेन प्रीतिसाधनमिडा सहवत्सा वत्सरूपवायुसहिता ऊर्जमन्नं दुहाना पयसा वर्षेण प्रपीना प्रवृद्धा सती नः
अस्मान् प्रत्यागात्। आगच्छतु किंच सा इडा नः अस्माकं भोगाय अन्नेन हविषा यज्ञसाधनेन उत अपि च गोभिः सह अ
स्मान् अभ्यागात् अभ्यागच्छतु। मनो ज्योतिर्जुषतामित्यन्तर्वेदि प्रस्तरे मार्जयित्वाग्नेयं पुरोडाशं चतुर्द्धा कृत्वा बर्हिषदं करो
ति बर्हिषदं वा कृत्वा चतुर्द्धा करोति। मनो ज्योतिरिति बृहस्पतिवत्या मार्जनं तस्याः प्रकरणपाठात्। अंतर्वेदीति वचनं वेदिस्थ
प्रस्तरे मार्जनं यथा स्यात्। मा भूत्प्रस्तरमादाय बहिर्वेदि। मार्जनमिति हस्तयोरासेचनं। तदेव शिरस्यासेचनमिति केचित्।। त
दयुक्तं। अग्निहोत्रांतमार्जयन्ते शिरस्यप आसेचयत इति बह्वृग्विधानात्। तथा। अंजलिमन्तर्द्धायाप आसेचयते तन्मा राम
र्जनमित्याश्वलायनः। बर्हिषदं स्तीर्णे बर्हिषि संतं। चतुर्द्धाकरणमाग्नेयस्यैवेष्यते नान्यस्य। एवमुत्तरमित्यवचनात् तेन। ८
उत्तरविकाराणामपि न भवति। ततश्चतुर्द्धाकरणं चरोर्न विद्यत इति भरद्वाजः। मार्जयित्वा चतुर्द्धा करोतीति क्त्वाकरणसमा
नकर्तृकत्वेऽपि नाध्वर्योरेव मार्जनं किंतु सर्वेषां शुद्ध्यर्थत्वेन भक्षणांगत्वान्मार्जनस्य प्रजापतिर्विराट्। मनो ज्योतिर्जुषता

माज्यंविच्छिन्नंयज्ञंऽसमिमंदधातु।बृहस्पतिस्तनुतामिमंनोविश्वेदेवाइहमादयंतां।मनोज्योतिःमननीयोऽयमग्निःस्तदाहु
तिघाज्यंसेव्यतांकेनापिवैकल्येनविच्छिन्नंमिमंयज्ञंवैकल्यपरिहारेणसंदधातु।बृहस्पतिःस्वयमेवनःअस्मदीयमिमं
यज्ञंतनुतां।विश्वेदेवाःइहयज्ञेमादयंतांतृप्यंतु।आश्वलायनस्ताहवनीयपरिस्तरणेस्तूष्णींमार्जनमाह।परिस्तरणेरंजलिमं
तार्द्धयापआसेचयतेतन्मार्जनमिमिति।अत्रयजमानोब्रध्नपिन्वस्वेतिकल्पतामइत्यंतेनवर्हिष्य।सन्नंपुरोडाशमभिमृश्या
शांनांतेतित्रिभिःप्रतिदिशंव्यूहति।विश्वेदेवाद्विपदा।दिशामित्यादियजुः।आशानामित्यनुष्टुप्।ब्रध्नपाहीतिवामदेव्याजगती।
ब्राह्मणानामित्युष्णिक्।ब्रध्नपिन्वस्वददतोमेमाक्षायिकुर्वतोमेमोपदसत्।ब्रध्नशब्दोयज्ञमभिधत्ते।यज्ञोवैब्रध्नइतिश्रुतेः।।हे
ब्रध्नयज्ञसाधकपुरोडाशपिन्वस्वत्वंप्रीतोभव।देवेभ्यस्त्वांददतोमेमाक्षायिविद्यमानस्वरूपादपक्षीणोमाभूः।यागंकुर्वतोमम
फलंमोपदसत्क्षीणंमाभूत्।दिशांकॢप्तिरसिदिशोमेकल्पंतांकल्पंतांमेदिशोदैवीश्चमानुषीश्च।अहोरात्रेमेकल्पेतामर्धमासा
मेकल्पंतांमासामेकल्पंतामृतवोमेकल्पंतांसंवत्सरोमेकल्पतांकॢप्तिरसिकल्पतांमे।हेपुरोडाशत्वंदिग्वासिजातानांकॢप्तिः।।
सामर्थ्यंस्वस्वव्यापारक्षमतासैवत्वमसिअतःत्वत्प्रसादात्मेमदर्थंदिशोदिग्वासिजाताःकल्पंतां।आदरार्थेपुनर्वचनं।ताश्चदि
शोद्विविधाःदैव्योमानुष्यश्च।आदित्यगत्यासंपादिताःप्राच्यादयोदैव्याःमनुष्याणांपरस्परापथानापाक्षयापरिकल्पिताः।

प्राच्यादयो मानुष्यः मा दिशो देशता व्यवहारव्यवस्थाः ताश्च प्राजापत्यादिकृता दैव्यः मन्वादिकृता मानुष्यः अहोरात्रादयः स्पष्टाः किं बहुना
सर्वत्र त्वमेव कुसिः सामर्थ्यमसि त्वज्जनितयज्ञाधीनत्वात् सर्वव्यवहारसामर्थ्यस्य आतो मे मदर्थं सर्वं दिगादि कं कुरु स्वंतां। आशा
नां त्वाशापालेभ्यश्चतुर्भ्योऽमृतेभ्यः। इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयं हि पुरोडाश त्वं आशानां सर्वासां दिशां संबंधिभ्य
9 आशापालेभ्यो दिक्पालेभ्यश्चतुर्भ्य इंद्रयमवरुणकुवेरेभ्यः अमृतेभ्यो देवेभ्यः समर्पयामीति शेषः। भूतस्य सिद्धस्य पुरोडा
शस्याध्यक्षेभ्यः स्वामिभ्यः इदमिदानीं वयं हविषा विधेम परिचरेम। त्वं धाता पाहि भजतां भागी भागं मा भागो भक्त निरभागं भजामः।
अपस्पिन्वौषधीर्जिन्व द्विपात्पाहि चतुष्पादव दिवो वृष्टिमेरय। हे त्वं ध्रयज्ञसंपादक पुरोडाश मे पाहि अत्र भागी भागयोग्यो यः
पुमान् स्वकीयं भागं भजतां अभागः तदयोग्यो मा भक्त। भागं मा प्राप्नोतु। तत्र भागं पुरुषं निर्भजामः वयं भागरहितं कुर्मः। हे पुरोडा
श अपः क्रियमाणमिदं कर्म पिन्व वर्द्धय ओषधीश्च जिन्व प्रीणय। द्विपात् पुत्रभृत्यादिकं पाहि चतुष्पात् गोमहिष्यादिकम
वरक्ष। दिवः सकाशाद्वृष्टिमेरय प्रवर्त्तय। ब्राह्मणानामिदं हविः सोम्यानां सोमपीथिनां। निर्भक्तो ब्राह्मणो नेहाब्राह्मणस्या राम
स्ति। सोम्यानां सोमयोग्यानां अत एव सोमपीथिनां सोमपानयुक्तानां ब्राह्मणानामृत्विजामिदं च तुद्धीकृतं हविः संपादितं अब्राह्म ९
णस्तु निर्भक्तः भागाभिः सारितः इह अस्मिन्नार्त्विज्ये कर्मणि त्वब्राह्मणस्य भागो नास्ति आर्त्विज्यस्य ब्राह्मणैकविषयत्वात् तंय

जमानोव्यादिशतीदं ब्रह्मण इदं होतुरिदमध्वर्योरिदमग्नीध इति। तं च तूर्ष्णीकृतं व्यादिशतीदं ब्रह्मण इत्यादिनाग्नी — — विधेमादिश
ति। अग्नीत्प्रथमान्होतः प्रथमान्वा। इदमग्नीध इदं ब्रह्मण इत्यादिना। अग्नीत्प्रथमान् त्विजो भागित्वेनादिशति। इदं होतुरिदं ब्र
ह्मण इत्यादिनावेत्यर्थः। प्राजापत्यानि यजूंषि। इदं ब्रह्मणः इदं होतुः। इदमध्वर्योः। इदमग्नीधः स्पष्टानि। अथ यजमान उप
हूतो द्यौः पितेत्याग्नीध्रभागं भूहति। वैश्वदेवं यजुः। उपहूतो द्यौः पितोप मां द्यौः पिता ह्वयतामग्निराग्नीध्रादायुषे वर्चसे जीवा
त्वै पुण्यायोपहूता पृथिवी मातोप मां माता पृथिवी ह्वयतामग्निराग्नीध्रादायुषे वर्चसे जीवात्वै पुण्याय। द्यौः पिता द्युलोकदेवोस्म
त्पितृस्थानीय उपहूतोनुज्ञातः सोपि द्युलोकात्स्वयः पितामामुपह्वयतामनुजानतां तथैवाग्निः स स्वयमुपहूतो मामप्युपह्वयतां कु
तो हेतोः आग्नीध्रादाग्नीध्रभागनिमित्तं तदपि किमर्थं अस्माकमायुषे चिरंजीवनाय वर्चसे बलाय जीवात्वै इजीवनौषधाय सुकृतसि
द्धये च। एवमियं पृथिवी देवता मातृस्थानीयोपहूता उपमादित्यादि पूर्ववत्। इदं यजमानस्येत्यध्वर्युर्यजमानभागं निर्दिश्य पस्य विष्टम
ग्नीधे षडवत्तं संपादयति। स्य विष्टो भागो यथाग्नीधस्य स्यात् तथा पूर्वमेवापदिश्य तेतमग्नीधे प्रथमाय प्रयच्छेत्। वामदेव्यं यजुः। इ
दं यजमानस्य निगदव्याख्यातं। षडवत्तसंपादनमाह। सकृदुपस्तीर्य द्विरादधत्तूपस्तीर्य द्विरभिघारयति अपि वा द्विरुपस्तृणा
ति द्विरादधाति द्विरभिघारयति। आग्नीध्रहस्ते प्रथमं सकृदुपस्तीर्य ततस्तद्भागं द्वेधा कृत्वा एकमवधाय पुनरुपस्तीर्य परमवधा

यद्विरमिधारयति। यद्वाप्रथममेवद्विरुपस्तीर्यततोद्विराधायद्विरभिघारयति। अग्नेराग्नीध्र० मामाहिंसीरित्याग्नीध्रोभक्षयतिव्यक्तं।
वामदेव्यंयजुः। अग्नेराग्नीध्रमस्यग्नेस्त्वामित्रमसिनमस्तेऽस्तुमामाहिंसीः हेहवंशेषत्वमग्नेः प्रसादादाग्नीध्रमग्नीधनकर्तुराग्नीध्रस्य
भागोसि। अग्नेः प्रसादादेवत्वामित्रंपाककर्तुः शमितुराग्नीध्रस्यसंबंधस्यअतस्त्वांभक्षयामितेननमोस्तुमामाहिंसीः। वेदेनब्रह्मय
10 जमानभागोपरिहरति। वेदेनहृत्वा· यथास्थानमासीनाभ्यांप्रयच्छति। पृथक्पात्राभ्यामितरयोः भागौपरिहइतीत्यनुषंगः।। वे
दादन्येनपात्रेणहोतुर्भागंततोन्येनचात्मनइत्यर्थः। पृथिव्यैभागोसीतिहोताभक्षयति अंतरिक्षस्यभागोसीत्यध्वर्युर्दिवो
भागोसीतिब्रह्मा। ब्रह्मणः स्वकालएवभक्षणं। वामदेव्यानियजूंषि। पृथिव्यैभागोसिअंतरिक्षस्यभागोसिदिवोभागोसि। हेह
विः शेषत्वंपृथिव्यैभागोसिअतः पृथिवीभक्षयतिनाहमित्यर्थः। एवमुत्तरयोरपि दक्षिणाग्नावन्वाहार्यमहांतमपरिमितमो
दनंपचति। अन्वाहार्योदक्षिणार्थओदनः। तंमहांतंपचतियथात्विग्भ्यः पर्याप्तोभवतितत्रापरिमितमितिप्रस्थादिनातंडु राम
लपरिमाणप्रतिषेधः। क्षीरेभवतीत्येके। व्यक्तं। तमभिधार्यानभिघार्यवोद्वास्यांतर्वेद्यासाद्यदक्षिणसद्भ्याउपहर्त्तवाइतिसं १०
प्रेष्यतियजमानमितिशेषः। वामदेव्यंयजुः। दक्षिणसद्भ्य उपहर्त्तवै। हेयजमानदक्षिणस्थितेभ्यऋत्विग्भ्यः दक्षिणात्वयाउप
हर्त्तव्या। अत्रब्रह्माब्रह्मन्ब्रह्मासीत्यंतर्वेद्यासन्नमन्वाहार्यमभिमृशति। वामदेव्यंयजुः। ब्रह्मन्ब्रह्मासिब्रह्मणेत्वाहुताद्यमा

माहिꣳसीरहुतोमह्यंशिवोभव।हेब्रह्मन् अभिवृद्धमहित्वंब्रह्मासि अन्नंब्रह्मेतिश्रुतेः त्वायजमानोब्राह्मणेभ्योददातिहुताद्य
अदनमेवहुतंयस्यताहृशान्वाहार्यत्वमघमानोमामस्मान्माहिंसीः।अहुतोग्नौवहूयमानःहुतइतिपाठेब्राह्मणमुखेहुतस्त्वं
मह्यमस्मभ्यंशिवःसुखसाधनोभव।अत्रयजमानाब्रध्नपिन्वस्व॰इयंस्थाल्यमृतस्येतिवांतवेद्यासन्नमन्वाहार्यमभिमृशति।
प्राजापत्यंयजुः।ब्रध्नपिन्वस्वददतोमेमाक्षायिकुर्वतोमेमोपदसत्।प्रजापतेर्भागास्यूर्जस्वान्पयस्वान्प्राणापानौमेपाहिस
मानव्यानौमेपाह्युदानव्यानौमेपाह्यक्षितोस्यक्षित्यैत्वामामेक्षेष्ठाअमुत्रामुष्मिंल्लोके।ब्रध्नपिन्वस्वेतिपुरोडाशाभिमर्शनेव्याख्या
तं।हेअन्वाहार्यत्वंप्रजापतेरतिगूपस्यभागोसिकीदृशः ऊर्जस्वान्बलवान्बलप्रदत्वात्पयस्वान्क्षीरवान्स्वादुतमःक्षीरपाका
द्वासत्वंशरीरगताप्राणादिवायुभेदान्पाहि।एकोवायुशरीरगतस्थानभेदात्कार्यभेदाच्चप्राणादिनामभिर्निर्दिश्यते।स्थानभेदः
पुराणेहृदिप्राणोगुदेऽपानःसमानोनाभिसंस्थितः।उदानःकंठदेशस्थोव्यानःसर्वशरीरगइति।कार्यभेदस्तुनामनिर्वचनाद
वगंतव्यः।व्यानस्यसर्वशरीरवर्तिनोवहुविधव्यापारवत्त्वेनप्राधान्याद्द्विरुक्तिः।यद्वानागकूर्मादिवायुविशेषाणामत्रांतर्भावम
भिप्रेत्यपुनरुक्तिः।हेअन्वाहार्यत्वमक्षितोक्षीणोपरिमितोसिअतःपरलोकेअक्षित्यैत्वांददामीतिशेषः।तेनामुत्रपरेलोकेमे
भोगायमाक्षेष्ठाक्षयंमाप्राप्नुहिततोहमस्यमुष्मिन्लोकेत्वांयथेष्टमनुभवामीतिशेषः।वामदेव्यस्त्रिष्टुप्।इयꣳस्थाल्यमृतस्य

पूर्णासहस्रधारउत्सोअक्षीयमाणःसदाधारपृथिवीमंतरिक्षंविदिवंचतेनौदनेनातितराणिमृत्युं। इयमन्वाहार्यस्थालीअमृतस्यत्वा
दुत्तरेणोदनेनपूर्णावर्त्तते। सहस्रधारोनेकउत्सःप्रवाहइवाक्षीयमाणःसओदनःपृथिव्यादिलोकानुदाधारधारयतियज्ञसाधनद्वा
रेणवृष्ट्यादिसंपादकत्वात्। तेनानेनौदनेनाहंमृत्युमतितराणिअमृतोभूयासमित्यर्थः। येब्राह्मणाउत्तरतस्तान्यजमानआहदक्षि
णतएतेति। येध्वर्यवादयउत्तरस्थितास्तान्। ब्रह्मातुस्थितएवदक्षिणतइति। वामदेवोयजुःदक्षिणतएताहेअध्वर्य्वादयोयूयंद
क्षिणतएतआगच्छत। तेभ्योन्वाहार्यंददाति। ब्राह्मणायंवओदनइति। तेभ्यश्चतुर्भ्योदक्षिणसद्भ्योददाति। वामदेव्यंयजुः। ब्राह्मणा
अयंवओदनः। हेब्राह्मणाऋत्विजोअयमोदनेवोयुष्मभ्योदीयतइत्यर्थः। अत्रर्त्विजः। सप्तदशकृत्वोपान्याद्देवस्यत्वेत्यादिनाप्र
तिगृह्णात्वित्यंतेनोत्तानस्त्वांगीरसःप्रतिगृह्णात्वित्येतावतैववा। दक्षिणहस्तेनप्रतिगृह्णंति। प्राजापत्यंयजुः। देवस्यत्वासवितुःप्र
सवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामिराजात्वावरुणोनयतुदेविदक्षिणेब्रह्मणेओदनंतेनामृतत्वमश्यांवयोदात्रेमयो राम
मह्यमस्तुप्रतिग्रहीत्रेकइदंकस्माअदात्कामःकामाय। कामोदाताकामःप्रतिग्रहीताकामसमुद्रमाविश। कामेनत्वाप्रतिगृ ११
ह्णामिकामैतत्तेएषातेकामदक्षिणोत्तानस्त्वांगीरसःप्रतिगृह्णातुदेवस्यत्वेत्येवदाधानेव्याख्यातं। हेदेविद्योतमानेदक्षिणेव
रुणोराजात्वामोदनरूपांब्रह्मणेदेवायनयतुप्रापयतुनाहंप्रतिग्रहीतेत्यर्थः। अहंतुतेनब्रह्मग्रहीतेनौदनेनामृतत्वमस्याम

मेमैतत्त्वंप्राप्नवानिदात्रेयजमानायवयोनःपश्चादिकंचास्तुप्रतिग्रहीत्रेमह्यमपिमयःसुखमस्तु। कःप्रजापतिरिदमोदनंकस्मैप्र
जापतयेदात्। किंच। कामःसंकल्पःकामायदात्पतःकामएवदाताकामएवप्रतिग्रहीता अतःसमुमुद्रंसमुद्रवदनन्तंकामममेवावि
श अहंतुकामेनकामाधीनएवत्वांप्रतिगृह्णामिहेकामएतद्ध्यंतेतवैवहेकामएषादक्षिणातवैवपुनरुक्तिरादरार्थी अपि
चांगिरसाउत्तानाभिमानपृथिव्यभिमानीइयंवाउत्तानाआंगिरसइतिश्रुतेः सत्वांप्रतिगृह्णातुनाहमित्यर्थः। आश्वलाय
नसूत्र। कइदं॰ पृथिवीप्रतिगृह्णात्वित्यंतासुंसनुमंत्रयेतप्राणपभिमृशेद्प्राणिकंन्यांचसर्वत्रचैतमिति। अयमर्थः कइदमित्या
दिनामंत्रेणप्राणिरूपांदक्षिणामुत्तरतोनीतामनुमंत्र्यप्रतिगृह्णीयात् अप्राणिरूपांकंन्याचाभिमृशति। वामदेव्यंयजुः॥
कइदंकस्माअदात्कामःकामायादात्कामोदाताकामःप्रतिग्रहीताकामंसमुद्रमाविशकामेनत्वाप्रतिगृह्णामिकामैतत्तेवृ
ष्टिरसिद्यौस्त्वाददातुपृथिवीप्रतिगृह्णातु। हेदक्षिणेत्वंवृष्टिरसितद्धेतुत्वात् अतस्त्वांवृष्टिहेतुद्यौर्ददातुतंधारयन्तीचपृथिवीप्र
तिगृह्णातु। नायंदातानचाहंप्रतिग्रहीतेत्यर्थः। शेषंव्याख्यातं। प्रतिग्रहीतउत्तरतःपरीतेतिसंप्रेष्यतितैरोदनेप्रतिगृहीतेसंप्रे
ष्यतियजमानइतिशेषः। विश्वामित्रोयजुः। उत्तरतःपरीत। हेऋत्विजोयूयंविहारस्योत्तरतोगच्छत। हविःप्रोषानुद्वास्यापिसृज्यो
ल्मुके। ब्रह्मन्नु॰ संमृढीतिसंप्रेष्यति। अपिसृज्योल्मुकेइति अनूयाजार्थप्राचीउल्मुकेउदूहतीत्यस्मिन्पक्षेतेप्रत्यक्दूल्यसंप्रे

ष्यति। विश्वामित्रोयजुः। ब्रह्मन्प्रस्थास्यामः समिधमाधायाग्नीत्परिधींश्चाग्निंचसकृत्सकृत्संमृढि हे ब्रह्मन्। अनूयाजार्थंव
यंप्रतिपद्यामहे त्वमनुजानीहि। हे अग्नीदाग्नीध्र त्वंचसमिधमनूयाजार्थमाधायपरिधीनग्निंचैकवारंसंमृढि। ब्रह्मा। देवस।
वितः। ओंप्रतिष्ठेति। प्रसौति। वामदेव्यंयजुः। देवसवितरेतत्तेप्राह तत्प्रचसुवप्रचयजबृहस्पतिर्ब्रह्मा सयज्ञंपाहिसंयज्ञपतिं
पाहिसमांपाहि। ॐ प्रतिष्ठेति। हे देवसवितरनुज्ञातर्द्वैवएतत्प्रस्थास्यामइत्येतत्ते त्वामभ्यर्थयइतुमध्वर्युः प्राह। तस्मात्का
रणात्त्वंप्रसुवच अनुजानीहिच। प्रयजप्रकर्षेणयागंचकुरु। यतोबृहस्पतिः सर्वस्यमहतःपालकस्त्वमेवब्रह्म तत्सत्वंयज्ञंयज
मानंमामध्वर्युंचपाहि हे अध्वर्य्वादयः। ॐ महमनुजाने प्रतिष्ठ। यूयंप्रतिष्ठत यद्वाग्नीध्रत्वंसमिदाधानाय प्रतिष्ठ अनुज्ञा
तोब्रह्मणाग्नीध्रः समिधमादधात्येषति· स्वाहेतिनत्वध्वर्युणामंत्रितो ब्रह्मनुजानात्योंप्रतिष्ठेति। तत्कथंमुच्यते अनुज्ञातोब्र
ह्मणाग्नीध्रइतिश्रूयते। अध्वर्युणातावत्प्रस्थास्यामइतिबहुवचनात्सर्वेर्त्विगर्थमामंत्रणमुक्तं ब्रह्मणाप्योंप्रतिष्ठेति। बहु 
वचनार्थेकवचनेनसर्वार्थएवप्रसवःकृतः तेनाग्नीध्रस्याप्यनुज्ञानत्वाद्युक्तमेव तथावक्तुं। अथवानूयाजप्रक्रमार्थं ॐ प्रतिष्ठे 
त्याग्नीध्रस्यैवानुज्ञा यथाहाश्वलायनः ॐ प्रतिष्ठेतिसमिधमनुजानीयादिति। वामदेव्यंयजुः। एषाते अग्नेसमित्तयावर्द्धस्व
चाचप्यायस्ववर्द्धतांचतेयज्ञपतिएचप्यायतांवर्द्धिषीमहिचवयमाचप्याशिषीमहिस्वाहा। हे अग्ने एषासमित्तेत्वदर्थमाधीयते।

त्वंचतयासमिधावर्धस्वचवृद्धिंप्राप्नुहि।आप्यायस्वचाविच्छिन्नश्चभूयः तेनवयज्ञपतिःयजमानश्चवर्द्धतां आप्यायतांस्व।समृ।
द्धोविच्छिन्नश्चस्यात्।वयमृत्विजश्चवर्द्धिषीमहिसमृद्धास्याम आचप्याशिषीमहिच अविच्छिन्नाश्चस्यामस्वाहा।इयंसमित्
हुतास्तु अत्रयजमानःएषातेअग्नेसमिदित्यानुयाजिकींसमिधमानामनुमंत्र्याहितायांयंतेअग्नेइतित्रिभिरग्निमनुमंत्र
यते।एषातइतिव्याख्यातं।विश्वेदेवाअनुष्टुप्।यंतेअग्नआवृश्चाम्यहंवाक्षपितश्चरन्प्रजांचतस्यमूलंनीचैर्देवानिवृश्चत।हे
अग्नेत्वदीयोहंयंरिपुमाकृश्चामिसर्वतोनाशयितुंप्रवृत्तोस्मिहेपितःपालकाग्नेचरन्परिचरन्नहंवातेनरिपुणाक्षिपितः
क्षयंनेतुंविषयीकृतोस्मितस्यदुरात्मनःप्रजांपुत्रादिकांमूलंजीवनहेतुंलैंधनंच।हेदेवअग्निभृत्यनीचैःनिवृश्चतनुभूतायथा
भवतितथानाशयत।अग्नेयोनोभिदासतिसमानोयश्चनिष्ट्यः।इध्मस्येवप्रक्षालयतोमातस्योच्छेषिकिंचन।अग्नेयःप्र
बलःशत्रुःनोस्माकमनभिदासतिहिनस्तिपश्चाद्यःसमानबलोनिष्ट्योनित्यंशत्रुत्वेनावस्थितोहिनस्तितस्यद्विविधस्यशत्रोः
संबंधिद्रव्यंकिंचनकिमपिमोच्छेषिअवशिष्टंमाकुरुअत्रदृष्टांतः।इध्मस्येवप्रक्षायतःयथाग्नौप्रक्षिप्तस्यप्रदाहेनक्षीयमा
णस्यनकोप्यंशोवशिष्यतेतद्वत्।योमांद्वेष्टिजातवेदोयंचाहंद्वेष्मियश्चमां।सर्वांस्तानग्नेसंदहयांश्चाहंद्वेष्मियेचमां।हे
जातवेदःशत्रुर्मांद्वेष्टिअहंचयंद्वेष्मिद्विविधोद्वेषीप्रत्यक्षःपरोक्षश्चतत्रप्रत्यक्षेउभयकर्तृकोद्वेषःउदाहृतपरोक्षमुभयकर्तृ

कंद्वेषं सूचयितुं यस्मा मामिति पुनरुक्तिः एवं वसतिद्विष्यो द्वेष्टा च द्वौ प्रत्यक्षौ द्वौ च परोक्षौ तांस्तु विधानुं सर्वानुद्दहे अग्ने सं दह भस्मीकु
रुयो मुख्यो द्विष्यं द्वेष्टारौ तद्वारात् द्वीयान्ये पि द्विष्याद्वेष्टारश्चयेसं तितान्संगृहीतुं यां२स्माह मिति पुनरुक्तिस्तान्सर्वान्संदहेति पूर्वत्रान्वयः। पू
र्ववत्परिधीन्सकृत्सकृत्संमृज्याग्ने वाजजित्। अन्नाद्यायेति सकृदग्निप्रांचं व्यक्तं। विश्वेदेवा यजुः। अग्ने वाजजिद्वाजं त्वा ससृवां२सं वाजं
13 जिगिवां२सं वाजिनं वाजजितमित्यादि। पूर्वसंमार्गे व्याख्यातं। तत्र कार्यस्य निष्पत्स्यमानत्वात्सरिष्यंतं जेष्यंतमित्युक्तं। अत्र तु निष्प
न्नत्वात्ससृवांसं जिगिवांसमिति विशेषः। इध्मसंनहनान्यद्भिः संस्पृश्य यो भूतानां तव स्वाहेत्यग्नौ प्रवैवान्यरत्न्युल्केरेनान्यस्यति शा
लायां वल्कजायां परोगोष्ठं परोगव्यूतौ वा। शाला अग्निशाला वल्कजा नडरासिधान्यरासि वंशावंधनार्थारज्जुरित्येके परोगोष्ठाद्वो
द्देशः स परोगोष्ठः परोक्षशब्दवत्समासः परशब्दस्य च परोभावो वा द्रष्टव्यः एवं परोगव्यूतिः। गव्यूतिर्गोमार्गः। गोस्थानाद्गोमार्गाद्वा
न्यत्र यत्र क्वचिन्न्यस्यतीत्यर्थः। तथा च ब्राह्मणं। यद्वो नानि पशवो भितिष्ठेयुर्न तस्य पशुभ्यः क्रमिति मंत्रवर्णश्च पशून्नस्माकं मा हिं२सी राम
रिति पशव्श्चेइध्मसंनहनाधानाधानमाध्वर्यवं संमार्गत्तस्यैवाग्नीध्रकर्मत्वेन प्रेषितत्वात्। प्रजापतिरनुष्टुप्। यो भूतानामधिप १३
ती रुद्रस्तंतिचरो वृषा। पशून्नस्माकं मा हिं२सीरेतदस्तु हुतं तव स्वाहा। यो रुद्रो देवो भूतानां भवतां सर्वेषां तनूनां अधिपतिराधिकेप
नपालकस्तंतिचरः तंत्याकर्मसंतानेन्नचरतीति तंतिचरः वृषा देवेषु श्रेष्ठः हे रुद्र त्वं अस्माकं पशून्मा हिं२सीः एतदग्निमार्जनद्रव्यं

तवहुतमस्तु सएवानूद्यते स्वाहेत्यादशार्थः। अत्रयजमानोवेदिर्बर्हिरितिसंमार्गानूहुतानानुमंत्रयते। विश्वेदेवामहापंक्तिः। वेदिर्बर्हि
र्भृतं हविरिध्मः परिधयस्रुचः आज्यंयज्ञअवोयजुर्याज्याप्रवषट्काराः संमेसन्नतयोनमंतामिध्मसन्नहनेहुते। भूतमा
सादितंहविः वेद्या दिवषट्कारांताः सर्वेसन्नतयः सन्नमनशीलाः संतुमेमदर्थंसन्नमंतांपुनःपुनः विधेयीभूयवर्त्तंतांताःक
स्मिन्काल इतितदुच्यते इध्मसन्नहन्ने इध्मसन्नहनहेतौदर्भेहुतेसति सन्नमंतामित्यन्वयः। अत्रतावदाश्वलायनानुसारे
णप्रयोगः। अंतःपरिधिनिनयनानंतरंवक्ष्यमाणप्रकारेणेडामवदायाभिघार्यप्राशित्रमवद्यतियद्वाज्यस्थाल्याआदायप्रा
शित्रहरणमुपस्तीर्याग्नेयंपुरोडाशंप्राग्वंतिर्यग्वंवाविरूज्यापउपस्थश्यांगुष्ठानामिकाभ्यांआज्यायइतियवमात्रंग्रीहिमात्रंवा
न्निर्मातुरिष्टात्० जेषमितियजमानेनानुमंत्र्यमाणंमित्रस्यत्वा० प्रेक्षइतिब्रह्मणप्रेक्ष्यमाणमध्यादवदायैवयथायोग्यमितर
स्याविरूज्यपुरोडाशादवदायाभिघार्योपस्तरणाभिघारणयोरन्यद्वाकृत्वाहवनीयस्यपूर्वतोदक्षिणाप्राशित्रंब्रह्मणेप्रयच्छतिब्र
ह्माअतस्यपश्चापर्येहीयानीयमानं। सूर्यस्यत्वाचक्षुषाप्रतिपश्यामीतिप्रदीयमानंप्रेक्ष्यैदेवस्यत्वाःप्रतिगृह्णामीतिप्रतिगृ
ह्यांतर्वेदिभूत्वतृणानिधायाप्यसानाहेभोप्यामीतिप्राग्दंडंसादयित्वादध्येनत्वेत्यवेक्ष्यैदेवस्यत्वा० अप्राददइतिअंगुष्ठानामिका
भ्यामादायाग्नेस्त्वास्येनेत्यदंतस्पर्शमपिगीर्यया अस्वंतरितिअपोभ्यानीयाचम्यवसीनामेमेतिनाभिदेशमभिमृश्यवाङ्म

आसन्नितियथातिंगमरिष्टाविश्वानीत्यवशिष्टान्यगान्यभिमृश्याऽपउपस्पृश्यपात्रंप्रक्षाल्यापःपूरयित्वादिशोजिन्वेत्यनिवर्त्त
यन्नूनिनीयपुनःपूरयित्वामांजिन्वेत्यभ्यात्मोपरिनिनयतिअथाध्वर्युरिडापात्रमुपस्तीर्यमनुनादृष्टामितिसक्तुमंत्रेणदक्षिणा
र्धात्प्रथमंसंभेदाद्द्वितीयंस्विष्टकृदवदानाधिकमिडापात्रेऽवदायपूर्वार्धादणुमिवदीर्वंयजमानभागंप्रथमावदानानंतरंवायदा।
यतमाज्येनसनृप्यध्रुवाग्नसिमीपेस्थापयंतीत्येवंसर्वेभ्योहविर्भ्यः।सुरूपवर्षवर्णेउपहवंतेशीयेतियजमानेनानुमंत्र्यमा
णामिडामवदायाभिघार्यपंचावत्तिनस्तुद्विरभिघार्ययद्वापश्चात्।द्वानतीयमवदायाभिघार्यहोत्रेप्रदायेडामनुतसृजन्।हो
तुर्दक्षिणेडापात्रेऽवेत्रेइडायाःपरिप्रगृह्यमाणःपश्चादतिक्रम्यहोत्रासव्यहस्तेनेडायांघृतायांयद्वाहोत्रेऽप्रदायेडांप्राचीमपो
ह्यहोतुर्दक्षिणतआसीनःस्त्रुवेणस्थाल्याआज्यमादायहोतुर्दक्षिणहस्ततर्जन्युत्तरमपर्वणीअन्यतरप्राथम्येनहोतावा
चस्पतिनेत्युत्तरंपर्वोत्तरोष्ठेमनसस्पतिनेत्यधरमधरोष्ठेवागपवर्गंनिमृज्यापउपस्पृश्यपूर्वंप्रदनिइहप्रदत्तामिडामंजलि
नाप्रतिगृह्यसव्येपाणौनिधायेडायाःपश्चाद्दुदगंगुलिःपाणिमुपनिधायपुरस्तात्प्रत्यङ्मुखासीनाध्वर्युरिडाज्यलेपाद्धोत राम
दक्षिणपाणावुपस्तीर्येडातःप्रथममवदायदत्तेंगुष्ठतर्जनीमध्यदेशेनताभ्यांस्वयंस्वयंद्वितीयमवदायाध्वर्युणालेपादभिघा १४
रितेपंचावत्तिनस्तुद्विरभिघारितेंगुलीःप्रत्याहृत्यमुष्टिंकृत्वाबहिष्ठांगुष्ठेनाभिसंगृहीतावांतरेडेनहस्तेडांदक्षिणतःपरिगृह्या

ध्वर्युयजमानाभ्यामन्वारब्धामास्यसंमितांनासिकासंमितांवाकृत्वेळोपहूतेतिनिगदेनह्वयतामित्यंतमुच्चस्वरेणापातादुच्चैस्वरेणाय
यजमानेचोपांशूपहवेभूयस्येहीत्यादि।सहदेवगवीरुच्चैरुपहवेचिदसीत्यादिसप्तमनुष्यगवाःदैवैरित्यादिदिशन्निस्यंतंजपि
त्वावायविडानेमातेतिहोतारमीक्षमाणोवायुंध्यायतिदैव्या।अध्वर्यवइत्यभिज्ञायाध्वर्युरुपहूतःपशुमानसानीतिजपतियज
मानेचोपहूतोयंयजमानइत्यभिज्ञायोपहूतःपशुमानसानीतिजपितोत्तरस्यामित्यभिज्ञायसामेसत्याशीरिति॰गमेयमि
त्यंतंआशीर्मऊर्जेमितिचजपतिसतिपुरामानवीशब्दादुपहूतेतिउपहूतामनुष्याइतिदेवपुत्रेइतित्रीएषवसानानिकुर्वन्त्वा
मुपहूयैतयाऽहमितियजमानेनोपहूताअनुमंत्रणेकृतेत्रवाहवनीयस्यपूर्वतइत्यादिनापूर्वोक्तप्रकारेणप्राशित्रेप्राशितेइडे
भागंसर्वपुरुषाइत्यवांतरेळांप्राश्पेत्लामिति।अथाध्वर्युणाविभज्यदत्तामिडाधेनुरितियजमानेनानुमंत्रितांयजमानपंचमा
नपंचमाइडेभागंजुषस्वेतिप्राश्याचम्यवाग्यतांतर्वेदिहस्तेप्रस्तरमंतर्धायमनोज्योतिरित्यपाआनयतोहोतात्वाहवनीयप
रिस्तरणैरंजलिमंतर्धायतूष्णीमपआसेचयतेयद्वोक्तप्रकारेणेडामवदायाभिधार्यप्राशित्रंयथापूर्वमवद्यतिअथहोत्रेप्रदा
येडामित्यादिनामार्जनांतेआहवनीयस्यपूर्वतइत्यादियथापूर्वप्राशित्रप्राशनंतथाध्वर्युणाग्नेयेपुरोडाशेचतुर्धाकृत्वाबर्हि
षदंकरोतिवर्हिषिनिधायवाचतुर्धाकृतेयजमानोब्रह्मापिन्वस्व॰कल्पतांमइतिआसंनमभिमृश्यपेदानीआतृशागनांत्वेतिप्र

तिदिशंव्यूह्येदंब्रह्मणइत्यादिभिश्चतुर्भिरिदमग्नीधइत्यादिभिर्वेदंहोतुरित्यादिभिर्वायथायोगंध्यादिश्यउपहूतोद्यौपुण्यायेत्याग्नी
ध्रभागंव्यूहतिअध्वर्युरिदंयजमानस्येतियजमानभागंनिर्दिश्याग्नीध्रभागंद्वेधाकृत्वाग्नीध्रहस्तेउपस्तीर्यनिधायपुनरुपस्ती
र्यान्यमाधायद्विरभिधारयतियद्वाद्विरुपस्तीर्यद्विराधायसद्विरभिधार्याग्नीध्रेणाग्नेराग्नीध्रमस्यग्नेरितिमह्यतेवेदेनब्रह्म
यजमानभागोताभ्यांदत्वान्येनपात्रेणहोत्रेदत्वान्येनात्मनोनीत्वाद्दष्पिब्वैभागोसीतिहोत्राभक्षितेंरिक्षस्यभागोसीतिहोत्राभक्षि
तेंरिक्षस्यभागोसीतिस्वयंभक्षयित्वादक्षिग्नावन्वाहार्यमहांतंप्रस्थादिनापरिमितमोदनमुदकेक्षीरेवापक्कमभिधार्यानभिघा
र्यवोद्वास्यांतर्वेद्यासाद्यब्रह्मन्ब्रह्मासीतिब्रह्मणाब्रध्नपिन्वस्व॰अमुष्मिंल्लोकइतिइयंस्थालीचयजमानेनचाभिमृष्टेदक्षिण
सद्यउपहर्त्तवाइतिसंप्रेष्यतियजमानंउत्तरतस्थितानृत्विजोदक्षिणतएतेत्यक्त्वाब्राह्मणाअयंवोओदनइत्युतिजाग्भ्योअन्वा
हार्यंददातिअथर्त्विजःसप्तदशकृत्वोपान्यादेवस्यत्वेत्यादिदेविदक्षिणेब्रह्मणओदनंतेनामृतत्वमितिप्रतिगृह्णात्विति उत्तान राम
स्त्वांगिरसःप्रतिगृह्णात्वित्येववाब्रह्माकइदमित्यादिपृथिवीप्रतिगृह्णात्वितिहोनेत्येवमभिमृश्यप्रतिगृह्ययजमानेनोनरतः १५
एतेतिसंप्रेषितायथास्थानंगच्छेयुःअथाध्वर्युःहविःशेषान्वेदेर्बहिरुद्वास्यपूर्वमनूयाजार्थंउद्दृढे उल्मुकेंतःप्रत्यस्यब्रह्मनूप्र
स्थास्यामःसंमृढीतिसंप्रेष्यब्रह्मणादेवसवितरेतत्तेॐप्रतिष्ठेत्यनुज्ञातेआग्नीध्रेणौषाते अग्नइतियजमानेनानुमंत्र्यमा

णाएषाते अग्ने इतिसमिधमाधापयंते अग्न इतितिसृभिर्यजमानेनाग्नावनुमंत्रितेपूर्ववत्परिधीन्सकृत्सकृत्संमृज्याग्नेवाजजित्ं अ
न्नाघायेति।सकृदग्नेोप्राचिसंमृष्टेध्मसन्नहनेनान्यद्भिः संस्पर्श्यपयोभूतानामित्याग्नावग्निशालायांवातृणराशौवाधान्यराशौवागोष्ठेगो
मार्गीतिरिक्तेदेशेवाप्रक्षिप्याषउपस्पृशति।यजमानोवेदिर्बर्हिरितिप्रक्षिप्तान्संमार्गानिनुमंत्रयते।आपस्तंबीयेवायंविशेषः॥अं
ष्ठामंगुलिमिषेप्राणायेतिमुखदेशउर्ध्वमुत्कृष्योर्जेपानायेत्यवाचीनंनियच्छति।प्रथममिडावदानमध्वर्युःकरोतिद्वितीयंहोता।
यद्वाप्रथमंहोताद्वितीयमध्वर्युः।उपहूतंरथंतरमित्यादिरुपहूतांहोइत्यंतउपांशुअथोच्चैःतत्रचतुरुपह्वामेअशद्रांतस्तइतिसूत्र
व्याख्यातारः।यथामंत्रपाठमितिवेदव्याख्यातारः।वाचस्पतयेत्वाहुतमित्यवांतरेडांप्राश्नातिहोताप्यंतर्वेदिप्रस्तरेमार्जयंते।मनो
ज्योतिरितिसप्रदशक्लृप्तोपान्यदेवस्यत्वेत्यादिनेनप्रतिगृह्णातिसर्वमन्यत्समानं।संमार्गप्रहारांतमंत्रतंत्रसुगंदिभिः सूक्तिःप्रसु
नैःपुष्णातुपुमन्पुरुषोत्तमः॥ ॥इत्यापस्तंबीयाध्वरतंत्रस्वतंत्रव्याख्यायांप्रयोगरत्नमालायांतृतीयेप्रश्नेप्रथमःपटलः॥ ॥
कर्मत्रह्माध्वनीनस्यमंत्रिभूपतिभूपतेः।व्याचष्टेचौडपाचार्योनूयाजादिकंक्रिंति।औपभृतंजुह्वामानीयजुहूपभृतावादायद।
क्षिणासकृदतिक्रांतोग्नेरणाघारसंभेदंप्रतीचस्त्रीननूयाजान्यजति आश्राव्यप्रत्याश्रावितेदेवान्यजेतिप्रथमंसंप्रेष्यतियज
यजेतीतव्याख्यातंप्रयाजसूत्रेण।अत्रतुदेवान्यजेतिसर्वानूयाजार्थप्रथमःसंप्रैषःप्रातिस्विकोवितरौतेनोत्तरयोर्द्वियजत्वं

वोढव्यंप्रयोजनंचपश्चाद्दर्शयिष्यामः।सौत्राण्यिजूंषि।हेहोतः।त्वंअनूयाजदेवान्यज।यजयज।निगदव्याख्याते।यत्रयजमानःसप्त
होतारंवदेत्पुरस्तादनूयाजानामुपरिष्टाद्वा।प्राजापत्यंयजुः।माहाहविर्होतासत्यहविरध्वर्युः।अच्युतपाजाअग्नीत्।अच्युतमनाउ
पवक्ता।अनाधृष्यश्चाप्रतिधृष्यश्चयज्ञस्याभिगरौ।अयास्यउद्गाता।महाहविः।महत्सर्वंहिविभोर्ज्यंयस्यसमाहाहविरात्मा।आदि
त्योवासोस्यघागस्यहोता।सत्येनहविः।संकल्पयज्ञेनजगत्सृजतीति।सत्येनहविःप्रजापतिसौत्राध्वर्युः।अच्युतः।अविचालित
16 पाथेजोस्यासावच्युतपाजावायुः।सौत्राग्नीध्रः।अचातंनित्यसत्वस्यमनोयस्येत्यच्युतमनाविह्लः।सौत्रोपवक्ता।ब्रह्मा।अनाधृ
ष्यकेनाघर्षणीयइंद्रिः।अप्रतिधृष्यः।स्वयमपिभावितापन्नैरनभिभाव्योरुद्रस्तावस्ययज्ञस्याभिगरौप्रशंसाकर्तारौ।अयास्यो
रसःपुत्रः।सौत्रोद्गाता।एवंप्रशस्तोयंयज्ञइत्यर्थः।अत्रहोतात्रिरनूयाजानेकैकंप्रेषिते।आगूर्वंजदेवंबर्हिर्देवोनराशंसइतिदे
वोअग्निस्विष्टकृदिति।अत्सनेत्यत्रावसायानवसायवायथापूर्वंयजेति।मेधातिथिः।प्रजापतिर्वा।आध्येयजूंषि।तृतीयासंकृ राम
तिः।देवंबर्हिर्वसुवनेवसुधेयस्यवेतु।देवंद्योतनशीलंबर्हिर्नामकंयदग्निःस्वरूपंतदेतद्वसुधेयस्यवेतु।आज्यंवस्तुरूपंयदेतदग्ना १६
वाधेयंतदेतद्धस्यतु।किमर्थंवसुवनेवसुनोधनस्यवननंभजनंवसुवनूतस्मैयजमानधनप्राप्तयेइत्यर्थः।एवमुत्तरत्रापि॥दे
वोनराशंसोवसुवनेवसुधेयस्यवेतु।पूर्वेणव्याख्यातं।देवोअग्निःस्विष्टकृत्सुद्रविणामंत्रःकविःसत्यमन्मायजीहोताहोतुर्हो

तुजीयावैन्‌ग्नेयंदेवानयाड्ढां। अपिप्रेयेतिहोत्रे अमत्सत। तांससनुषींहोत्रांदेवंगमांदिविदेवेषुयज्ञमेरयेमं। स्विष्टकृच्चाग्नेहोताभू
र्वसुवनेवसुधेयस्यनमोवाकेवीहि। यस्तत्स्विष्टकृन्नामको ऽग्निः सोयंदेवः सुद्रविद्रणांशोभनधनंमंद्रोमहर्षणशीलः कविर्वि
द्वान्‌सत्यमन्मासत्यमननः आयजीशास्त्रीययामर्यादयायष्टाहोता। देवानांह्वाताहोतुर्होतुरायजीयान्‌लोकेयोयोहोता
स्तितस्मात्सर्वदातिशयेनशास्त्रीयमर्यादामनुलंघ्ययष्टाहेअग्नेईदृशस्त्वंयांदेवानयाड्‌इष्टवानसियांश्चदेवानपिप्रीणी
तवान्‌सिह्वियेदेवास्तेनवहोत्रेहोतृकृत्येयजनेअमत्सत अमाद्यन्‌हृष्टावंतः दिविस्थितेषुदेवेषुससनुषींहविर्विपिदत्तवती।
देवंगमांदेवानेवगच्छतीतांहोत्रांहोतृक्रियांइममस्मदीयंयज्ञप्रत्येतयाभिमुखेनप्रापय अस्मदीययज्ञेसर्वदेवतुष्टिकरींहो
तृक्रियांत्वमनुतिष्ठेत्यर्थः। हेअग्नेत्वंस्विष्टकृद्धोतावाभूर्यमस्माभिरिष्टस्तच्छोभनंस्वाहाकृतंतादृशोहोमस्यकर्त्ताभूः ततोनमो
वाकेयजमानस्यनमस्कारोक्तौसत्यंवसुवनेवसुधेयस्यहेअग्नावाधीयमानमिदमाज्यरूपंद्रव्यंभक्षयापूर्वार्धेप्रथमंसमि
धिजुहोति। मध्येद्वितीयंप्रांचमुत्तमंसंस्थापयन्‌नितरावनुसंभिद्य। अग्नेणाघारसंभेदंयोदेशस्तस्यपूर्वभागप्रथममनूया
जसमिधिजुहोतिमध्येद्वितीयंततः पश्चादुत्तममारभ्यप्रांचममलायंनूपूर्वंहुतावनूयाजौसमृज्यजुहोत्यत्रबोधायनः॥ किं
देवताः खल्वेतनूयाजाभवंतीत्याग्नेयाइत्येवब्रूयाद्विज्ञायनेच। देवाआहुतीअनूयाजेष्वन्वविंदन्नित्यादि। अत्रयजमानः।

त्रिभ्यगन्यइदंनममेत्यक्तायथाक्रमंबर्हिषोहमित्यादिभिस्त्रिभिर्हुतादनुमंत्रयते।प्राजापत्योयजूंषि।बर्हिषोहंदेवयज्ययाप्रजावान्भू
यासंनराशंसस्याहंदेवयज्ययापशुमान्भूयासं।बर्हिर्नराशंसावग्निविशेषौशेषंनिगदव्याख्यातं।अग्नेःस्विष्टकृतइतिस्विष्ट
कृदनुमंत्रणेव्याख्यातं।प्रत्याक्रम्यायतनेस्रुचौसादयित्वावाजवतीभ्यांव्यूहतिवाजवतीभ्यांवक्ष्यमाणाभ्यामृग्भ्यांव्यूहतिविवि
17 धंगमयतिस्रुचौ।अत्रस्यद्वितीयस्यवाजवतीलोपचारःप्राणभृत्तूवत्प्रथमस्याहवयोर्द्रष्टव्यः।तदेवंवाजयतीभ्यांव्यूहतीति।
कर्मविधिब्राह्मणमुदाहृतं।एतदेवव्याचष्टे।वाजस्यमाप्रसवेनेतिदक्षिणेनहस्तेनोत्तानेनसप्रस्तरांजुहूमुद्यच्छ।त्वयासप
त्नानितिसव्येनोपभृतंनियच्छतीतिनिगृह्णाति।उद्ग्राभंचेतिजुहूमुद्यच्छतिनिग्राभंचेत्युपभृतंनियच्छति।अत्रोभयंदक्षिणेन
हस्तेन।सव्याग्रहणादुपरिपुनःसव्यग्रहणाच्च।ब्रह्मदेवाअवीवृधन्नितिप्राचींजुहूंप्रोहतिअथासपत्नानितिसव्येनोपभृतं
प्रतीचींबर्हिर्वेदिनिरसित्वाप्रोक्ष्यैनामभ्युदाहृत्यजुह्वापरिधिननक्तिवसुभ्यस्त्वेतिमध्यमंरुद्रेभ्यस्त्वेतिदक्षिणमादित्येभ्य राम
स्त्वेत्युत्तरं।प्रतीचीप्रत्यगग्रांप्रत्यगपवर्गांच।जुह्वातदाज्यलेपेनसर्वंजिनासंभवात्परिध्येकदेशनामंजनं।अत्रयजमानाध्व १७
र्युवाजवत्स्वोजपतोयजमानोवसूदेवानित्यादिभिस्त्रिभिःपरिधीनज्यमानाननुमंत्रयते।प्रजापतिरनुष्टुप्।वाजस्यमाप्रस
वेनोद्ग्राभेणोदग्रभीत्।अथासपत्नाँइंद्रोमेनिग्राभेणाधराँअकः।वाजस्यान्नस्यप्रसवहेतुनामुष्याजुह्वाऊर्ध्वग्रहणे

नैंद्रहामादूर्ध्वंमगमत्। अधोवभूतौ। नीवग्रहणेनममवैरिणो निकृष्टानकरोत्। उद्ग्राभंचनिग्राभंचब्रह्मदेवा अवीवृधन्। अधासप
त्नानिंद्राग्नी मे विषूचीनानूव्यस्यतां। उद्ग्राभंचममोत्कर्षंचनिग्राभंचवैरिणां निकर्षंचब्रह्मपरंब्रह्मदेवांश्चवर्द्धितवंतः। अथैंद्रा
ग्नीममसपत्नान् विषूचीनान् विन् विभ्यागतीन् स्वस्थानभ्रष्टायथाभवंतितथाविशेषेणप्रवर्त्तयतां। प्राजापत्यानियजूंषि।
वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वाहेवसुतुभ्यंहेमध्यमपदेवसून्तुहिश्पत्नामनज्मि एवमुत्तरयोरपिव्या नियजूंषि। वसून्देवा
नूयज्ञेनापिप्रे। रुद्रान्देवान्यज्ञेनापिप्रेआदित्यादेवान्यज्ञेनापिप्रे। अनेनांजनलक्षणेनयज्ञेनवस्वादीन्देवादीन् स्तर्पितवा
नस्मि। नप्रस्तरेजुहूंसादयति। वेद्यामेवबर्हिःप्रस्तरात्सादयति। संज्ञानाथां॰वृष्ट्यावतांमितिविधृती भ्यांप्रस्तरमपादायवर्हिर्वि
दधाति। अपिवावर्हिषिविधृतीअपिसृज्यास्रुक्षुप्रस्तरमनक्तिव्यक्तं। अक्तंरिहाणाइत्यतिजुह्वामग्रंप्रजांयोनिमित्यूपभृ
तिमध्यंआप्यायंतामापओषधयइतिध्रुवायांमूलं। विधृतीभ्यांसहेनिशेषः। एवंत्रिः। एवमितिवचनात्समंत्रकस्यावृत्तिः। वा
मदेव्यंयजुः। संज्ञानाथांद्यावापृथिवीमित्रावरुणौत्वावृष्ट्यावतां। हेप्रस्तरमयादीयमानंत्वांद्यावापृथिव्यावनुमान्येतांमित्रा
वरुणौचवृष्टिद्वारेणरक्षेतांप्राजापत्यानियजूंषि। अक्तंरिहाणा वियंतुवयः। वयःपक्षिणआज्येनांक्तप्रस्तराग्रंरिहाणाःक्लि
हाना विविधमार्गंगच्छंतु। प्रजांयोनिंमानिंमानिर्मृक्षं। अहंप्रजांतत्कारणंचमाविनाशयामि। आप्यायंतामापओषधयः। आ

पआज्यरूपा ओषधयः प्रस्तरमूलरूपा ओषधीः आप्यायंतु। अपिवादिवं क्षेति जुहामग्रमंतरिक्षेत्सुपभृतिमध्यं पृथिव्या
मंक्ष्वेति ध्रुवायां मूलं। मंत्रमात्रे विकल्पः। एवं पुनः एवं त्रिरित्यर्थः। वामदेव्या नियजूंषि। दिव्यंक्ष्व अंतरिक्षेक्ष्व। पृथिव्यामंक्ष्व। हे प्रस्तर
द्युलोकादिरूपेषु जुहादिषु स्थितेनाज्येनाक्तो भव असौ वै जुहूरिति श्रुतेः। अथापरां पृथिव्यैत्वेति ध्रुवायां मूलं। अंतरिक्षायत्वेति
18 उपभृति मध्यं दिवेत्वेति जुह्वाय मग्रमक्तं। वामदेव्या नियजूंषि। पृथिव्यैत्वा अंतरिक्षायत्वा दिवेत्वा। हे प्रस्तर मूलमध्याग्रेषु पृथिव्या
दिलोकत्रयात्मकत्वां पृथिव्यादीनुद्दिश्य पानज्मीत्यर्थः। अत्र यजमानः समङ्क्तां बर्हिर्यत्स्वाहेति। प्रस्तरमज्यमानमनुमंत्रयते। विश्वे
देवास्त्रिष्टुप्। समक्तां बर्हिर्हविषा घृतेन समादित्यैर्वसुभिः संमरुद्भिः समिंद्रेण विश्वेभिर्देवेभिरक्तां दिव्यं नभो गच्छतु यत्स्वाहा। इदं प्र
स्तराख्यं बर्हिः घृतरूपेण हविषा समक्तां सम्यगक्तं भवतु। तथादित्यवसुमरुद्भिरिंद्रविश्वेदेवैर्घृतेन सम्यगक्तमस्तु। ततो दिव्यं द्योतमा
नं नभः आदित्याख्यं यत्तेजोस्ति तत्तेजोयं प्रस्तरः प्राप्नोतु स्वाहा समर्पितोयं प्रस्तरः आयुषेत्वेत्यस्य तृणमपादाय प्रज्ञा राम
तं निधाय दक्षिणोत्तराभ्यां पाणिभ्यां प्रस्तरं गृहीत्वा जुहां प्रतिष्ठाप्यासीन आश्राव्य प्रत्याश्राविते संप्रेष्यती षितो दैव्या० सूक्तान्ब्रू १८
हीति। अस्य प्रस्तरस्य संबंधितृणं दक्षिणोत्तराभ्यां दक्षिण उत्तरः सव्यउपरि ययोस्तौ तयोक्तौपाणिभ्यामिति दीर्घः। प्रमादि
कः वामदेव्यं यजुः आयुषेत्वा। हे तृण त्वामायुरर्थमाददे। प्राजापत्यं यजुः इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः। सूक्त

वाकाय सूक्ता ब्रूहीति ही। भद्रं फलं यस्य वाक्यं। वचनं। तदर्थं कोग्निर्होता पृथिवी होतेत्यादिस्मृतिसिद्धा दैव्या होतारः परमेश्वरेण प्रेषिताः। इदं द्या
वापृथिवी भद्रमित्याद्यनुवाकोस्य सूक्तस्य वाचको वचनं तदर्थं मानुषो होता प्रेषितः अतो होतस्त्वं तत्सूक्तं ब्रूहि। अत्राश्वलायनः। सूक्तवा
काय प्रेषित इदं द्यावापृथिवी तयोराविदीत्यवसाय प्रथमया विभक्त्यादिरूपा देवतामिदं हविरजुषतावीवृधत महोज्यायोकृतेति उप
सं तनुयादेवमुत्तरा अक्रातामक्रतेति यथार्थमुक्तमुपांसोराचापिकां तमनुदत्यदेवा आज्यपा अस्तावसाविस्यादिरूपनामनीउपां
शुसन्निधौ गुरोरायुराशास्ते नमो देवेभ्य इति। यमास्तीदमित्यादि नमो देवेभ्य इत्यंतं वागसीतिस्तामिति कृतावावीदिति अकृतेति
अक्रातामिति अक्रातेति यजमान इति यज्ञशर्मा कार्त्तिक इति मानुषा इति चावसानानि कुर्वन् तयोरावेविदीत्यनंतरमावाहननि
गदोक्ता देवतां यथायोगं प्रथमया विभक्त्यादिरूपेदं हविरजुषतेत्याद्येकदेवत्ये अजुषेतामवीवृधेतां अक्रातामिति द्विदेवत्ये अजु
षंतावीवृधंत अक्रतेति बहुदेवत्ये उक्तोपांशोपांशुयाजदेवतानां एवमावायथायोग्यपदे तांतरत्वदेवा आज्यपा इत्यादि यजमान इत्य
त्रायज्ञशर्मेति व्यावाहारिकं नाम कृत्तिकः रौहिणः मार्गशीर्षः आर्द्रकः पुनर्वसु तिष्यः आश्लेषः माघः फाल्गुनः हस्तः चैत्रः स्वा
ति विशाख अनूराधः ज्येष्ठः मूलकः आषाढः श्रवणः श्रावणः श्रविष्ठः शतभिषः प्रोष्ठपदः रैवतः आश्वयुजः अपभरणिः। श्रा
पभरणि रिति नक्षत्रनाम च यथायोगं होता ब्रूयात्। यजमान उपांशु सूक्तायुराशास्त इत्यादि सूक्तवाकं ब्रूयादिति। आपस्तंबीयेतुय

19

यजुर्वेदपाठेनुवाकः। तत्र एकमेवनाम। सर्वमन्यत्समानं वामदेव्यः प्राजापत्योहनिगदः। इदंद्यावापृथिवीभद्रमभूदार्ध्मसूक्तवाकमुत
नमोवाकमृध्यास्मसूक्तोच्यमग्नेत्वंसूक्तवागसि। उपश्रुतीदिवस्पृथिव्योरोमन्वतीतेस्मिन्यज्ञेयजमानद्यावापृथिवीस्तां। शं
गयीजीरदानूअत्रस्नूअप्रवेदेउरूगव्यूतीअभयंकृतौ। वृष्टिद्यावारीत्यापाशंभुवौमयोभुवाऊर्जस्वतीपयस्वतीसूपचरणा
चस्वधिचरणाचतयोरा विद्यसावसाविदंहविरजुषतावीवृधतमहोज्यायोकृतदेवाआज्यपाआज्यमजुषंतावीवृधतमहो
ज्यायोकृताग्निर्होत्रेणेदंहविरजुषतावीवृधत्तमहोज्यायोकृतअस्यामृध्येद्धोत्रायांदेवंगमायामाशास्तेयंयजमानोसावसा
वायुराशास्तेसुप्रजास्त्वमाशास्तेरायस्पोषमाशास्तेसजातमनस्यामाशास्तेउत्तरांदेवयज्यामाशास्तेहविष्करणमाशास्ते
दिव्यंधामाशास्तेविश्वंप्रियमाशास्तेयदनेनहविषाशास्तितदस्यात्तदृध्यात्तदस्मैदेवारासंतांतदग्निर्दे। वोदेवेभ्योवनतेवयम
ग्नेर्मानुषाइष्टंचवित्तंचोभेचनोद्यावापृथिवीअंहसस्पातामेहगतिर्वामस्येदंनमोदेवेभ्यः यजुर्वेदेत्वयंविशेषः। उपश्रितःशं राम
गयेजीरदानूऊर्जस्वतीचपयस्वतीच। अस्यामृध्येद्धोत्रायांसुप्रजास्त्वमाशास्तेसजातवनस्यां। इष्टंचवीतंच। अंहसःस्पातामे १९
हगतिरिति। इतरत्समानं। हेद्यावापृथिव्योइदमीदृशंभद्रंकल्याणमस्माकमभूत्। कीदृशमित्यपेक्ष्यतेवयंसूक्तवाकमाद्र्ध्मश्रद्धालु
रयंयजमानः सम्यगनेनहविर्दत्तमित्यादीनिवाक्यानिसूक्तानितेषदिवैर्मानुषैर्वावचनंवाकस्तद्घषाभवतितयासमृद्धिंगतास्म

अथवाग्निरिदंहविर्जुषतावीवृधतमहोज्यायोकृतेत्यादीनिसूक्तानितेष्वांवचनमन्त्रयथाभवतितथावयमृद्धिंगताः। अपिचनमो
देवेभ्यइत्युक्तिर्नमोवाकःसयथाभवतितथावयमृद्धिंप्राप्ताः हेअग्नेत्वयानोक्तोयंयजमानःसम्यग्विर्दत्तवानितिएताद्दशंसू
क्तंवक्तयंतेनवयमृद्धास्मसमृद्धिंप्राप्ताभूयास्मयस्मात्वंद्यावापृथिव्योर्मध्येसूक्तवागसिसूक्तंवक्तुंकामोस्यसीत्युपपत्तिः॥
प्रसिद्धरूपग्निरितइतिपाठेतुयस्मात्वंद्यावापृथिव्योरूपरिस्थितोवस्थितोभूत्वासूक्तंवक्तुंक्षमोसिहेयजमानतवसंवंधिन्यस्मि
न्यज्ञेद्यावापृथिव्योओमन्वतिरएवंसौस्ताकीद्दशोद्यावापृथिव्योशंगयूसुखस्यप्रापयित्र्यौजीरदानूवृष्ट्यादिद्वारेणजीव
नप्रदात्र्यौअत्रस्तूभयरहितेअप्रवदेअस्मदीयानांदोषाणांअकपयित्र्यौउरुगव्यूतीप्रभूततृणोदकेत्वेनविस्तीर्णगोप्रचा
रेणअभयंलंकृतौअस्मास्वभयस्यकर्त्र्यौवृष्टिद्यावावृष्टेःप्रकाशयित्र्यौरीत्यापारीसंन्मार्गवृत्तिप्रकारस्यप्रापयित्र्यौशंभुवौ
रोगाद्यनिष्टशांतेप्रापयित्र्यौमयोभुवौअन्नपानादिसुखस्यप्रापयित्र्यौयुवयोर्मध्येद्यौरियमुर्जस्वतीवृष्टिरूपरसवती
पृथिवीयंपयस्वतीतृणोदकद्वारावहुलक्षीरादियुक्तातथैवयंद्यौःसूपचरणादेवताधिवासस्थानत्वेनसुष्टुपचरितव्याइयंपृ
थिवीसधिचरणासुखेनाधिश्रित्यचरितुशक्यातयोर्द्यावापृथिव्योराविदि। आज्ञायांसत्यांअग्न्यादिराज्यभागादिदेवोद
त्तमिदंहविरसेवतसेवितायजमानंवर्द्धितवानूतस्ययजमानस्यात्याधिकंतेजःकृतवानूएवंद्विदेवत्यवहुदेवत्ययोरपियोज्यं।

देवताक्रमश्चात्रावाहननिगदेवगंतव्यः।होत्रेणहोमनिमित्तेनहोमस्यस्विष्टकृत्त्वंकर्तुमित्यर्थः।अस्यांसूक्तवाकपाठपूर्विकायांहोत्रा
यांप्रस्तरप्रहरणहोमरूपक्रियायांदेवान्प्राप्नुवंत्यांसत्यामनेनधेन्नश्नोतुयजमानःसमृद्धिंप्राप्नोतु असौविष्णुरुद्रादिशर्मासौकृत्तिक
इत्यादिनक्षत्रनामवांश्चायंयजमानोवक्ष्यमाणफलजातमाशास्तेतदेवप्रपंच्यते।अयंयजमानःस्वस्यायुःप्रार्थयते।सुप्रजा
स्त्वंशोभनापत्ययुक्तत्वंरायस्पोषंधनस्यपुष्टिंसजातवनस्यांसमानजातीयैर्जनैर्नंसेव्यत्वंआत्मनइच्छतीतितदीयेच्छासजा
तवनस्यतामुत्तरांदेवयज्यांकाळांतरभाविनीमिमामिष्टिंभूयोहविष्करणंप्रभूतंसोमयागादिरूपंदिव्यधामस्वर्गलक्षस्थानं।
किंबहुनाविश्वंप्रियंयद्यन्मनप्रियंतत्सर्वंप्रार्थयतेअनेनप्रस्तराख्येनहविषायत्फलमाशास्तेतदश्यात्तत्फलंभुक्तातत्रफ
लमृध्यात्।समृद्धमस्यमवतुतत्सर्वमस्मैयजमानायाग्न्यादयोदेवारासंतांसाधयंतांतत्फलमयममग्निर्देवैः।सर्वेभ्योदेवेभ्यश्चा
नीयवननेयजमानंतद्भाजंकरोतु।वयंचहोत्रादयोमानुषाःसंतोग्नेप्रसादात्तंभावितंफलंमनुष्येभ्यआनयामइतिशेषः॥ राम
किंतद्दैवंमानुषंगफलमिति।तदुच्यतेइष्टंचवित्तंचेतिइष्टंयागादिनिमित्तंवित्तंदक्षिणादिनिमित्तंस्वर्गादिसाधनंकिंचएतेद्या २०
वापृथिवीउभेत्र्यपिनोस्मान्अंहसःफलप्रतिबंधकात्पापात्पानांरक्षतांइहास्मिन्कर्मणिवामस्यवननीयस्यधनस्यग
तिःप्राप्तिरस्तु।इदंचहविर्देवैःस्वीक्रियतामितिशेषःनमस्कारोदेवेभ्यःसर्वेभ्योस्तु।अनूच्यमानेसूक्तवाकेमरुतांपृषतयस्थे

निसहशारव्याप्रस्तरमाहवनीयेप्रहरति। सारवादिरास्ति सापि प्रस्तरेण सह प्रहर्त्तव्या सात्वप चित्रा प्रक्रियते सह पवित्रेणेत्यन्ये। प्राजाप
त्यं यजुः। मरुतां पृषतयस्थ दिवं गच्छत ततो नो वृष्टिमेरय। हे प्रस्तर त्वयवायूयं वायुप्रेरितवृष्टिजन्यतया मरुतां विंदवस्थ हे प्रस्तर त्वं दिवं ग
च्छत ततोऽस्मल्लोकान्नोऽस्माकं वृष्टिं प्रेरय न स्वाहाकरोति। मरुतां पृषतयस्थेति मंत्रेण स्वाहाकारं न करोति नन्च जुहोतित्वादेवाप्राप्ते स्वाहा
कारे किं प्रतिषेधेन सत्यं न प्राप्तस्तथापि परमतेनाशंकितः प्रतिषिध्यते। एतद्धि मतं जैमिनीनां। अस्ति यागविधिः सूक्तवाकेन प्रस्त
रं प्रहरतीति यत्र याज्यास्थानीयः सूक्तवाकप्रस्तरो द्रव्यं मंत्रवर्णाख्यादेवता प्रहारश्चैव यजत्यर्थ इति। प्रस्तरप्रतिपत्तेस्तु कालविधि
रिति। सूत्रकृतोऽभिप्रायः। अत एवोक्तमनूच्यमाने सूक्तवाक इति तस्माद्धक्तमिति प्रतिषेधः। अन्ये तु सूक्तवाकस्य याज्यात्वं प्र
हारस्य च यागत्वमंगत्वमंगीकृत्य वषट्कारप्रदाने व्यापि मंत्रवत्सु वपाहोमादिषु स्वाहाकारः कर्त्तव्य इति ज्ञापनार्थः प्रतिषेध इ
त्याहुः। न विधुनोति नावधूनोति न विक्षिपति न प्रमार्ष्टि न प्रतिमार्ष्टि नानुमार्ष्टि नोर्द्ध्वं प्रहरेत्। जुह्वा प्रस्तरं प्रहरन्न विधूनोति न
चालयति नावधूनोति नाचीनं कंपयति नोर्द्ध्वं नोद्गमयं इत्तरे व्याख्याताः तिर्यंचं हस्तं धारयन् कर्षन्निवाहवनीये प्रहरति दक्षिणह
स्तं तिर्यंचमुत्तानोदंगुष्ठांगुलीकं धारयति मुष्टिनैव सह कर्षन्निव शनैः शनैः प्रहरति तथा जुह्वामिव हस्तं धारयतीत्येव सत्याषा
ढभरद्वाजौ स्वयं चवक्ष्यति। न्यंचं हस्तं पर्यावर्त्तयतीति। न प्रतिमृणातीत्युक्तं। न प्रतिमृणातीत्यादिब्राह्मणे यदुक्तं नियमजातं तदप्य

नुसंधातव्यमित्यर्थः। नप्रतिशृणाति। यथाप्रस्तरप्रमर्दितांगाराः प्रतिशीर्णा न भवंति तथा प्रहरतीत्यर्थः। तथोपरीव प्रहरतीति नि
यच्छति नास्यर्यं प्रहरेदित्यादि द्रष्टव्यं। नात्यग्रमिति यथाग्निमतीत्याग्रमगतं भवति तथेत्यर्थः। प्रथयित्वा प्रहरेत् यं कामयेत।
स्त्रियस्य जायेतेति न प्रथयितव्यमिति भावः। आशीः प्रति प्रस्तरमवसृजति। न्यंचं हस्तं पर्यावर्त्तयन् आशीः प्रति आशिष्ट्वा प्रतिश्रा
युराशास्त इत्यादि होतुराशीर्वचनकाल इत्यर्थः। अवसृजति विसृजति। कथं यथोक्तप्रकारधृतहस्तं दक्षिणा प्रसार्य प्रस्तरस्यो
परिन्यंचं पर्यावर्त्तयन्। अत्र यजमानोग्नेरहमुज्जितिमित्येतैर्यथालिंगं सूक्तवाकदेवता अनुमंत्र्योपस्थाय वा स्वनाम ग्रहणका
ले एमा अग्मन्निति सूक्तवाकस्याशीर्युक्तामे सत्याशीर्देवान् गम्यादित्यादि अदद् इति द्विपदस्थानेस्वष्टदेवतानाम गृह्णन् ब्रूयादि
ति। प्राजापत्यानि यजूंषि। अग्नेरहमुज्जितिमनूज्जेषं सोमस्याहमुज्जितिमनूज्जेषं अग्नेरहमुज्जितिमनूज्जेषं। अग्नीषोम
योरहमुज्जितिमनूज्जेषं। इंद्रस्य वैमृधस्याहमुज्जिमनूज्जेषं। इंद्राग्नियोरहमुज्जितिमनूज्जेषं। इंद्रस्याहमुज्जितिमनूज्जेषं॥ राम
महेंद्रस्याहमुज्जितिमनूज्जेषं। देवानामाज्यपानां महमुज्जितिमनूज्जेषं आज्यभागदेवोग्निर्हविः सेविता न्तेनहविजापुष्टो २१
यज्ञविरोधिनोसुरादीनभिभवंनुत्कृष्टजयं प्राप्तवान् तदीयामुज्जितिं यजमानोहं पापादिरूपं वैरिणमभिभवन्नुत्कृष्टजयप्राप्तो
स्मि एवं सर्वत्र योज्यं। प्रजापतिः पुरउष्णिक्। एमा अग्मन्नाशिषो दोहकामा इंद्रवंतो वनामहे धुक्षीमहि प्रजामिषं। इमा आशि

पश्चागच्छन्मांप्रत्यागच्छंतुवयमपिप्रातरादिदोहंकामयतमानाःतत्फलप्रदेनेंद्रेणयुक्तत्वादिद्रवंतइंद्रंवनामहेतेनभजनेनपुत्रपौ
त्रादिरूपांप्रजामिषमिष्यमाणमन्नायुरादिकंधुक्षीमहिकामधेनुसदृशीमिंद्रदेवतांदुह्यास्म।वामदेव्यंयजुः।सामेसत्याशीर्देवा
नाम्यायज्ञोदेवानाच्छत्वदोमआगच्छतु।आयुराशास्तइत्यादियेयमाशीगततयाःअवितथासतिप्रकृतान्देवानाम्यात्प्राप्नोतु
अयमिदमस्मान्प्रार्थयतइतितेषांस्कृतिपथमारोहतुकीदृशाप्रियाप्रियतराकिंचारेउताअनतुसेनमनसाक्रियमाणाप
णपात्पणेनमूल्येनक्रेयमिष्टंवस्तुपणंततोपिपणपतरेयमाशीर्देवानाम्यात्अयंचयज्ञोदेवान्गच्छतुप्राप्नोतुस्त्रदोभिलषितं
फलंमेमदर्थमागच्छतुअग्नीद्गमयेतिसंप्रेष्यतिआग्नीध्रमितिशेषः।विश्वामित्रोयजुः।अग्नीद्गमयहेअग्नेत्वंप्रस्तरमिम
मग्निंसम्यग्गमयत्रिरंजलिनाग्नीध्रोविष्वंचंप्रस्तरमुनुर्ध्वमुद्यौतिरोहितेनत्वाग्निर्देवतांगमयत्वित्येतैःप्रतिमंत्रंस्रविष्वंच
मसर्वतोग्रंप्रस्तरमूर्ध्वमुद्यौति।तयर्योद्यतःसर्वोग्निंगमितस्यात्तयोद्यम्यप्रहरतीत्यर्थः।यदेतैःप्रस्तरप्रहरतीतिस्कृतेःस्व
यंचवक्ष्यतिअग्नीधाप्रस्तरंप्रह्रियमाणमितिअत्रयजमानोरोहितत्वतेनत्वेत्येतैःप्रतिमंत्रमाग्नीधाप्रस्तरंप्रह्रियमाणमनु
मंत्रयेत।प्राजापत्यानियजूंषि।रोहितेनत्वाग्निर्देवतांगमयतु।हरिभ्यांत्वेंद्रोदेवतांगमयतु।एतशेनत्वासूर्योदेवतांगमयतु।रो
हितहयेतेशशब्दाअग्नींद्रसूर्याणामश्वानभिदधते।हेप्रस्तरतैरश्वैरग्न्यादयःत्वांसूक्तवाकोक्तांदेवतांगमयन्तु।अथैनमाहा

ग्नीध्रोनुप्रहरेतिव्यक्तं। विश्वामित्रीयजुः। अनुप्रहर। हेअध्वर्यो त्वयानिहितं तृणं प्रस्तरप्रहरणमनुप्रहर। यत्प्रस्तरात्तृणम
वात्तं तदनुप्रहरति स्वगा तनुभ्य इति। अध्वर्युरिति शेषः। वामदेव्यं यजुः। स्वगा तनुभ्यः यजमानत्वेन संस्कृतस्य प्रस्तरस्य प्रहा
रेण यजमानस्य तनुभ्यः शारीराय स्वगा सुखगमने क्षेमोस्तु। अत्र यजमानः प्रस्तरतृणे प्रह्रीयमाणे दिवः खील इति जपति।
विश्वेदेवा महापंक्तिः। दिवः खीलोवततः पृथिव्या अध्युत्थितः। तेना सहस्रकांडेन द्विषंतं शोचयामसि। द्विषन्मे बहु शोचतो
षधे मो अहं सुचं। हे प्रस्तरतृण त्वं दिवो द्युलोकादवततोवस्तात्प्रसारितः। पृथिव्या अध्युपरि उत्थितः ऊर्ध्वत्वेन स्थापितः।
खिलस्तंभः लोकद्वयधारणहेतुस्तंभोसीत्यर्थः। तेन त्वया सहस्रकांडेन बहुप्रकारेण द्विषंतं शोचयामसि शत्रुं शोकयुक्तं कुर्मः।
स च मे द्विषन् शत्रुर्बहु शोचतु अधिकशोकयुक्तो भवतु। हे ओषधे दर्भ अहं त्वत्प्रसादान्मा मुचं शोकं न प्राप्नुवानि। एतद्देत दित्रि
रंगुल्या निर्दिश्य पत्न्याग्निमभिमंत्र्य। आयुष्पा अग्ने स्यायुर्मे पाहीति। एतदित्यंगुल्या तद्देवतृणं निर्दिश्य दर्शयित्वा। वामदेव्यं। राम
यजुः। एतद्देवतृणं मया प्रहृतमित्यर्थः। प्राजापत्यं यजुः। आयुष्पा अग्नेस्यायुर्मे पाहि चक्षुष्पा अग्नेसि चक्षुर्मे पाहि। प्रस्त २२
रप्रहारेण प्रसक्तापाययोरायुश्चक्षुषोः पालनमाशास्यते हे अग्ने त्वमायुश्चक्षुषोः पालयितासि अतो ममायुश्चक्षुषी पाहि
तथा च ब्राह्मणं यावद्ध्वा अध्वर्युरित्यादि। ध्रुवासीत्यंतर्वेदि पृथिवीमभिमृशति। व्यक्तं। प्राजापत्यं यजुः। ध्रुवासि। हे पृथिवी

त्वं ध्रुवा प्रतिष्ठितासि। अतो मामपि प्रतिष्ठितं कुर्वित्यर्थः। अथैनमाहाग्नीध्रः संवदस्वेति। व्यक्तं। वामदेव्यं यजुः। संवदस्व। हे अध्वर्यो
त्वं मया सह संवदस्व संभाषणं कुरु। अगानग्नीदित्यध्वर्युराह अगन्नित्याग्नीध्रः। अगानग्नीनिति द्वितिप्रश्नः। अगन्निति उत्तरं।
प्राजापत्ये यजुषी। अगानग्नीत्। हे आग्नीध्र प्रस्तरः किमग्निमगात्। सम्यगगत इत्यर्थः। अगन्। हे अध्वर्यो सम्यगग्निमगात्।
श्रावयेत्यध्वर्युः श्रौषडित्याग्नीध्रः। आहेति शेषः। वामदेव्यौ यजुषी। श्रावय। हे आग्नीध्र प्रस्तरः प्रहृत इति देवेषु श्रावय। श्रौषट्।
हे देवाः श्रुतमध्वमं परिधिमन्वारभ्य संप्रेष्यति। स्वगा दैव्या० ब्रूहीति। व्यक्तं। प्राजापत्यं यजुः। स्वगा दैव्या होतृभ्यः स्वस्तिर्मानु
षेभ्यः शंयोर्ब्रूहि। दैव्यानां होतृणां यज्ञस्य स्वगा स्वाधिनो स्तु। मानुषेभ्यो होतृभ्यः स्वस्त्यस्तु। होतस्त्वं शंयुदेवस्य संबंधिनं तच्छंयोराव
णीमह इत्यनुवाकं ब्रूहि। अनूच्यमाने शंयुवाके आहवनीये परिधीन्प्रहरति। अनूच्यमान इति पूर्ववत्। तेन परिधिप्रहरणार्थत्वाच्छंयुवाकः
शंयुवंतवार्हस्पत्यस्मिन्पक्षे परिधिप्रहरणाभावेपि भवति। यं परिधिं पर्यधत्था इति मध्यमं यज्ञस्य पाथ उप समितमितरौ। युगप
दितरयोः प्रहरणं समितमिति लिंगात्। प्रजापति विराड्रूप त्रिष्टुप्। यं परिधिं पर्यधत्था अग्ने० नयातै। अग्ने देवसुष्टे त्रिभिः प्राप्य
माणाः स्वयं मध्यमपरिधिं पश्चिमभागे स्थापितवानसि। तवानुकूलतया प्रियतमेतं परिधिं त्वयिं भरामि एष त्वत्तोपरक्तो नेत्वय
ज्ञः। यज्ञस्य पाथ उप समितं। हे दक्षिणोत्तरपरिधि यज्ञस्य पाथः फलरूपमन्नं युवामुपसमितं प्राप्नुतं। उत्तरार्धस्याग्रमंगारे

षुपोहति। उत्तरपरिध्यग्रमंगारेषुपोहति। उपसमुपोहन्ति अत्र यजमानो षिते मूर्चामितेपरिधिषु प्रह्रीयमाणेषु विष्णोः शंयो रिति यज्ञनमस्त
इति च शंयुवाके नूच्यमाने जपति। प्रजापतिस्त्रिष्टुप्। वितेमुञ्चामिरशनाविरश्मीन्वियोक्त्रायापरिवर्तनानि धत्तादस्मासु द्रविणं यच्च
भद्रं प्रणो ब्रूतात् भागधा देवतासु। लोके आरुरुक्षुः आरोहणीयमश्वरशनादिभिः सर्वतो बध्नंति। तत्र वारना शब्देन पल्ययदादार्घा
या श्वोदरे च बध्यमानतन्तुमयी चर्ममयी वा कक्ष्याभिधीयते। विरश्मिशब्देनाश्वमुखे संलग्नो हस्तेनाश्वनीयमानाश्वो रज्जुविशेष
उच्यते। योक्त्रशब्देनाश्वस्कंधे न बद्धं समुपमुक्तो रज्जुविशेषः। पल्ययस्य पुरतः पृष्ठतश्चावसरण चारयितुमुरः पुच्छाधो वंधनो
पयुक्ताः रज्जुविशेषाः परिवर्तनशब्देनोच्यते। अश्ववदश्वरशनादिस्थानीयाः परिधयः हे अग्ने नवबंधन— तून्। परिधिरूपा
न् रशनादीन् विमुञ्चेन तद्विमोकेन संतुष्टाः त्वमस्मासु द्रविणं धेहि यच्चान्यत् भद्रमन्नपानादिकं तदप्यस्मासु धेहि अस्मदीयह
विष्षु भागधान् हविः प्रदानस्मान् प्रकर्षेण ब्रूहि। यजुः विष्णोः शंयोरहं देवयज्यया यज्ञेन प्रतिष्ठां गमेयं। शंयुशब्दः सुखमिश्रं बृहस्प राम
तिपुत्रं ब्रूते। आनः बहु कार्येषु व्याप्नुवन् विष्णुरित्युच्यते। तस्य परितो हेतुत्वात् परिधिप्रहरणं तदीयो देवयज्या तया यजमानो हं कृत्स्न २३
यज्ञेन निष्पन्नां प्रतिष्ठा फलं गमेयं प्राप्नुयां। विश्वेदेवा अतिधृतिः। यज्ञ नमस्ते यज्ञ नमो नमश्च ते यज्ञ शिवेन मे संतिष्ठस्व स्योनेन
मे संतिष्ठस्व सुभूतेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व स्योनेन मे संतिष्ठस्व यज्ञस्यर्धिमनु संतिष्ठस्वोपते यज्ञ नम उपते नमः। हे

23

यज्ञशस्युपाशारूपयज्ञागतेनमोस्तु। किंवयज्ञतेनमोनमः पुनःपुनर्नमस्कारोस्तु आदरातिशयद्योतनार्थमेवमभिधानं हेयज्ञ
मेशिवेसर्वोपद्रवशमनरूपेणसंतिष्ठस्वसमाप्तिंगच्छतथास्योनेनसुखप्राप्तिरूपेणसुभूतेनसृष्टुनिष्पन्नताकारेणब्रह्मवर्च
सेनमंत्रबलेनचसंतिष्ठस्वतथायज्ञस्ययजमानस्यद्विफलमनुलक्ष्मीकृत्यसंतिष्ठस्वहेयज्ञतेतवउपसमीपेनमोस्तु। त्रिर
भिधानमत्वादरार्थं। यजमानंप्रपतेतिपरिधीनभिमंत्र्यजुह्वामुपभृतोग्रमवधायसंस्रावभागाइतिसंस्रावेणाभिजुहोति।
संस्रावहोमःपरिध्यंगः तदभिहोमत्वात्प्रहृत्यपरिधिंजुहोतीतिवाजसनेयब्राह्मणस्यपरिधीन्प्रहृत्यसंस्रावांतंकृत्वेतिव्याकरणा
च्चअतोसौननिवर्तते। प्रायणीयायां। चातुर्मास्येषुवैश्वदेवपर्वणिपरिधीन्प्रहृत्यसंस्रावांतंकृत्वेतिप्रत्यगुपादानात्। अंगमिति
केचित्। वामदेव्यंयजुः। यजमानंप्रपत। हेपरिधयः प्रहृतायूयंयजमानंप्रपतवर्द्धयत। प्रजापतिस्त्रिष्टुप्। संस्रावभागास्थे
षांबृहंतः प्रस्तरेष्ठाबर्हिषदश्चदेवाइमांवाचमभिविश्वेगृणंतआसद्यास्मिन्बर्हिषिमादयध्वं। हेविश्वेदेवायूयंसंस्रावभागास्थ
जुहूपभृद्भ्यांशिष्यमानआज्यशेषः संस्रावः सएवभागोयेषांतेसंस्रावभागाः। कीदृशादेवाः तंभागंलब्ध्वा इषावंतः बृहंतोमहां
तःसर्वैराराधनीयाः केचित्। प्रस्तरमुष्टौतिष्ठंतिअन्येत्वास्तीर्णेबर्हिषिसीदंतिअस्माभिः क्रियमाणामिमांस्तुतिमभिलक्ष्यस
मीचीनेयमितिगृणंतोयूयमस्मिन्यज्ञउपविश्यहृष्टाभवत। अत्रयजमानइष्टोयज्ञइतिसंस्रावंहुतमनुमंत्रयते। वामदेवप्रस्ता

रपंक्तिः। इष्टोयज्ञो भृगुभिर्द्रविणोदा यतिभिराशीर्दा वसुभिराशीर्वाꣳ अथर्वभिः तस्यमेष्टस्यवीतस्यद्रविणेहागमेः। अयंयज्ञः पुरा।
भृगुभिरिष्टः तथाद्रविणोदा धनदाता सन्यतिभिः निगृहीतेंद्रियैरिष्टः आशीर्दा अभिलषितफलप्रदः सन्वसुभिरिष्टस्तथा आ
शीर्वान्भूत्वा अथर्वभिऋषिभिरिष्टः एवंभृग्वादिभिरिष्टस्य वस्वादिभिर्वीतस्य प्राप्तस्यानुभूतफलस्य तस्ययज्ञस्य द्रविणाध
२४ नानिफलभूतानि रहास्मिन्नकर्मणि मा प्रति आगमेरागच्छंतु। अत्रैवर्त्तिजाहविःशेषान्भक्षयंतिनातः पुरस्तात्। अधस्ता
द्वा। अत्रप्रयोगः। संमार्गोनुमंत्रणानंतरं यजमाने। महाहविर्होतेति। सप्तहोतास्मुक्तवत्तिनवाध्वर्युरौपभृतमाज्यंजुह्वामानी
यजुहूपभृतावादाय दक्षिणातिक्रम्याश्राव्यप्रत्याश्रावितेदेवान्यजेति संप्रेष्यति होत्रादेवंबर्हिरित्युक्त्वा यथापूर्ववषट्क्रि
यमाणेग्नेणाघारसंभेदं समित्सूर्वार्द्धेहुत्वा होत्रायागोजइति वषट्कारेनुमंत्रिते। यजमानेनाग्नयेनममेत्युक्त्वा बर्हिषोहमि
तिहुतेनुमंत्रिते आश्राव्यप्रत्याश्रावितेयजेति संप्रेष्यहोत्रादेवानराशंसइत्युक्त्वा वषट्क्रियमाणेग्नेणाघारसंभेदंसमि राम
न्मध्येहुत्वा होत्रावषट्कारेणमंत्रितेयजमानेनाग्नयइदंनममेत्युक्त्वा नराशꣳसस्याहमितिहुतेनुमंत्रितेपूर्ववदाश्रुत्यप्र। २४
त्याश्रुतेप्रहोत्रादेवा अग्निःस्विष्टकृत्ं नमोवाकेवीहीत्युक्त्वा वषट्क्रियमाणेग्नेणाघारसंभेदं प्रतिपद्यप्राचंपूर्वहुतेत्तरावनु
संभिद्यहुत्वा वषट्कृतानुमंत्रणेयजमानेनाग्नयइदंनममेत्युक्त्वाग्नेः स्विष्टकृतोहमितिहुतेनुमंत्रितेप्रागनुक्तिश्चेदत्राह। महा

हविर्होतेतिसप्तहोतर्युक्तेप्रत्याक्रम्यायनेस्कचौसादयित्वावाज्यस्यमाप्रस्तवेनेतिदक्षिणेनहस्तेनोत्तानेनसाप्रस्तरांजुहूमुद्यम्यअथा
सपत्नानितिसव्येनोपभृतंनियम्यपुनरुद्राभचेतिदक्षिणेनकेवलांजुहूमुद्यम्यनिधायदक्षिणेनैवनिग्राभंचेत्युपभृतंनियम्य
वह्नदेवाग्नवीवृधंनितिप्राचींजुहूंप्रोस्य अथासपत्नानितिसव्येनोपभृतं।प्रतीचींबर्हिर्वेदिंनिरसित्वा अपउपस्पृश्येत्येवं।
वाजवतीभ्यांव्यूह्यसहयजमानेनवाजवत्यौजपित्वोपभृतंप्रोक्ष्यास्रुचावुदाहृत्यजुहाज्यलेपेनवसुभ्यस्त्वेतिमध्यमंरुद्रेभ्यस्त्वेतिद
क्षिणमादित्येभ्यस्त्वेत्युत्तरमितिपरिधीन्यजमानेनवसून्देवानितिरुद्रान्देवानित्यान्देवानितियथायोगमनुमंत्र्यमाणामन
क्तावर्हिःप्रस्तराद्वेघांजुहूंसादयित्वासंजानाथां।वृत्यावतामितिविधृतीभ्यांसहप्रस्तरमपादायबर्हिषतिधृती अपिसृज्यस
व्येनप्रस्तरंगृहीत्वादक्षिणेनअक्तंरिहाणाइतिजुह्वामग्रंप्रजायोनिमित्युपभृतिमध्यं आप्यायंतामितिध्रुवायांमूलंएवंत्रिः।
यद्वादिव्यंस्त्वेतिजुह्वामग्रंमंतरिक्षेस्त्वेत्युपभृतिमध्यंपृथिव्यामंस्त्वेतिध्रुवायांमूलंमित्येवंत्रिः।यद्वापृथिव्यैत्वेतिध्रुवायांमू
लंअंतरिक्षायत्वेत्युपभृतिमध्यंदिवेतिजुह्वामग्रंइत्येवंत्रिवारं।यजमानेनसमंक्तामितिसकृदनुमंत्र्यमाणमंक्ताःयुषेत्वे।
त्यक्तस्यतृणमपादायप्रज्ञातंनिधायदक्षिणोत्तराभ्यांपाणिभ्यांप्रस्तरंगृहीत्वाजुह्वांप्रतिष्ठाप्यासीनआश्राव्यप्रत्याश्रावि
तेइषितादैव्याहोतारइतिसंप्रेष्यहोतेदंद्यावापृथिवीइतिप्रतिपद्यवागसीतिस्तामितिकृत्वाविदित्यवसायाग्निरिदंहविर।

जुषतावीवृधतमहोज्यायोकृतेत्यवसायसोममित्याद्यकृतेत्यवसायाग्निरिदमित्याद्यकृतेत्यवसायपौर्णमास्यामुपांशुविष्णुरि
ति।अग्नीषोमावितिप्राजापतिरितिवायथायोगमुक्त्वैद्वैरिदमित्यादि।अग्नीषोमौजुषेतामवीवृधेतामक्रातामितिविकृत्यो
क्त्वावसायसोमयाजिनोप्यग्नीषोमाविदमित्यादिपूर्ववदुक्त्वावसायानुनिर्वाप्यवत्इंद्रोवैमृधइत्याद्यकृतेत्यवसायामावा
स्यायामाग्नेयानंतरंअसन्नयतइंद्राग्नीइदमित्यग्नीषोमीयवदुक्त्वावसायसन्नयतइंद्रयाजिनइंद्रइदमितिमहेंद्रया।
जिनोमहेंद्रइदमित्यकृतेत्युक्त्वावसायदेवाआज्यपाइत्याद्यकृतेत्यवसायाग्निर्होत्रेणेत्यकृतेत्यवसायास्यामृधेत्यादि।
यजमानइतियज्ञशर्मेतिकृत्तिकइतिमानुषइतिमस्यदंनमोदेवेभ्यइत्यंतेनूच्यमानेनाग्नेरहमुज्जितिमित्येतैर्यथालिंग
सूक्तवाकदेवतानुमंत्रणेस्वनामग्रहणकालेएमाअगमनित्यायुराशास्तेइत्याशिःषुसामेसत्याशीर्देवान्नित्यादिअदइ
तिपदस्थानेस्वेष्टनामगृह्णातोच्यमानेमरुतांपृषतयइतिअस्वाहाकुर्वंसपवित्रयावासहशाखयाप्रस्तरंविधूननाव राम
धूननानिक्षेपप्रमार्जनप्रतिमार्जनानुमार्जनोदशकृत्वांगारमध्येनान्यग्रत्वंपुरस्तात्प्रक्षेपणपाणान्यकुर्वन्दक्षिणहस्तेनो २५
त्तानेनोदगग्रंसांगुलिमुष्टिनाधृत्वाकर्षनिवंशनैःशनैराहवनीयेप्राचप्रहरन्नायुराशास्तइतिहोतुराशीर्वचनकालेहस्तदक्षि
णाप्रसार्यप्रस्तरस्योपरिन्यंचंपर्यावर्त्तयन्प्रस्तरंविसृज्याग्नीद्मयोत्यागीधंसंप्रेष्याग्नीध्रेणांजलिनाप्रस्तरंगृहीत्योर्ध्व

मुष्यम्परोहितेनत्वेत्यादिभिस्त्रिभिः प्रतिमंत्रंमेतैरेवयजमानेनुमंत्रणंकुर्वाणेप्रहृत्यानुप्रहरेत्युक्तेप्रस्तरादपात्तंतृणंस्वगातनुभ्यइति
यजमानेनदिवःखीलइतिजप्यमानेप्रहृत्यैतदेतदिति त्रिरंगुल्यानिर्दिश्यायुष्याअग्नइत्यमभिमंत्र्यध्रुवासीत्यंतर्वेदिपृथिवी
मभिमृश्याग्नीध्रेणसंवदस्वेत्युक्ताग्नानग्नीदित्युक्ताग्नीध्रेणागन्नित्युक्तेश्रावयेत्युक्ताग्नीध्रेणश्रौषडित्युक्तेमध्यमंपरि
धिमन्वारभस्वगांदैव्याहोतृभ्यइतिहोतारंसंप्रेष्यहोत्रातच्छंयोरित्युक्तेस्वस्त्येनमानुषेभ्यइत्यर्द्धेचैवस्पतोच्यमानेयजमानेन
वितेमुंचामीतिविष्णोःशंयोरितियज्ञनमस्तइतिजप्यमानेयंपरिधिंमितिमध्यमंपरिधिंयज्ञस्यपाथउपसमितमितीतरौ
प्रहृत्ययजमानंप्रपद्यतेतिपरिधीनभिमंत्र्यजुहासुपभृतौयमवधायसंस्रावभागाइतिसंस्रावेणाभिजुहोतिअथयज
मानेनविश्वेभ्योदेवेभ्यइदंनममेत्युक्तेष्टोयज्ञइत्यनुमंत्रितेअत्विजोहविःशेषान्भक्षयितावामंतियाजुर्वेदिकेवयंविशेषःभू
र्भुवःसुवर्देवंबर्हिर्भूर्भुवःसुवर्देवोनराशंसः।भूर्भुवःसुवर्देवोअग्निस्विष्टकृत्वषडित्यादियथापूर्ववषट्कारप्राणापाननिमेषां
वषट्कारमाप्रागितिवावषट्कारेतिवाजपः यज्ञशर्मेत्यादिव्यावहारिकमेवनामसर्वमन्यत्समानं।शेषभक्षानंतरोक्तिमंत्रव्या
ख्यासुगंधिभिः।सूक्तिप्रसूनैःपुष्णातुपुमर्थान्पुरुषोत्तमः।। ।।इत्यापस्तंबीयाध्वरतंत्रस्वतंत्रव्याख्यायांप्रयोगरत्नमालायां
तृतीयप्रश्नेद्वितीयःपटलः।। ।।कर्मब्रह्माध्वनीनस्यमंत्रिभूपतिभूपतेः।व्याचष्टेचौंडपाचार्यःपत्नीसंयाजनादिकं।आज्यले

पानूप्रक्षाल्यसस्रुवेजुहूपभृतावध्वर्युरादत्तेवेदंहोतास्त्वयमाज्यस्थालीमुदकमुंडलुंचाग्नीध्रः।व्यक्तं।आग्नीध्रप्रपयाः पत्नीःसं
याजयिष्यंतः प्रत्यंचोयंति।पत्नीः संयाजइष्यतः तान्यपात्रतः पिष्ट्यायामपत्नीसंयाजायांनगच्छंतिगच्छत्येवाध्वर्युः कर्मांत्त।
रार्थं।अग्रेणगार्हपत्यंदक्षिणेनाध्वर्युः प्रतिपद्यतेउत्तरेणेतरौ।प्रतिपद्यतेगच्छति।अग्नेर्वामपन्नगृहस्यसदसिसादयामी
26 तिक्रस्तभ्यांस्रुचौसादयित्वाधुरिधुर्यौपातमितियुगधुरोः प्रोहति।कंशाकटनद्यतस्तंभ्यतेसाकस्तंभी।पश्चाद्दौतुस्रुग्बहुत्वे
वासुम्निनीः घृतपातमित्येतेषांबहुवदूहः धुरिधुर्यादित्यस्यदंपत्यमिधानात्।तथाचब्राह्मणंधुरिधुर्यौपातमित्याहजा।
यापत्योर्गोपीथायेतिमंत्रवर्णाश्चभवति।यज्ञस्ययुक्तौयौधुवभूतामिति।प्राजापत्येयजुषी।अग्नेर्वामपन्नगृहस्यसदसि
सादयामिसुम्नायसुम्निनीसुम्नेमाधत्तं।हेजुहूपभृतौयुवामपिनश्वरगृहस्यपत्यभिमानिनौवह्नौस्थानेशाकटरूपेयजमा
नस्यसुखायस्थापयामि।हेसुखवस्त्यौशुष्वेमांस्थापयतं।धुरिधुर्यौपातं।हेजुहूपभृतौयुवांयज्ञभारवाहिनामेतौदंपतीरक्ष राम
तं।यदिपात्न्यानिर्वपेदेताभ्यांयजुर्भ्यांस्रुवेस्रुचौसादयेत्।यदिपात्रितोनिर्वापः तदाद्याभ्यांयजुर्भ्यांस्रुवेस्रुचौसादयेत्। २६
यदापिस्रुवाभ्यांपत्नीः संयाजयिष्यंतितदापिनियतंस्रुचोर्नयनंसादनंचनित्यवद्विधानात्।अतएवापत्नीसंयाजार्थत्व
मप्यनयोः सूचितंभवति।तेनपिष्ट्यायामपिक्रियते।स्रुग्भ्यांस्रुवाभ्यांवापत्नीः संयाजयंति।ताभ्यामेवस्रुग्भ्यांयजती

स्येकः कल्पः। तत्स्थानीयाभ्यामागंतुकाभ्यां स्रुवाभ्यामित्यपरः। ग्रहणार्थस्तु स्रुवः सर्वत्र नित्यः तत्र जुहूस्थानीयः स्रुवः पृथुबि-
लः सामर्थ्यात्। वेदमुपभृतं कृत्वा जुह्वा स्रुवेण चेत्येके। स्रुवेणेति ग्रहणार्थस्यैव स्रुवस्यानुवादः। वेदमुपभृतस्थाने कृत्वा यथापू-
र्वं जुह्वा स्रुवेण चेत्यर्थः। स्रुवोपि कश्चिदागंतुको जुह्वामुपधार्य तद्इत्यन्ये। अपरेण गार्हपत्यमूर्ध्वज्ञव आसीना ध्वानेनोपां-
शुवा पत्नीः संयाजयंति दक्षिणोध्वर्युरुत्तर आग्नीध्रो मध्ये होता। यतः स्वरव्यंजनयोः पृथगुपलब्धिः स ध्वनिर्ध्वानः
मुखप्रयत्नवानभिव्यक्तशब्दप्रयोग उपांशु। अनयोः प्रकृष्टेन शेष इति कृष्टस्वरापादानार्थं वचनं। पत्नीरिति वक्ष्यमाणा देव
ताः समाचष्टे देवपत्नीः संबंधात्। आज्येन सोमत्वष्टारा विष्णुं जाघन्या पत्नीः संयाजयंत्याज्येन वा यथागृहीतेन। यज्ञिय
स्य पशोर्जाघन्या पुच्छेन लौकिकेन देवानां पत्नीः संयाजयंति। अत्र पत्नीशब्दो मुख्यार्थः। सोमत्वष्ट्रोरुपरिष्कृतत्वात्। तेन तृ
तीय एव यागो जाघन्या अन्ये ततः पत्नीः संयाजयंतीति पशौ तृतीयचतुर्थयोर्जाघनी विधानात्। अत्राप्याज्येन सोमत्व-
ष्टाराविष्टे तिद्वयोरेव विशेषविधानात्। जाघन्यैवान्ययोर्द्वयोरिति। अत्र जाघन्या एवं चतुरवत्तं उपस्तरणाभिधारणविधाना
भावात्। प्रधानविकाराभावाच्च। आज्यस्यैव वा। यथागृहीतेन यथापायस्य ग्रहणमुक्तं। तथा चतुरवत्तेन पंचावत्तेन वेत्यर्थः। सो
मायानुब्रूहि सोमं यजेति संप्रैषो उत्तरार्द्धे जुहोति व्याख्यातं प्राक्। एवमितरास्त्वष्टारं देवानां पत्नीरग्निं गृहपतिमिति। एतान

प्येवंयाज्यानुवाक्याप्रैषेरुत्तरार्द्धेजुहोतीत्यर्थः। दक्षिणतस्त्वष्टारमुत्तरतो वामध्येग्निंगृहपतिं। दक्षिणतः सोमस्योत्तरातोवात्वष्टारंयज
रुत्तरार्द्धएवतयोर्मध्येग्निंगृहपतिमित्यर्थः। अग्नेरवायंदक्षिणइत्यादिरपरः पक्षः। उत्तरार्द्धैकत्वेन विकल्पइतिकेचित्। आहवनी
यतः परिश्रितेदेवपत्नारपरिश्रितेवायथाहवनीयोनदृश्यतेतथापरिश्रितेछादितेगार्हपत्यइत्यर्थः। राकांपुत्रकामोयजेत।
सिनीवालींपशुकामः कुहूंपुष्टिकामः नामीपत्नीसंयाजाः किंतुतत्कालभावीनिकाम्यानियागान्तराणिकुतः पूर्वतः सोमा
27 दीनांपरिगणनाच्चत्वारः पत्नीसंयाजाइतिश्रुतेश्च। तेनैषांनोत्तरार्द्धादिनियमः। नित्यवदेकेसमामनंतिनित्यवद्यथानित्यं
तथाकामोपबंधरहितमित्यर्थः। नित्यपक्षेविकृतावपिगच्छंतिपुरस्ताद्देवपत्नीभ्यएतामेकेसमामनंत्यपरिष्टाद्वा। द्वावेतौ।
यागकालौराकादीनामुभयथाप्याम्नानात्। अत्राश्वलायनः। वेदमस्मैप्रयच्छत्यध्वर्युस्तंगृह्णीयाद्वेदोसिवेदोविदेवेत्य
दायुषेत्येतेनोत्थायपश्चाद्गार्हपत्यस्यप्रत्यङ्मुपविश्यसोमंत्वष्टारंदेवानांपत्नीरग्निंगृहपतिमित्याज्येनयजंत्याप्यायस्वसमे राम
तुतेसंतेपयांसिसमुयंतुवाजाइहत्वष्टारमग्नियंतंन्नस्तुरीपमधपोषयित्न्वदेवानांपत्नीरुशतीरवंतुनइतिद्वेअग्नि। २७
र्होतागृहपतिःसराजाहव्यवाळग्निरजरःपितानइतिपत्नीसंयाजाः। अथप्रजाकामोराकांसिनीवालींकुहूमितिप्राग्गृह
पतेर्यजितराकामहंसिनीवालींकुहूमितिद्वेद्वेयाज्यानुवाक्येकुहूमहंसुवृतं०दधातिविति। अयमर्थः। अध्वर्युणादत्तंवेदंवेदासी

तिगृहीत्वाउदायुषेत्युक्तस्यायगार्हपत्यस्यपश्चाद्भागेऽग्नेर्दर्भासनेउपविश्यप्रयाणं प्रैषं आश्राव्य स्वेत्यादिपुरोनुवाक्यायाज्याभ्यां सो
मादीश्चतुरः पत्नीसंयाजान्यजति प्रजाकामस्य तु कामहमित्यादिभिः पुरोनुवाक्यायाज्याभिः प्राग्गृहपतेराकादीत्तिस्रोदेवतायजतीति।
वामदेव्यंयजुः। वेदोसिवेदोविदेय। हेवेद त्वंवेदइष्टस्यलंभयिता सि त्वदुपादानेनाहंवेदोधनंविदेयंलभेयं। उदायुषेति व्याख्यातं। गो
तमोगायत्री। आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यं। भवावाजस्यसंगथे। हेसोमत्वमाप्यायस्वसर्वतोवर्द्धस्वतेतवऋष्ण्यंवीर्यं
विश्वतः समेतुसर्वतः संगच्छतां त्वमपिवाजस्यान्नस्यसंगथेसंगमनेनिमित्तभव। त्रिष्टुप्। संतेपयांसिसमुयंतुवाजाः संवृष्ण्यान्यभि
मातिषाहः। आप्यायमानोअमृतायसोमदिविश्रवांस्युत्तमानिधिष्व। हेसोमतेतवपयांसिरसाः समुयंतुसंगच्छंतुवाजान्नानिसु
मुयंतुसंगच्छंत्वेवत्पवृष्ण्यानिवीर्याणिसंगच्छंतुत्वंतानिमातिषाहः अभिमातिंपापंसहते अभिभवतीत्यभिमातिषाहः। आप्याय
मानोवर्द्धमानः अमृताययजमानस्यामृतरूपत्वायदिविद्युलोकेउत्तमानिश्रवांसियशांसिधिष्वधेहि। मेधातिथिर्गायत्री।
इहत्वष्टारमग्नियंविश्वरूपमुपह्वये अस्माकमस्तुकेवलः। इहास्मिन्कर्मणित्वष्टारंदेवंउपह्वये आह्वयामि कीदृशमग्र्यमुख्यं
विश्वरूपंविश्वानिरूपाणिगर्भेविकर्तुयोग्यानियस्यासौविश्वरूपः। तंसचत्वष्टास्माकंकेवलोस्तु। असाधारणत्वेनपालकोस्तु।
दीर्घतमास्त्रिष्टुप्। तन्नस्तुरीयमथपोषयित्नुदेवत्वष्टर्विरराणस्यस्व। यतोवीरः कर्मण्यः सुदक्षोयुक्तग्रावाजायतेदेवकामः हे

त्वष्टर्देव तद्धनं नोस्मभ्यं विशेषेणास्य स्वसमीरय। कीदृशं तुरीतूपूर्णं प्राप्नोतीति तुरीयं अथापि च पोषयितृत्वं चिरराणादानशीलयतोय

स्माद्धनास्माभिर्लभ्या वीरः शूरः पुत्रो जायते कीदृशं तं छरत्वमिति तदुच्यते कर्मण्यः लौकिके वैदिके च कर्मणि कुशलः सुदक्षः सम्यगु

28 त्साहि शीघ्रकारीत्यर्थः। युक्तग्रावा सोमाभिषवार्थे प्रयुक्ता ग्रावाणो यस्य सो युक्तग्रावा सर्वदा सोमयागानुष्ठानेत्यर्थः। देवकाम

ईदृशः सेवकोस्माकं भूयादिति देवैकाम्यमानः देवान्वा सेवितुं स्वयं कामयते। प्रतिक्षत्ता जगती। देवानां पत्नी रुशतीरवंतु नः प्रावं

तु नस्तुजये वाजसातये। याः पार्थिवासो या अपामपि व्रते तानो देवीः सुहवाः शर्म यच्छतु। इंद्राण्यादयो देवानां पत्न्यो याः संति

ताः उशतीरस्मद्धितं कामयमानाः अस्मान्नवंतु रक्षंतु। परैरापादितमनिष्टं निवारयं त्वित्यर्थः। किंच तुजये अपत्याय वाजसात

ये द्रव्यलाभाय नोस्मान्प्रकर्षेण रक्षंतु। न केवलं दिवि स्थित इंद्राण्यादयः किंतु याः पार्थिवासः पृथिव्यां स्थिता देवपत्न्यो या अप्यन्या

अपां व्रते श्रीत्युदकस्थानत्वेनोपलक्षितेंतरिक्षे वर्तंते। तादेव्यः सुहवाः सुखेनाह्वातुं शक्याः याः यन्नोस्मभ्यं शर्म सुखं प्रयच्छतु। वि राम

राट्स्थाना त्रिष्टुप्। उत ग्ना व्यंतु देवपत्नीरिंद्राण्यग्नाय्यश्विनी राट्। आ रोदसी वरुणानी शृणोतु व्यंतु देवीर्य ऋतुर्जनीनां। अपि २८

च ग्नाः छंदो देवता गायत्र्यादयो देवपत्न्यो वीयंतु इदं हविः अश्नंतु। ग्नाशब्दस्य छंदोवाचित्वं पंचमकांडे समाम्नातं। ग्नास्त्वेत्वा हृच्छं

दांऽसि वै ग्ना इति इंद्रस्य पत्नी इंद्राणी अग्नेः पत्न्याग्नायी अश्विनोपत्नी अश्विमानी राज्ञसोमस्य पत्नी राट्। रुद्रस्य पत्नी रोद

सी।वरुणस्यपत्नीवरुणानी एतासामेकैकां विवक्षातुं वस्मदीयामाशृणोतु जनन्यामिंद्राण्यादीनां यज्ञतुः कालविशेषो भोजनायोचितः
तस्मिन्काले तां देव्यो विवियंतु अश्नंतु।सोमस्त्वष्टा पुरुरूपयोः भक्तवतोः प्रश्नात् भुंजातामित्यर्थः।भरद्वाजस्त्रिष्टुप्।अग्निर्होता गृहप
तिः सराजा विश्वावेद जनिमाजातवेदाः।देवानामुत यो मर्त्यानां यजिष्ठः सप्रयजतामृतावा।अयमग्निर्देवानामाह्वाता गृहाणां पाल
कः।सचराजादीयमानः।तादृशो जातवेदाः देवानां विश्वाजनिमा सर्वाणि जन्मानि वेद अपिच यो जातवेदाः।मर्त्यानां जन्मानि वेद सजा
तवेदाः प्रयजतां प्रकर्षेण यागं कुर्वतां मध्ये यजिष्ठोतिशयेन यष्टृतमः।ऋतावा सत्यवान्।वसुश्रुतस्त्रिष्टुप्।हव्यवाळग्निरजरः पि
तानो विभुर्विभावा सुदृशीको अस्मे।सुगार्हपत्याः समिषो दिदीह्यस्मद्र्यक्सं मिमीहि श्रवांसि।हे अग्ने हव्यवाट् हविषां वोढा अ
ग्निरग्रगामी अजरो जरारहितो नोस्माकं पिता पालयिता विभुः सर्वतो विभावादीप्तिमान् सुदृशीकः सुखदर्शनः सुगार्हपत्याः शो
भनगृहपतित्वयुक्तस्त्वमस्मभ्यं इषोन्नानि संदिदीहि एकीकृत्य देहि तथास्मद्र्यग् अस्मदभिमुखः श्रवांसि यशांसि संमिमीहि सं
म्यगक्संपादय।गृत्समदो जगती।राकामहं सुहवां सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना।सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वी
रं शतदायमुक्थ्यं।एका पौर्णमासीति स्मृतत्वात्।पौर्णमास्यभिमानिनी देवता राकाशब्देनोच्यते।सुष्टुती शोभनस्तुतिमानहं सुह
वां शोभनाह्वानां राकां देवीं हुवे आह्वयामि सा च सुभगा सौभाग्यवती नोस्माकं स्तुतिं शृणोतु स्मृत्वा चात्मना बोधतु अवबुध्यतां।बुध्वा

चअच्छिद्यमानया। अविच्छिन्नया सूच्या सूचीस्थानीयया प्रीत्या अप आप्रत्यानूकामानुस्मभ्यंसेव्यतु संपादयतु किं च शत्तदायमनेक
दायभाजं उव – स्तोतव्यं वीरं पुत्रं ददातु। यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि। ताभिर्नो अद्य सुमना उपागहि।
सहस्रपोषं सुभगे रराणा। हे राके तव याः सुमतयः शोभनबुद्धयः सुपेशसः शोभनरूपाणि च संति याभिर्बुद्धिभिः रूपैश्च दाशुषे ह-
विर्दत्तवते यजमानाय वसूनि ददाति। हे सुभगे सुमनाः सौमनस्यवती त्वं ताभिः सुमत्यादिभिः सहस्रपोषं सहस्रगुणितां पुष्टिं रराणा
दधाना नो अस्मानुपागहि आगच्छ। अनुष्टुप्। सिनीवालि पृथुष्टुके या देवानामसि स्वसा। जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः॥
अमावास्या सिनीवाली तिथ्यन्तत्वादमावास्या तिथ्याभिमानिनी देवता सिनीवाली या त्वं देवानां स्वसासि भगिनी वहितकारिण्यसि
दर्शेष्टिसाधनत्वात्। स्तुकं स्तोत्रं पृथ्वे विस्मृतं स्तुकं यस्याः सा पृथुष्टुका। तस्याः संबोधनं पृथुष्टुके। अनेन सिनीवाली विशेष्यते।
सा त्वं आहुतमस्माभिः समर्पितं हविः जुषस्व। हे देवि नो अस्मभ्यं प्रजादि दिदिड्ढि उपचिनो अनुप्रभूतां कुर्वित्यर्थः। या सुबाहुः स्वंगुरिः सुषू राम
मा बहुसूवरी। तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन। शोभनौ बाहू यस्याः सा सुबाहुः शोभनांगुलयो यस्याः सा स्वंगुलिः। सुषू २९
मा सुष्ठु प्रसवी बहुसूवरी बह्वीनां प्रजानां सवित्री ईदृशी या सिनीवाली तस्यै विश्पत्न्यै विशां पालयित्र्यै सिनीवाल्यै हविर्जुहोतन॥
हे ऋत्विग्यजमाना जुहुत। वामदेव्य त्रिष्टुप्। कुहूमहं सुवृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि। सा नो ददातु श्रवणं पितॄणां त

स्यैतेदेविहविषा विधेम।कुहूरमावास्येतिग्रू तेरमावास्याभिमानिनीदेवताकुहुः अहमस्मिन्प्रकृतेयज्ञेसुवृत्तंशोभनक्रियांविज्ञनापसं
विदितक्रियांसुहवांसुखेनाह्वातव्यांकुहुंजोहवीमियजामि।सकहूः पितॄणामस्मत्पूर्वेषांश्रवणंकीर्त्तिनोस्मभ्यंददातुहेदेवितस्यैतुभ्यं
हविषाविधेम।हविर्दद्महे।कुहूर्देवानाममृतस्यपत्नीहव्यानोअस्यहविषःशृणोतु।संदाशुषेकिरतुभूरिवामंरायस्पोषंयजमानेद
धातु।देवानांपत्नीपत्नीवद्धितकारिणीअमृतस्यामृतरूपस्यनोस्मत्तंवंधिनोस्यहविषोहव्याहविर्भागयोग्या।कुहूरिदंवक्ष्यमा
णंशृणोतुदाशुषेहविर्दत्तवतेभूरिबहुलंवाममुत्कृष्टंवस्तुसंकिरतुसंप्रयच्छतुयजमानेचधनपुष्टिंददातु।अत्रबोधायनःवयमु
त्वागृहपतेजनानामित्यग्नेगृहपतेयाज्यामाह।प्रजापतिस्त्रिष्टुप्।वयमुत्वागृहपतेजनानामग्नेअकर्मसमिधावृहंतं।अस्थूरि
णोगार्हपत्यानिसंतुतिग्मेननस्तेजसासंशिशाधि।हेगृहपतेजनानांमध्येवयमेवत्वांसमिधासंदीपनेनवृहंतंकर्मप्रौढंकृतवंतस्त
स्माद्गार्हपत्यानिगृहपतिनासंयुक्तानिकर्माणिनोस्माकंअस्थूरिसंतुअश्लिष्टानिभवंतुतिग्मेनतीक्ष्णेनवैरिभिरप्रधृष्येनतेजसा
त्वमस्मान्संशिशाधितीक्ष्णीकुरुनिर्भयान्कुर्वित्यर्थः।अत्रयजमानः।सोमायेदंनममेत्यादिपूर्वकंसोमस्वाहमित्यादिभिस्त्रिभी
राकामहमित्यादिभिश्चयथायोगंहुतंहुतमनुमंत्रयते।पत्नीचराकायाहमित्यादिभिराकादीजनुमंत्रयते।उद्दिष्टेत्यागानिगदव्या
ख्याताः।प्राजापत्यानियजूंषि।सोमस्याहंदेवयज्ययासुरेतारेतोधिषीयासोमस्यरेतोधारणाभिमानित्वात्तदीययोगेनाहंसुरे।

ताञ्चवंध्यरेताःसन्रेतोधिषीयधारयेयं।त्वष्टुरहंदेवयज्यायापशूनांरूपंपुषेयं।त्वष्टातुनिषिक्तं।रेतःपश्वादिरूपेणविकारयति॥
अतःस्तद्यागेनपशूनांरूपंपुषेयंपुष्यात्यं।देवानांपत्नीरग्निर्गृहपतिर्यज्ञस्यमिथुनंतयोरहंदेवयज्यायामिथुनेनप्रभूयासंमि
थुनत्वसिध्यर्थमेकस्मिन्नेवमंत्रेतृतीयचतुर्थेदेवतेसमस्येते।यादेवपत्न्योयश्चगृहपतिरग्निस्तदुभयंमिलितायज्ञसंबंधिमि
30 थुनंतदीययागेनाहंमिथुनेनपुत्रस्त्र्यादिरूपेणप्रकृष्टोभूयासं।वामदेव्यानियजूंषि।राकाय।अहंदेवयज्ययाप्रजावान्भूया
सं।शिनीवाल्या।अहंदेवयज्ययापशुमान्भूयासं।कुह्वा।अहंदेवयज्ययापुष्टिमान्पशुमान्भूयासं।राकादीनांप्रजादिहेतुत्वा
त्।तद्यागेनप्रजादिसंपन्नोभूयासं।एतान्येवप्रजावतीतिपुष्टिमतीतिविकारयुक्तानिपत्न्यनुमंत्रणानि।पूर्ववद्धोतुरंगुलिपर्व
णि।अंगुल्योपस्पृष्टोदकायहोतुर्हस्तेचतुराज्यविंदूनिडामवद्यतिषडुग्नीध्रः।उपस्पृष्टोदकायेतिपूर्ववत्।उपहूयमानामन्वारभंते
अध्वर्युराग्नीध्रःपत्नीयजमानः।उपहूतांप्राश्नीतोहोताग्नीध्रश्च।उभौस्वस्वहस्तगतान्प्राश्नीतः।अत्रापस्तंबलायनः।आज्यंपाणि
तलेवदापयीतेलामुपहूतांसार्वंप्राश्नीयादिति।अयमर्थः।पर्वांजनाद्यपह्वनांतंपूर्ववत्कार्यं।नात्रावांतरेलाषाणिनलेस्यमे राम
वाज्यमिलेस्यपतेनत्सर्वंप्राश्नीयादिति।पावोधायनस्तु।अत्रोत्तरामिडामुपह्वयंतेयथासमाम्नायमिति।प्राजापत्योनिगदः। ३०
उपहूतांरथंतरमित्यादिरयज्ञमंयज्ञमबान्वेयज्ञपत्नीवंद्धीनुपहूतेद्यावापृथिवीपूर्वजेऋतावरीदेवीदेवपुत्रेउपहूतेयंयजमानाइं

द्राणीवाविधवाअदितिरिवसुपुत्राउत्तरस्यांदेवयज्यायामुपहूताभूयसिहविष्करणउपहूतादिव्येधामन्नुपहूताइदंमेदेवाहविर्जुषं
तामितितस्मिन्नुपहूताविश्वमस्याःप्रियमुपहूतंविश्वस्यप्रियस्योपहूता।पूर्वमिप्रेपाह्वानंयजमानार्थं।इदंतुपत्न्यर्थं।अतएव
तत्रतत्रस्त्रिलिंगप्रयोगः।व्याख्यानंपूर्ववत्।अत्रयजमानइडास्मान्॰वैश्वदेवीत्याज्येडामनुमंत्रयते।वामदेव्यस्त्रिष्टुप्।इडा
स्माननुवस्तांघृतेनयस्याःपदेपुनतेदेवयंतः।वैश्वानरीशक्वरीवावृधानोपयज्ञमस्थितवैश्वदेवी।देवयंतोदेवान्यष्टुमिच्छंतोय
जमानाःयस्याइडायाघृतवतीपदेपुनतेपूताभवंतिस्वेडादेवीघृतेनवृष्ट्युदकेनसहास्माननुगंतावस्तंअवतिष्ठतांकिंचवैश्वानरी
विश्वेषांनराणांहितकारिणीशक्वरीसर्वेषांहितंकर्तुंशक्तावावृधानोपहवेनवर्धमानावैश्वदेवीसर्वदेवहितकारिणीसेडायज्ञम
स्मदीयउपस्थिताउपस्थिताभवतु।अत्रस्रुवेणसंपत्नियंजुहोतिपत्न्यामन्वारब्धायांसंपत्नीपत्या॰आरभेतांस्वाहेति।अत्र
अस्मिनिडाप्राशनानंतरकालेसंपत्नीतिमंत्राक्षरसंबंधात्।संपत्नीयइतिहोमनाम।अन्वारब्धायामितिकर्तरिनिष्ठा।नचा
लंभुकायांहोमनिवृत्तिः।अंगनिवृत्त्याप्रधानस्यानिवृत्तेः।विश्वेदेवास्त्रिष्टुप्।संपत्नीपत्यासुकृतेनगच्छतांयज्ञस्ययुक्तौधुर्याव
भूतां।संजानानौविजहतामरातीर्दिविज्योतिरजरमारभेतां॰स्वाहा।पत्याग्निहितायेयंपत्नीसासुकृतेनसुष्ठुसंपादितेनकर्म
फलेनसंगच्छतां।तावुभौयुक्तौपरस्परसंबंधौयज्ञस्यधुर्यौभारवाहकावभूतांयज्ञमन्वतिष्ठतामित्यर्थः।संजानानौपरस्परमेका

मत्यंगतो अरातीः शत्रून् विजहतां विनाशयतां। दिविष्ठलोकस्थितं अजरं जरारहितं ज्योतिरादित्यात्मकमारभेतामाभिमुख्येन प्राप्नुतां। पुर
स्ताद्देवपत्नीभ्य एतामेके समामनंत्यपरिष्टाद्धोपरिष्टाद्धाप्यिष्टलेपफलीकरणहोमाभ्यां। यत्रामीकालविकल्पाः पूर्वेण सह चत्वारः तत्र प
३। त्नीसंयाजानां पिष्टलेपफलीकरणहोमवत्का लोपलक्षणमात्रत्वात्। नतदंगमयं होमः। तेनपित्र्यायामपि क्रियतो अत्र यजमानोप्यं
तर्वेदिं वेदं निधाय। वेदोसीति यथापाठेनाभिमृशति भ्रातृव्यसंबंधि गोहिरण्यादिकामनायां तु विदेयेत्येतस्मात्पूर्वं वदेदत्त मुत्तानं यो
क्त्रस्याधस्तान्निधाय हस्ते पूर्णपात्रादिकं निनयन्नु माहं प्राजामिति मंत्रं तां वाचयित्वा वेदतृणानि दक्षिणेन हस्तेनाग्रदेशे गृहीत्वा विधून-
नमकुर्वन् सव्यहस्तेन गार्हपत्यादारभ्य तंतुं तन्वन्निति संततमाहवनीयपर्यंतमंतर्वेदिस्तृणन्नुगत्वा शेषयित्वा तत्र शेषं निदधाति। अत्र त्य
मंत्रार्थाः वामदेवः वेदोसीत्यादिवाजनमित्यंतं यजुः। करणमसीति पाठः। याजमाने व्याख्यातं। यं वहव उपजीवंति यो जनानामसद्वशी।
तं विदेय प्रजां विदेय कामायत्वा। यं वहवो मित्रभूत्वाद्य उपजीवंति यश्च जनानां वशी वशकर्त्ता स्यात् तं ताहृशं पुत्रं विदेय लभेय किंच
प्रजां पुत्रपौत्रादिरूपां विदेय। हे वेद कामाय सर्वकामप्राप्तये त्वां लभेय। सूर्यस्त्रिष्टुप्। प्रत्वा मुंचामि वरुणस्य पाशाद्येन त्वाबध्नात्स वि राम
ता सुशेवः। ऋतस्य योनौ सुकृतस्य लोकेरिष्टां त्वा सह पत्या दधामि। हे यजमानस्य पत्नी वरुणस्य पाशात्तद्रूपाद्योक्त्रात्त्वां प्रमुंचामि। ३१
सुशेवः सुसुखः सविता प्रेरको देवो येन पाशेन त्वामबध्नात्। मोचयित्वाहमृतस्य यज्ञस्य योनौ स्थाने सुकृतस्य लोके कर्मक्षेत्रेस्मिन्नूलो

केऽरिष्टां महीं स्तितां त्वां पुत्राद्यर्थं पत्न्या सह दधामि स्थापयामि। कामदेव्ययजुषि। पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः स
दसि सन्मे भूयाः सर्वमसि सर्वं मे भूया अक्षितमसि मा मे क्षेष्ठा हे पूर्णपात्र त्वं पूर्णमाप्यायितमसि अतो मे मामपि पूर्णं सर्वाभिमतसा
धनाय पर्याप्तं भूयाः सुपूर्णमसि पूर्णं मे भूया इत्यतिशयेनायमेवार्थः प्रतिपद्यते सदसि सदात्मकं सर्वमसि मम। अपि सदात्मकं भू
याः सर्वं सर्वात्मकमसि ममापि सर्वमिष्टं भूयाः अक्षितमक्षीणमसि अतो ममापि मा क्षेष्ठा क्षयं मा गाः। प्राच्यां दिशि देवा ऋत्विजो
मार्जयंतां दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां प्रतीच्यां दिशि गृहाः पशवो मार्जयंतां उदीच्यां दिश्याप ओषधयो वनस्पतयो
मार्जयंतामुर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयंतां। प्राच्यां दिशि व्यवस्थिता ये देवा ऋत्विजः ते मा मार्जयंतां आत्मनो मां शोधयंतां
एवं दक्षिणस्यामित्यादयो व्याख्येयाः। यज्ञादीनां प्रत्येकमेकत्वान्मार्जयतामित्येकवचनपाठः संभूय बहुत्वान्मार्जयंतामिति बहुवचन
पाठ विवेक इति। वामदेवानुष्टुप्। माहं प्रजां परासिचं या नः सयावरी स्थन। समुद्रे वो निनयामि स्वं पाथो अपीथ। हे आपः प्रजामिवोप
कारिणीर्युष्मान् मा परासिचं पृथक् कृतेकं न करोमि या अस्माकं सयावरीः सहचारिण्यः स्थन ननेशारउपजननः समुद्रे समुद्रस्थानीये
लोके वो युष्मान् निनयामि यूयं च स्वं पाथः संस्थानमपि संगच्छत। तंतुं तन्वन्निति याजुर्वेदि होत्रे व्याख्यातः। अत्र तावदाश्वलायनानु
सारेण प्रयोगः। हविः शेषभक्षणानंतरमध्वर्युरुल्मोदकेन जुहुरुपभृत् स्रुवान्पलेपान् प्रक्षाल्य संस्कवे जुहूपभृतावादाय वेदं होत्रे प्र

यच्छतिहोतावेदोसिवेदोविदेयेतिवेदमादायोदायुषेत्युक्त्वाग्नीध्रःस्फ्यमाज्यस्थालीमुदकमंडलुंचादायप्रथममुत्तरेणगार्हपत्यं
प्रत्यग्गच्छतिततस्तथैवहोताध्वर्युरग्रेणगार्हपत्यंदक्षिणेनप्रतिपद्यआग्नेर्वामपन्नगृहस्येतिशकटस्तम्बदारुणीउक्त्वोत्सादयित्वाधु
रिधुर्योपातमितियुगधुरोःप्रोहतिपात्रीनिर्वापपक्षेअग्नेर्वामितिधुरिधुर्याविवित्तिस्फ्येउक्त्वोत्सादयित्वाथापरेणगार्हपत्यंदक्षि
32 णेध्वर्युरुत्तराग्नीध्रोमध्येहोतासैवउर्ध्वज्ञुवाउपविशंतिअथाध्वर्युराहवनीयतःपरिश्रितेअपरिश्रितेवागार्हपत्येजुहूपभृता
वादाययद्वावेदमुपभृतंकृत्वाकेवलांवाजुहूंपूर्वस्मिन्नवसहितांवादापयद्वाजुहूपभृतस्थानीयानपूर्वोक्तानादायध्यानेनांपांसुवा
सोमायानुब्रूतिहिसंप्रेष्यसंप्रेष्यहोत्रातथैवाप्यायस्वेत्यनूच्यमानेउक्तेवेणाज्यस्थाल्यायपायोगनतुरवत्तपंचावत्तंवादायाश्रा
व्यप्रत्याश्राविते सोमंयजेतिसंप्रेष्यहोतायेयजामहेसोमंसंतेपयांसीत्युक्त्वापूर्ववत्। वषट्क्रियमाणेउत्तरार्द्धेहुत्वावहोत्रावागो
जइतिवषट्कारेनुमंत्रितेयजमानेनसोमायेदंनममेत्युक्त्वासोमस्याहमित्यनुमंत्रितेपूर्ववदवघात्वष्ट्रेनुब्रूहीत्युक्त्वाहोत्राइहत्वष्टारम
ग्र्यमित्यनूच्यंत्कआश्राव्यप्रत्याश्राविते त्वष्टारंयजेतिसंप्रेष्यहोत्रायेयजामहेत्वष्टारंतंनस्तुरीयमित्युक्त्वावषट्क्रियमाणेसोम राम
स्यदक्षिणतआत्मनश्चोत्तरतोवायद्वाग्नेर्दक्षिणतउत्तरतोवाहुत्वाहोत्रानुमंत्रणेयजमानेनत्वष्टइदंनममेत्युक्त्वात्वष्टुरहमित्यनुमंत्रि ३२
तेपूर्ववदवघराकाया अनुब्रूहीतिसंप्रेष्यहोत्राराकामहमित्यनूक्तेआश्राव्यप्रत्याश्राविते राकांयजेतिसंप्रेष्यहोत्रायेयजामहेरा

कांयास्तेराक इत्युक्त्वा वषट्क्रियमाणे मंत्रेणेयजमानेन राकायाइदंनममेत्युक्त्वा राकाया अहंदेवयज्यया प्रजावान्भूयासंप्रजावती भूया
समितिपत्न्यनुमंत्रयते। पूर्ववदवद्यसिनीवाल्या अनुब्रूहीतिसंप्रेष्यहोत्रासिनीवालीत्यनूक्त आश्राव्यप्रत्याश्राविते शिनीवालीयजे
तिसंप्रेष्यहोत्रायेयजामहेशिनीवालीमित्युक्त्वा वषट्क्रियमाणे मध्येहुत्वा होत्रानुमंत्रणेयजमानेन शिनीवाल्याइदंनममेत्युक्त्वा
पत्न्यासहसिनीवाल्या अहमितियथायोगमनुमंत्रितेपूर्ववदवद्यन्कुह्वा अनुब्रूहीतिसंप्रेष्यहोत्राकुहुमहमित्यनूक्त आश्राव्यप्र
त्याश्राविते कुहूंयजेतिसंप्रेष्यहोत्रायेयजामहेकुहूंकुहूर्देवानामित्युक्त्वा वषट्क्रियमाणे मध्येजुहोति होत्रानुमंत्रणेयजमानः कुह्वाइ
दंनममेत्युक्त्वा पत्न्यासहकुह्वा अहमितियथायोगमनुमंत्रयतेयह्वा। यजमानेन राकांयक्षेपुत्रमवाप्रवानित्युक्ते यथापूर्वराकां शिनी
वालींयक्ष्येपश्मूनकाप्रवानीत्युक्ते यथापूर्वशिनीवालिंकुहूंयक्ष्येपुष्टिमवाप्रवानीत्युक्ते यथापूर्वकुहूमिष्ट्वापूर्ववदवद्यन्देवानांप
त्नीरुशतीरित्यनूक्ते आश्राव्यप्रत्याश्राविते देवानांपत्नीर्यजेतिसंप्रेष्यहोत्रायेयजामहेदेवानांपत्नीरुतग्ना व्यंतितिवषट्क्रिय
माणेउत्तरार्द्धे हुत्वाहोत्रानुमंत्रणेयजमानेन देवानांपत्नीभ्यइदंनममेत्युक्त्वात्रैववायेथापूर्वराकादिरिष्ट्वापूर्ववदवद्यन्अग्नयेनु
ब्रूहीतिसंप्रेष्यहोत्राग्निर्गृहपतिरित्युक्ते आश्राव्यप्रत्याश्राविते ग्निंगृहपतिंयजेतिसंप्रेष्यहोत्रायेयजामहेग्निंगृहपतिंहव्यवा
लग्निरितिवषट्क्रियमाणे उत्तरार्द्धमध्येवाजुहोति। होत्रानुमंत्रणेयजमानेनाग्नयेगृहपतयइदंनममेत्युक्त्वा। देवानांपत्नीरग्नि

गृहपतिरित्यनुमंत्रयते। यद्वा जुह्वां स्वधितिना जाघन्याः कृत्तानभागांश्चतुर्वारमादाय देवानां पत्नीर्यथापूर्वं हुत्वा जाघनीनीचभागात्। पूर्ववदा
दायाग्निं गृहपतिं यथापूर्वं जुहुयात्। यद्वा। देवानां पत्नीर्जाघन्या यथापूर्वं हुत्वा ज्येनाग्निं गृहपतिं यथापूर्वं हुत्वोद्देशत्यागाद्यनुमंत्र
33 णयोः स्रुवेणाज्यमादाय होतुर्दक्षिणहस्ते तर्जन्युत्तमपर्वणि अन्यतरप्राश्यस्येनीजयिता वाचस्पतिनेत्युत्तरं पूर्वोत्तरोष्ठे मनस
स्पतिनेत्यधरमधरोष्ठे वागपवर्गनिमृज्योपस्थेष्ठोदकस्य होतुर्हस्ते चतुर आज्यबिंदूनिडामपादायाग्नीध्रहस्ते पड्विंहूनवद्यातिस्त्र
यहोत्राध्वर्याग्नीध्रपत्नीभिरन्वारब्धमिडां मास्यसंमितान्नास्तिका संमितां वा कृकृते लोपहूतेति। निगदेनह्वयतामित्यंतमुपांश्वु
स्वरेणापांता उच्चैस्स्वरेण पुरामानुषी शब्दादुपहूतेति। उपहूता मनुष्यादूतिदेवी देवपुत्रेइतिञ्ची एपवसानानि कुर्वन्नूयजमानेनेडा
स्मानन्नुवस्तामिति अनुमंत्र्यमाणमुपहूय सर्वप्राश्पाचम्याग्नीध्रश्च स्वहस्तगतां प्राश्पाचामति अथाध्वर्योपत्न्यारब्धाः संपत्नी
पत्येति स्रुवेण जुहोति यजमानो दिविज्योतिरिदमिदं न ममेति वदेद्यद्वा पत्नीसंयाजेभ्यः पुरस्ताज्जुहोति यद्वा पत्नीसंयाजेभ्य उप राम
रिष्टाज्जुहोति यद्वा पिष्टलेपफलीकरणहोमाभ्यामुपरिष्टाज्जुहोति यजमानोंतर्वेदि वदेवं निधाय वेदोसि वाजिनमित्यभिमृशति ३३
भ्रातृव्यसंबंधिगोहिरण्यादिकामनायां तु विदेयेत्यस्मात्पूर्वं वेदतस्य गामित्यादिरूपेण वदन्नभिमृशति। अथाध्वर्युर्दक्षिणाग्न्या
विधाप्रत्रत्र नान्यन्याधाय स्रुचि चतुर्गृहीतमाज्ये पफलीकरणानोप्याग्ने दृं० योनिं स्वाहेति जुहूपार्श्वेन हुत्वा यजमानेनाग्नय इदं न

ममेत्यक्त्वायासरस्वती॰ भूयास्मेति मुखं विमृश्य पाप उपस्थस्थवतीस्त्क विचतुर्गृहीत आज्ये पिष्टलेपानोप्यो लूखले मुसले॰ जुहोमि॰ स्वाहे
तिपूर्ववज्जुहोति यजमानो विश्वेभ्यो देवेभ्य इदं न ममेति वदति। यद्वा प्रथमं पिष्टलेपानयफलीकरणानुक्तप्रकारेण हुत्वास्त्क वेण
जुहोति राज्यमवदाय प्रत्याहुति गृह्णन् वासासरस्वती त्ति त्रिभिः प्रतिमंत्रं जुहोति यजमानः सरस्वत्यै विशोभगिनायाइदं न ममेति सरस्वत्यै
वेशाभगिनायाइदं न ममेति इंद्रायेदं न ममेति क्रमेणवदेदथ होता पत्न्यै वेदं प्रदाय स्वयमध्वर्युर्व विदोसी त्वारम्यकामायत्वेत्यं तं मंत्रं प॰
त्नीं वाचयेत्। यदि पत्नी प्रजाकामास्यादिति कामयेत तदासा वेदस्मिरसा स्वनाभिदेशमालभेताथ होता प्रत्वामुंचामीत्यस्य योक्त्रं विमु
च्ययद्वा। पत्नी इमं विष्यामीति योक्त्रं विमुक्ते यद्वा होता प्रत्वामुंचामीति योक्त्रं ग्रंथिं विस्रस्येमं विष्यामीति पत्न्या विमुक्ते पश्चाद्गार्हपत्य
स्यद्विगुणं प्राक्पाशं निधाय तस्योपरिष्टाद्वेदतृणान्युदगग्राणि निधाय तत्पुरस्तात्तूर्णं संसृष्टमुदकपूर्णपात्रं निधायाभिमृश्य
न्नाभिमृशन्ती पूर्णमसीत्यादिमामेक्षेष्टाइत्यंतं वाचयित्वा पूर्णपात्र उदकं प्रतिदिशं यथालिंगमुदक्षस्तयोक्षंती पत्नी प्राच्यादिशी॰
त्यादिमार्जयंतां मार्जयंताम् इत्यन्यतरपदांतं मंत्रं वाचयित्वा अथास्या उत्तानमंजलिमात्मनश्च सव्यं पाणिमुत्तानं योक्त्रस्याधो नि
धाय हस्ते पूर्णपात्रोदकं निनयन् माहं प्रजामिति मंत्रं तां वाचयित्वा वेदतृणानि दक्षिणहस्तेनाग्रदेशे गृहीत्वा विधुन्वन्नुसव्यहस्ते न॰
गार्हपत्यादारभ्य तंतुतन्वन्निति संततमाहवनीयपर्यंतमंतर्वेदि स्तृणन् गत्वा शेषयित्वा तत्र शेषं निदधाति। अथाध्वर्युः पत्न्याः स

योक्त्रं जलौ पूर्णपात्रं समायुषेति तया जप्यमान आनयति पत्नी तदुदकं भूमौ निनीय पाणिभ्यां मुखं विमृज्य पुष्टिमतीरुत्तिष्ठति। आ
पस्तंबीये त्वयं विशेषः। याज्यादौ येयजामहे भूर्भुवः सुवरिति वौषडित्याद्यन्यतमरूपो वषट्कारः प्राणापाननिमेषाः वषट्कारो
मामेप्रवासीति वा वषट्कारे तिवाजपः या सुपाणिरिति कुहूमहमिति कुहूर्देवानामिति यजुर्वेदे पाठः वयमु त्वा गृहपत इति अ
ग्नेगृहपतेयौ उज्या। अंस्का मंगुलिं मिषेप्राणायेति मुखदेशमूर्ध्वमुत्कृष्योर्जपानायेति अवाचीनं नियच्छति उपहूतं रथंतर
मित्यादियेयज्ञपत्नीवर्हीनित्यादिपाठो निगदः। उपहूताहोइत्यंनमुपांशु। अथोच्चैः। वेदं पत्न्यै प्रदायेत्यादि पूर्णपात्रनिनयनां
तस्याभावः किंतु वेदोसीति पत्न्या उपस्थे वेदं प्रास्यति निर्हिषंतमिति सा तं प्रतिनिरस्यति एवं त्रिः ततो वेदतृणानि दक्षिणहस्तेना
ग्रदेशे गृहीत्वा अविधून्वन् गार्हापत्यादारभ्य वेदेरुपर्याहवनीयपर्यंतं तंतुं तन्वन्निति सव्येन स्तृणं तृ गत्वा तत्र शेषं निदधाति। अ
यपत्न्ये मं विष्यामीति योक्त्रं विमुक्ते अध्वर्युः पत्न्या सयोक्त्रं जलाविल्यादि सर्वमन्यत्समानं। पत्न्यकत्यानां तमंत्रोक्तमंत्रव्याख्या राम
सुगंधिभिः सूक्तिप्रसूनैः पुष्णातु पुमर्थान् पुरुषोत्तमः॥ ॥इति प्रयोगरत्नमालायां तृतीये प्रश्ने तृतीयः पटलः॥ ॥कर्नब्रह्मा ३५
ध्वनीनस्य मंत्रिभूपति भूपतेः। व्याचष्टे चौंडपाचार्यः प्रायश्चित्तादिसक्रियां। यद्येतमाहवनीयं गत्वा जुह्वा स्रुवेण सर्वप्रायश्चित्ता
नि जुहोति। यद्येतं येन मार्गेण पश्वाद्भाः तेन प्रत्यागत्स्य दर्शपूर्णमासयोरविज्ञातदोषनिर्वृत्यर्थं प्रायश्चित्तानि जुहोतीत्याप

स्थाल्याज्येन दर्वीहोमत्वात्तद्वद्दर्शितमेव प्राकृतथाज्यस्थाल्याः सर्वप्रायश्चित्तानीत्येक कल्पांतरकाराः। अथ प्रागेत्य ध्रुवामाप्यस
र्वप्रायश्चित्तानि जुहोतीति बोधायनोक्तेः। ध्रुवाया एव सर्वप्रायश्चित्तानीत्यन्ये तत्र प्रतिहोमं ध्रुवाप्यायनमुत्तरार्थं। अत्राश्वलाय
नः। शेषं निधाय प्रत्यगुदग्गाहवनीयादवस्थाय स्थाल्याः स्रुवेणादाय सर्वप्रायश्चित्तानि जुहुयात् स्वाहाकारांतैर्मंत्रैर्न चेन्मंत्रे पठि
तो यास्त्रातोदेवा अवंतु न इति द्वाभ्यां व्याहृतीभिश्च स्व स्वाहेति हुत्वा संस्थाजपेनोपस्थाय इति तीर्थेन निष्क्रम्या नियम इति। अथम
र्थः। वेद शेषं निधायाहवनीयवायव्यदेशेऽवस्थाय स्रुवेणाज्यस्थाल्या आज्यमादायास्त्राग्ने स्यादिभिः सप्तभिर्मंत्रैरनाम्नातत्वा
हांते स्वाहाकारं प्रक्षिप्याहवनीये स्रुवेण हुत्वों च मे स्वरश्च म इति संस्थाजपेनोपस्थायोत्करप्रणीतामध्येन निष्क्रम्या नियमस्या
दिति। अत्रत्यमंत्रार्थाः। वामदेवः पंक्तिः। अयास्याग्ने स्यनभिशस्तीश्च सत्यमित्वमया असि। अयसा वयसा कृतो यासन् हव्यमूहि
षे या नो धेहि भेषजं स्वाहा। हे अग्ने त्वं मयाः शत्रुभिरगम्यो सि अनभिशस्तिश्च अभिशंसनं पापकीर्तनं तेनापि अप्रयुक्तो सि स
त्यमित्। एतत्सत्यमेव किंच अयसा अभक्ष्येणाक्षयेण वयसा अन्येन हः विर्लक्षणेनायुषा वा कृतो सि जरामरणरहितपि इत्यर्थः।
किंच अयासन् अयमेव सन् हव्यमेतदाज्यं मूहिषे वहसि। अयाः अयमेव त्वं नो स्माकं भेषजं न्यूनातिरेकदोषशमनं। धेहि विधेहि।
स्वाहानुभ्यं मिदंमाज्यं दीयत इत्यर्थः। मेधातिथिर्गायत्री। अंतो देवा अवंतु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्तधामभिः। विष्णुः प

रमेश्वरः सप्तधामभिः सप्तभिर्गायत्र्यादिछंदोभिः साधनभूतैः वर्धितः पृथिव्यायस्माद्भूप्रदेशात्। विचक्रमे विविधं पादक्रमणं कृतवान्। अतोस्मा
न्पृथिवीप्रदेशान्नोस्मान् देवा अवन्तु। इदं विष्णुरिति ब्रह्मा वाग्यमप्रमादेव्याख्यातः। व्याहृतयो न्याआनेव्याख्याताः। वामदेवोनुष्टुप्। ॐ चमे
स्वरश्चमेयज्ञोपचतेनमश्च। यत्ते न्यूनं तस्मै त उपयते तिरिक्तं तस्मै ते नमः। ॐ चब्रह्म चमेप्रसीदतु स्वरश्च स्वरति शरीरेंद्रियादिकं स्वस्व
35 कार्येषु प्रेरयति स्वरोंतर्यामी स च मे प्रसीदतु। हे यज्ञ ते तव उपच उपसन्नोस्मि नमश्च करोमि। हे यज्ञपते तव यं न्यूनमज्ञाना त्प्रमादाद्वा
कृतं यच्च ते तवातिरिक्तं कृतं तत्सर्वं तस्मै तदुपसमीप एव समर्पयामि। तस्मै तुभ्यं नमश्च करोमि। ब्रह्मप्रतिष्ठा उदुत्तममिति व्याहृतीभिर्विहृ
ताभिः समस्ताभिश्च हुत्वा पूर्ववद्ध्रु वामाप्या प्यदेवा गातुविद इत्यंतर्वेघूर्ध्वस्तिष्ठन् ध्रुवयास्र मिष्टयजुर्जुहोति। अग्नौ दुघ्य स्वाग्न इतिसंहि
त्येवगत्यं तेनाग्निहोत्रे वक्ष्यमाणा आदिप्रदिष्टत्वात्। उदुत्तममिति कुरणं गणभेदार्थं तेन समवदाय होमपक्षे उदुत्तमं तानां सह ग्रहणं व्या
हृत्यर्थं पुनर्ग्रहणमिति अपूर्वाप्यायन विधाना देवा प्राप्तो मंत्र इति कृत्वा पूर्ववदित्यतिदेशः। मंत्रांत एव होमो न पूर्वयोः स्वाहाकारयोः स राम
मिष्टयजुरित्येकवचनात् प्रशावनेन सहान्येचेद्वे उक्तात्रीणि समिष्टयजूंषि जुहोतीति वचनाच्च। मंत्रांते च स्वाहाकारः कर्तव्यः। मध्यमे ३५
स्वाहाकार इति उत्तरत्र निर्देशात्। अतोंतर्वर्तिना मप्रदानार्थता। पुरस्तादंते वा स्वाहाकारः यदानार्थः पुरस्तात्स्वाहाकारा वा अन्ये दे
वा इति श्रुतेः। अत्रत्य मंत्रार्थः। ब्रह्म प्रतिष्ठेतिना रिष्टेव्याख्यातः। त्रयाणां विश्वेदेवाः पंचपदा शाक्वरी। आप्त्वा वितमसा स्या वितं वष

द्रूकृतमस्यनूक्तं च यज्ञे। अतिरिक्तं कर्मणो यच्च हीनं यज्ञः पर्वाणि प्रतिरन्नेति कल्पयन्स्वाहाकृताहुतिरेतु देवान् अस्मिन् यज्ञे यद्व विराम्नावि
तं समीचीनाम्नां वर्णयुक्तं यच्चास्माभ्रावितं अतिक्रान्ताम्नावर्णयुक्तं यच्च वषट्कारयुक्तं सम्यक् वषट्कारेण दत्तं यच्चास्य नूक्तमं तिक्रान्ता
नुवचनयुक्तं तत्सर्वं यज्ञः कल्पयन्नेतीत्यर्थः। अतिरिक्तेमित्यादि ब्रह्मप्रतिषेत्यत्र व्याख्यातं। जगत्यौ। यद्वो देवा अतिपादयानि वाचा
चित्प्रयतं देवहेडनं। अरायो अस्माँ अभिदुच्छुनायते न्यत्रास्मन्मरुतस्तं निधेतन। हे देवा मरुतो वो युष्माकं संबंधियत्कर्म अतिपा
दयानि अहमतिपन्नं करोमि अकरणमन्यथाकरणं वातिपत्तिः। वाचा चित् वाचा मनसापि देवहेडनं देवानां क्रोधकारणं यदस्मा॥
भिप्रयतं प्रयत्नेन संपादितम रायः। अरिमेशत्रुर्यः कोप्यस्मानभिलक्ष्य दुच्छुनायते दारिद्र्ययुक्तान् करोति। तत्सर्वमस्मत्तोन्यत्र
निधेतन हे मरुतः स्थापयत तत्स्यत्रुमस्मासु माभूत्। ततं म आयः स्वदुनायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते। अयं समु॥
द्र उत विश्वभेषजः स्वाहाकृतस्य समु तृप्णुत ऋभुवः। मे मदीयमापः कर्म आततं सर्वतो विस्तीर्णं यावज्जीवकं कल्लोन प्रकृतवान् तदुतदे
वकर्म इदानीं पुनस्तायते भूयो विस्तीर्यते। किंच स्वादिष्ठा स्वादुतममधुनोतिर्धारं एण हेतुराज्याहुतिरुचथाय कर्मणे शस्यते प्रशस्य
तां भजते तस्मादयं समुद्रः समुद्रसमानः यावद्देका देवता कार्यते यावद्देका। तावदाहुतिः प्रथतइति श्रुतेः। उत विश्वभेषजः सर्वानिष्टश
मनहेतुः हे ऋभवाः देवाः स्वाहाकृतस्य स्वाहाकारेण वृत्तस्य हविषः। स्वीकारेण समतृप्तुताः सम्यगेव तृप्ता भवत। अग्निरनुष्टुप्। उद्वयं

तमसस्परिपश्यंतोज्योतिरुत्तरं। देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं। वयमनुष्ठातारः तमसस्परिरात्रेरुपर्यूर्ध्वप्रायादुपरिवावर्त्तमानंज्यो
तिस्तेजोरूपंउत्तरमभ्युततरंदेवत्रादेवेषुमध्येदेवंज्ञानादिगुणयुक्तंसूर्यंपश्यंतोस्तुतिभिर्हविर्भिश्चोपासीनाः। संतउत्कृष्टतमंज्योतिः
सूर्यरूपमगन्मप्राप्नुवानि। प्रस्कंण्वोगायत्री। उदुत्यंजातवेदसंदेवंवहंतिकेतवः। दृशेविश्वायसूर्यं। केतवः प्रज्ञापकाः सूर्याश्वारश्म
योवा। त्यंतंप्रसिद्धंजातवेदसंजातप्रज्ञंजातधनंवादेवंद्योतमानं। सूर्यंसर्वस्यप्रेरकमादित्यंउद्वहंतिऊर्ध्वंवहंतिउइतिपादपूर
णे। कुत्सस्त्रिष्टुप्। चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः। आप्राद्यावापृथिवीअंतरिक्षं सूर्यआत्माजगतस्त
स्थुषश्च। देवानांद्योतमानानांरश्मीनांदेवजनानांवा। अनीकंसमूहरूपं। चित्रमाश्चर्यकरंमित्रस्यवरुणस्याग्नेः। एतदुपलक्षितानां
जगतांचक्षुरिवप्रकाशकं। सूर्यात्मतेजउदगादुदितमासीत्। एवमुदितोजगतोजंगमस्यतस्थुषःस्थावरस्यचआत्मास्वरूपभूतः
सूर्योदिवोदिवंपृथिवीमंतरिक्षंचाप्रः। आसमंतादपूरयत्। शुनःशेपोगायत्री। इमंमेवरुणश्रुधीहवमद्याचमृडय। त्वामवस्यु राम
राचके। हेवरुणमेमदीयमिमंहवमाह्वानंश्रुधिश्रृणु। अद्यचाद्य। मृडयसुखय। अवस्युः त्वांवावयस्युः पालनेस्युः। त्वामाचकेआ ३६
समंतात्शब्दयामिप्रार्थये। शुनःशेपस्त्रिष्टुप्। तत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः। अहेडमानोवरुणेहबोध्यु
रुशंसमानआयुःप्रमोषीः। तत्तस्मैरक्षणायब्रह्मणामंत्रेणवंदमानस्त्वायामित्वांप्राप्नोमि यंयजमानोहविर्भिः आराधयन्तद्।

क्षणमाशास्ते। हे वरुण अहेडमानः क्रोधरहितः इह कर्मणि बोधि अस्मद्धितज्ञापनं बुध्यस्व हे उरुशंस प्रभूतस्तुत ते नो स्माकमायुर्मा प्रमोषीः। मा।
विनाशय। वामदेवो विराट्। त्वंन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमु
ग्ध्यस्मत्। हे अग्ने त्वं नो अस्माकं विद्वान्सन् वरुणस्य देवस्य हेडो स्मद्विषयं क्रोधं अवयासिसीष्ठाः। अपनयय यजिष्ठो यष्टृतमो वह्नितमो
ऽतिशयेन देवह विर्वोढा शोशुचानो त्यन्तदीप्यमानो विश्वा द्वेषांसि सर्वान् विरोधकृतान् द्वेषान स्मत् प्रमुमुग्धि अस्मत्तः प्रमोचय।
वामदेव्य त्रिष्टुप्। स त्वंन्नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि। सु
खेनाह्वातुं शक्यो भवो न एधि। हे अग्ने स त्वं नो स्माकं ऊत्या रक्षणेन अवमो भव रक्षको भव। कीदृशस्त्वं अस्याः उषसो व्युष्टौ नेदिष्ठः अद्य
तनस्योषःकालस्योपरितने प्रातःकाले त्वं तं प्रत्यासन्नः नो स्माकं वरुणं वरुणेन कृतममीष्टनिवारकं पापादिकं। अवयक्ष्व विनाशय र
राणो रममाणः सन् मृडीकसुखसाधनमस्मदीयं हविः। वीहि भक्षय। ततो नो स्माकं सुहव एधि सुखेनाह्वातुं शक्यो भव। विश्वेदेवा अनु
ष्टुप्। त्वमग्ने अयास्ययासन्मनसा हितः। अयासन्हव्यमूहिषे या नो धेहि भेषजं। हे अग्ने त्वं अयासि शत्रुभिरगम्यो सि तथा अ
यासन् अगम्यः सन् अस्मात् मनसा हितं। आवाहितस्तथा गम्यः सन् देवेभ्यो हव्यं वहसि। अगम्य एव सन् नो स्माकं भेषविध्यपराध
दोषशमनं विधेहि। प्रजापते न तद्दिति पिंडपितृयज्ञे व्याख्याता। अष्टानां विश्वेदेवा यजुषी। इष्टेभ्यः स्वाहा वषडनिष्टेभ्यः स्वाहा॥ भे।

षजंदुरिष्ट्यैस्वाहा।निर्ऋत्यैस्वाहा।दौराध्यैस्वाहा।दैवीभ्यःस्तनूभ्यःस्वाहा।ऋध्यैस्वाहा।समृध्यैस्वाहा।इष्टेभ्यःसम्यग्याग्रेनाराधितेभ्यो
न्याधिभ्यस्तत्प्रतिशयार्थमिदंस्वाहाहुतमस्तु।येत्वनिष्टाअनाहितास्तेभ्यइदं वषड्हविर्भक्तंतदर्थमिदंस्वाहाहुतमस्तु।दुरिष्टैरन्य
37 थानुष्ठानंतस्यसमाधानहेतुरिदंस्वाहाहुतमस्तु।निर्ऋत्यैप्रायश्चित्तार्थमिदंस्वाहाहुतमस्तु।आसमंताद्‌द्धिराद्धिःदुष्टावसाना
द्धिःसुदुराद्धिःफलवैकल्यंतत्समाधानार्थंस्वाहाहुतमिदमस्तु।याश्चान्यादेव्यास्तनवस्ताभ्यःस्वाहाहुतमस्तु।ऋद्धिःफलप्राप्तिः
समृद्धिस्तत्रैवातिशयःतदुभयार्थंस्वाहाहुतमस्तु।अयाश्चाग्नेस्यीतिश्रयसामनसास्मदीयेनधृतःशेषंहोतुःप्रायश्चित्तेव्याख्या
तं।चतुर्णांवामदेवःप्रस्तारपङ्क्तिः।यदस्मिन्यज्ञेंतरगाममंत्रतःकर्मतोवा।अनयाहुत्यातच्छमयामिसर्वंतृप्यंतुदेवाआवृषंतां
घृतेन।अस्मिन्यज्ञेमंत्रतःकर्मतोवायदंतरगाम।अंतरंकृतवंतःन्यूनमतिरिक्तंवाकृतवंतःतदनयाहुत्याशमयामि।देवास्तत्सर्वं
स्वीकृत्यतृप्यंतु।तृप्तास्तुश्चानेनाज्येनावृषंतां।आभिमुख्येनवर्द्धतां।अनुष्टुप्।आज्ञातमनाज्ञातममतंचमतंचयत्।जातवेदःसं राम
धेहित्वंहिवेत्थयथातथं।अस्मिन्कर्मणियदाज्ञातंईषद्‌ज्ञातंन्यूनातिरेकादिअनाज्ञातंनैवज्ञातं।तथाअमतंमयेदमन्यथाकृ ३७
तमित्यज्ञातंमतंचमयेदमन्यथाकृतमितिज्ञातंयदस्ति।हेजातवेदोग्नेतत्सर्वंसंधेहि।सगुणंकुरु।हियस्मात्कारणात्वंयथातथं
यद्यथाकर्तव्यंयस्ययत्प्रायश्चित्तंतस्यतथातत्त्वंवेत्थजानासि।बृहती।यदकर्मयन्नाकर्मयद्दमरेचियन्नासरेचि।अग्निष्ट

त्स्विष्टकृद्विद्वान्सर्वं॒ स्विष्टं॒ सुहुतं करोतु। अस्मिन्कर्मणि यदकर्म अकर्त्तव्यमेव मया कृतं यन्ना कर्म कर्त्तव्यमेव न कृतं यदत्यरेचि
तद्यातिरिक्तं कृतं यन्नामरेची तियच्चानतिरिक्तमानं कृतं। एतद्विद्वान्स्विष्टकृत्सुष्ठु इदं करोतीति स्विष्टकृदग्निः तत्सर्वं स्विष्टं सुष्ठु
इष्टं सुष्ठु हुतं च करोतु। बृहती। यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाकरं। अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं॒ स्विष्टं॒ सुहुतं करोतु।
अहमस्य कर्मणो यदरीनिर्चं यदतिरिक्तं कृतवानस्मि यच्च इह कर्मणि न्यूनमकरं कृतवानस्मि शेषं पूर्ववत्त्र व्याख्यातं। षणां विश्वे
देवा बृहती। यत इंद्र भयामहे ततो नो अभयं कृधि। मघवन्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि। हे इंद्र यतो मनुष्य रोगचौरादे
र्भयामहे वयं भीतिं प्राप्नुमः। ततः सर्वस्मान्नोस्माकं अभयं कृधि कुरु। हे मघवन् तत्र तत्र भये नोस्माकं तवोतये त्वदीपरक्षणार्थं
शक्तो वर्तस्व किंचास्माकं द्विषः शत्रून् विजहि विनाशय। मृधः संग्रामांश्च विजहि। अनुष्टुप्। स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो
वशी। वृषेंद्रः पुर एतु नः स्वस्तिदा अभयंकरः। स्वस्तिदा क्षेमस्पदाता विशः पतिः प्रजायाः पालकः वृत्राहा पापस्य हंता विमृधो
विनिवारितसंग्रामः। वशी जितेंद्रियः वृषा शक्तः स्वस्तिदाः शोभनं सद्भाववमस्मभ्यं प्रयच्छन्। अभयंकरो भयनिवृत्तेः कर्ता। अ
यमिंद्रो नोस्माकं पुर एतु। अग्रतो रक्षकत्वेन वर्त्ततां। त्रिष्टुप्। आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्द्धमानः। यदा स्तोतृ
भ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम। हे हरिवन् अश्वयुक्तेंद्र आभिर्गीर्भिरस्मदीयस्तुतिभिर्वर्द्धमानः त्वं अतोस्मात्कर्म

णः ऊनमंगं नोस्मदर्थं आप्यायय अभिवर्द्धय यदास्मिन् स्तोतृभ्यः स्तोत्रगर्भार्थं ह्यहि गोत्रामहतः पर्वतान्मेघान्वा नूत्नान्जासि भग्नान्
करोषि। अथ तदा वयं ते तवानुग्रहात् भूयिष्ठभाजः। स्याम प्रभूतधनानां लब्धारो भूयास्म। अनुष्टुभौ। अनाज्ञातं यदाज्ञातं यज्ञ
स्य क्रियते मिथु। अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं। यस्य यज्ञस्य संबंधि यदंगमनाज्ञातं शास्त्रोक्तक्रमेण अस्माभिरज्ञातं
सम्यक् न ज्ञातं सत् मिथु क्रियते मिथ्या क्रियते यज्ज्ञानादज्ञानाद्वान्यथानुष्ठीयते हे अग्ने अस्य कर्मणः संबंधि तत्सर्वमंगक
ल्पय फलदानसमर्थं कुरु। यस्मात्कारणात्त्वं यथातथ्यं कर्मणो वस्तुतत्त्वं वेत्स। पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः। अग्ने त
दस्य कल्पय त्वं हि वेत्थ यथातथं। यो यज्ञः सांगः पुरुषसंमितः पुरुषसदृशः यथायं पुरुषोयमन्यूनातिरिक्तविशिष्टावयवस्त
था यज्ञोपि किंचायं यज्ञपुरुषसंमितः पुरुषेण सम्यक् निर्मितश्च। यस्मादेवं तस्मात् हे अग्ने यदस्येत्यादि पूर्ववत्। यत्पाकत्रेति
था जुर्वैदिकहोत्रजपे व्याख्यातः। त्रयाणां वामदेवो अनुष्टुप्। यद्विद्वांसो यदविद्वांसो मुग्धाः कुर्वन्त्यृत्विजः। अग्निर्मा तस्मादे राम
नसः श्रद्धादेवी च मुंचतां। अत्र त्विजः विद्वांसो जनानां यत्कुर्वन्ति तथा विद्वांस आजानाना मुग्धाः कर्तव्याकर्तव्यविवेकरहिता ३८
श्च यत्कुर्वन्ति। तस्मात्सर्वस्मादेनसः पापात् मामग्निः श्रद्धादेवी च मुंचतां मोचयतां। त्रिष्टुप्। अया उग्ने जातवेदा अंतरः पूर्वो
अस्मन्निषद्या। सन्वन्सनिं सुविमुचा विमुंच धेह्यस्मे सुद्रविणं जातवेदो यच्च भद्रं। जातवेदाः जातप्रज्ञो यमग्निर्होता भूत्वास्मत्तो

नराअभ्यंतरः संनिषद्यसनिंयजमानस्याभिलिषितंधनंसन्वन्प्रार्थयन्। अयादृयागंकृतवान्। हेजातवेदः सुविमुंचसुखंविमोक्तुंसमर्थयप्र
ज्ञयाविमुंचविष्वपराधदोषंविमोचयकिंचास्मासुद्रविणंधनंधेहि अभयंचभद्रं भजनीयमस्ति तदपिधेहिम्येतेशमितियाजुर्वैदिकहौत्र
जपेव्याख्याता। योभूतानामितिइध्मसन्नहनप्रहारेव्याख्याताः। प्रजापतिस्त्रिष्टुप्। उद्बुध्यस्वाग्नेप्रतिजागृह्येनमिष्टापूर्तेसंसृजे
थामयंच। पुनःकृएवंस्त्वापितरंयुवानमन्वातांसीत्वयितंतुमेतंहेअग्नेत्वंउद्बुध्यस्वजर्द्धस्वप्रतिजागृहि अवहितोभवइष्टापूर्ते
वैदिकेलौकिकेश्रौतेस्मार्त्तेकर्मणि। एनंसंसृजेथां अनेनयजमानेनसंयुक्तेस्यातां अयंचयजमानः पितरंपालकंयुक्तेस्यातां अ
यंचयजमानः पितरंपालकंयुवानंफलमेलकत्वांप्रतिपुनः कृएवन्यौवनःपुण्येन क्रियामनुतिष्ठन् त्वयिएतंतंतुमिमंयागंअन्वा।
तांसीत्। अनुसंतनोतु। शुनःशेपस्त्रिष्टुप्। उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय। अथावयमादित्यव्रतेतवानागसो
अदितयेस्याम। हेवरुण उत्तममुत्कृष्टंपाशंबंधकं। दोषमस्मदस्मत्तः उच्छ्रथाय उत्कृत्यशिथिलंकुरु। अधमंनिकृष्टंपाशमवश्रथा
यशिथिलीकुरु। मध्यमंपाशं विश्रथायवियुज्यशिथिलीकुरु। अथानंतरंहेआदित्यतवव्रतेत्वदीयेकर्मणि अदितयेखंडनरहि
ताय अनागसो अपराधरहितास्याम। व्याहृतयो व्याख्याताः। प्रजापतिर्यजुः। देवागातुविदोगातुंवित्वागातुमितमनसस्पतइमं
नोदेवदेवेषुयज्ञंस्वाहावाचिस्वाहावातेधाःस्वाहाहेमार्गविदोदेवाःपूर्वंयंमार्गलब्ध्वासमागताः। पुनःप्रतिनिवृत्यतंमार्गंगच्छतहेम

नसस्पतेदेवभो कृपुदेवेषुइमंन्नोयज्ञं निधेहिवाचिर्वा चिवागधिष्ठातरि अग्नाविदमाज्यंहुतमस्तु। सर्वक्रियाप्रवर्त्तकेवायौ निधेहि इदं
माज्यंहुतमस्तु। अत्राध्वर्युः सर्वक्रियाप्रवर्त्तकाद्वायोर्देवेवयज्ञमुपक्रांतवान् देवा गातुविदो गातुंयज्ञायवित्त्वेति अन्तः समाप्तावपि दे
वागातुविद इत्येषवायुविषयोमंत्रोयुक्तः। तथा चब्राह्मणं। ब्रह्मवादिनो वदंतिसत्वा अध्वर्युः स्यादित्यादि मध्यमेस्वाहाकारेवर्हिरनु
प्रहरति। मध्यमेस्वाहाकार इतिवाचिस्वाहेत्यस्मिन्नित्यर्थः। तेनपश्चुसोमयोः समिष्टयजुर्द्वावपितस्मिन्नेववर्हिः प्रहारः प्राक्
39 तस्यैवमध्यमस्यतत्रापि विद्यमानत्वात्। वर्हिः सर्वमनुप्रहरति। वर्हिर्मुष्टिं वेतितुसत्याषाढभरद्वाजौ। यदियजमानः प्रवसेत्॥ प्र
जापतेर्विभांन्नामलोकइति ध्रुवायांयमानभागमवधायसमिष्टयजुषासहजुहुयात्। दधामीतिलिंगाद्दवधानेमंत्रः। प्रजाप
तिर्यजुः। प्रजापतेर्विभांन्नामलोकस्तस्मिंस्त्वादधामिसहयजमानेन। यद्यपिस्वर्गादिलोकाः सर्वेप्रजापतिनासृष्टत्वात्। तत्सं
बंधिनाम्नाविभानुव्यक्कर्मभूमित्वेनयजमानान्प्रतिविशेषेणनभांतितिनास्तितेषांविभाः वशब्दवाच्यत्वंभूर्लोकः कर्मभूमित्वेन। राम
यजमानंविशेयजमानंविशेषेणभासमानत्वात्भविनाशब्दवाच्यः विभांनामकेप्रजापतिसंबंधिनितस्मिन्लोकेहेहविर्भागमस्त्वेते ३९
नयजमानेनसहतांस्थापयामि। अत्रयजमानोवसुर्यज्ञइति अदइतिपदस्थानेस्वेष्टनामागृह्णन् समिष्टयजुर्हुतमनुमंत्रयते।
संयज्ञपतिराशिषेतियजमानभागंदधिक्राव्णोअकारिषमितिसायंदोहमिदंहविरितिप्रातर्दोहंप्राश्नात्यब्राह्मणोनसान्नाय्यं।

प्राश्नाति। वामदेवो यजुः। वसुर्यज्ञो वसुमान्यज्ञस्तस्य माय ज्ञस्य वसोर्वसुमतो वस्वागच्छत्वदोमागच्छतु। अयं समिष्टयजुर्होमो नामयज्ञो वसु
र्वासयिता कर्मफलस्य अत एवायं यज्ञो वसुमान् फलवान् तस्य तादृशस्य वसोर्वसुमतो यज्ञस्य वसुफलं मां प्रत्यागच्छतु। अतोप दिष्टं मे
मदर्थमागच्छतु। यजुः। संयज्ञपतिराशिषा। अनेन यजमानभागप्राशनेन यज्ञपतिरहमाशिषा कर्मफलेन संगच्छामि। विश्वेदेवा अ
नुष्टुप्। दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्रण आयूंषितारिषत्। दधिक्रामतिप्राप्नोतीति दधिक्रा
वा एतन्नामको दधिप्रियः कश्चिद्देवविशेषः। अग्निरित्यन्ये। तस्य देवस्य अकारिषं अहं कर्म कृतवानस्मि कीदृशस्य जिष्णोर्जयशी
लस्य अश्वस्य व्यापिनो वाजिनो भवतः स देवो स्माकं मुखं सुरभि करोतु। अस्माकं आयूंषि प्रतारित् प्रवर्द्धयतु। विश्वेदेवाः आद्याम
ध्ये ज्याति र्जगती बृहती त्रिपदा त्याइदं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये। आत्मसनि प्रजासनि पशुसनि भयसनि
लोकसनि। स्वभक्षहारेणात्मानं तनुत इत्यात्मसनि एवमुत्तरत्र आत्मप्रजापश्वभयलोका। तस्मदर्थं यजमानमिदं हविर्मेमम स्वस्त
ये शुभफलाय दशवीरं दशभिः पुत्रैर्युक्तं सर्वगणे मित्रादिसर्वगणायुक्तं प्रजननं प्रजनने हेतुरस्तु। अग्निः प्रजां बहुलां मे करोत्वन्नं प
यो रेतो अस्मासु धेहि रायस्पोषमूर्जमस्मासु दीधरत् स्वाहा। अग्नये नीयत इत्यग्निशब्दवाच्यमिदं हविर्मम प्रजां बहुलां करोत्वन्ना
त्मकमिदं। पयो स्मासु रेतो विधातु किंच धनपोषमिषमन्नमूर्जं बलं चास्मासु दधातु स्वाहेदं पय आत्मनि प्रक्षिपामि। अभिस्तृणी

हिम्रध्वइतिहोतृषदनेवेदिमभिस्तीर्यकोवोयोक्षीत्सवोविमुंचतिसंतवेदिप्रणीताआसाद्यविमुंचति। प्रणीतानांविमोचनेमंत्रः। तल्लिंगत्वात्क
र्मंगत्वनिवर्त्तनबुध्यामंत्रोच्चारमेवमंत्रविवेकः। विश्वेदेवास्त्रिष्टुप्। अभिस्तृणीहिपरिधेहिवेदिंजामिंमाहिंसीरमुयाशयाना। होतृषद
नाहरिताः सुवर्णानिष्काइमेयजमानस्यब्रध्ने। हेदर्भअभिस्तृणीहिअभितःसंस्तीर्णोभव। वेदिंपरिधेहिआच्छादयामुधयावेद्यासहश
40 यानाशयनंप्राप्तांजामिंजायमानांप्रजांमाहिंसीः। होतृषदनाहोताएषुदर्भेषुनिषीदतितादृशादर्भाहरितवर्णाशोभनच्छायाइमेपु
रतोवर्त्तमानाःसंतोयजमानस्यब्रध्नेकर्मफलभूतआदित्यलोकेनिष्काअलंकाराःसंतु। वामदेवोयजुः। कोवोयोक्षीत्सवोविमुंचतु॥
हेप्रणीताआपोवोयुष्मान्कःप्रजापतिरस्मिन्कर्मण्ययोक्षीत्सप्रजापतिरेववोयष्मानिदानींकर्मणःसकाशाद्विमुंचतु। अत्रप्र
णीतासुसंततामुदकधारांस्त्रावयत्यध्वर्युर्यजमानःसदसिसन्मेभूयादितिजपित्वाप्राच्यांदिशीत्येतैर्यथालिंगंप्रणीतोदकंव्युत्सिच्य
समुद्रंवइत्यंतवेदिशेषंनिनीय। यदप्सुतेभूयास्मेतिमुखंविमृष्टे। प्रजापतिर्यजूंषि। सदसिसन्मेभूयाःसर्वमसिसर्वंमेभूयापूर्णमसि राम
पूर्णंमिभूयाअक्षितमसिमामेक्षेष्ठाःप्राच्यांदिशिदेवाऋत्विजोमार्जयंतांदक्षिणायांदिशिमासाःपितरोमार्जयंतांप्रतीच्यांदिशिगृ ४०
हाःपशवोमार्जयंतामुदीच्यांदिश्यापओषधयोवनस्पतयोमार्जयंतांमूर्ध्वायांदिशियज्ञःसंवत्सरोयज्ञपतिर्मार्जयंतां। होतृपूर्णपा
त्रनिनयनेव्याख्यातानि। समुद्रंवइत्यध्वर्युमधुपर्केव्याख्याता। विश्वेदेवाअनुष्टुभौयदप्सुतेसरस्वतिगोष्वश्वेषुयन्मधु॥ ते

नमेवाजिनीवतिमुखमऊधिसरस्वति। हेसरस्वतितेतवयन्मधुसारंश्रोण्वस्तितथागोश्वश्वेषुचयन्मध्वस्तिहेवाजिनीवतीअन्नसं
पादकोदकयुक्तेसरस्वतितेनमधुनामेममसुखंमण्डिधस्मकंकुरु। यासरस्वतीवैशंभल्यातस्यांमेरास्वतस्यास्तेभक्षीयतस्यास्ते
भूयिष्ठभाजोभूयास्म। हेसरस्वतीवैशंभल्यामनुष्येश्वर्यप्रवर्त्तिकास्तितस्यांमेमारास्वप्रेरयतस्यास्तेतवसंबंधिनंसारंभक्षी
यतस्यास्तेतवसंबंधियद्भूयिष्ठंबहुतरंसुखमस्तितद्भागीचभूयासं। यंदेवा० कुर्वितिपुरस्तात्प्रत्यंचंउक्तरेउपवेषंस्थविम
तउपगूहति। स्थविमतःस्थूलान्मूलप्रदेशादाराभ्यांकरणंसुष्ठुपुरस्ताद्भागेत्वंप्रत्यगुपगूहति। प्रजापतिरनुष्टुभौ। यंदेवामनु
ष्येषूपवेषमधारयन्। येअस्मदपचेतसस्तानस्मभ्यमिहाकुरु। उपवेषोपविठिनःप्रजांपुष्टिमथोधनं। द्विपदोनश्चतुष्पदोध्रुवा
ननपगान्कुरु। यंकाष्ठविशेषंदेवामनुष्यसंबंधियज्ञेषुकपालोपधानादिकर्मकारणमुपवेषंअकल्पयत्। हेउपवेषसत्वंये
पुत्रभार्यादयोस्मत्तोपरक्तास्तानस्मदर्थमिहानीयानुरक्तान्कुरु। हेउपवेषोस्माकंसमीपेप्रजादिकंविदिध्यासप्तंकुरु। मनु
ष्यान्नपसृष्ट्रचिरंजीविनोव्ययरहितांश्चकुरु। यद्यभिचरेद्योपवेषे० यंद्विष्मइत्यथास्मैनामगृह्यप्रहरति। यद्यभिचरितुमिच्छे
त्तथास्मैअभ्याभिचर्यमाणस्यनःयोपवेषेश्चुकूसोदेवदंतमूश्चलितिस्पेवंगृहीत्वोत्करएवप्रहरतिस्यासुमस्यावध्यानोस्मात्त्वंसृज।
अत्रयजमानोविष्णोःक्रमोसीतिभिर्दक्षिणेनैवपदासव्यंपुरस्तादनयन्दक्षिणेवेदिशीन्मित्रीन्विष्णुक्रमानुरानरोत्तरमाधि

कंप्रागपवर्गंआहवनीयमनतिक्रांत्वातृतीयेवस्थित्वाविष्णोः क्रमोसिशत्रूयतइतिजपतियद्वातूष्णींचतुर्थंवक्रांत्वातत्रस्थित्वाचतुर्थंज
पतिअथाग्निनादेवेनपृतनाजयामीतिविष्णुवतिक्रमानुक्त्वायेदेवायज्ञहनइत्यतिमोक्षान्वदति।यद्वैकंविष्णुक्रमंक्रांत्वाप्रथमंवि
ष्णुतिक्रममतिमोक्षंचोक्त्वाद्वितीयंक्रांत्वाद्वितीयमुक्त्वातृतीयंक्रांत्वातृतीयमुक्त्वाचतुर्थंविष्णुतिक्रमंजपति।यद्वाकेवलानूवि
ष्णुक्रमानेवक्रामतिअथागन्मवसुरिति।उद्यन्नद्येतिवाषड्भिरादित्यउपस्थायैऐंद्रीमावृतमितिप्रदक्षिणमावृत्याभिचरतश्चे
दिदमहमितिदक्षिणपादपार्ष्ण्याभूमिंनिपीड्यपुणपाभवंलिस्कृत्वासमहमितिप्रसव्यमावृत्यसमिद्धोअग्नइत्याहवनीयमुपस
मिध्यवसुमान्यज्ञोयोनः सपत्नइतिचतमुपस्थायाग्नआयूंतिषिद्वाभ्यांअग्नेरगृहपतइतिचगार्हपत्यंउपस्थायातामाशिष
माशासेतंतवेज्योतिष्मतीमिस्कृत्वाविद्यमानपुत्रस्ततामाशिषमाशासेमुष्मैज्योतिष्मतीमितिवामुष्माइत्यत्रचतुर्थ्यंतंपुत्रना
मगृह्णन्पुत्रनीतिक्रमेणनामान्कृत्वाप्रतिपुत्रंमंत्रमावर्त्तनंचोक्त्वाज्योतिषेतंतवइतिअसावित्यत्रसंबुध्यंतंप्रियपुत्रनामगृह्णन्
तन्वानास्त्वेमंत्रमावर्त्तयन्नुक्त्वाग्नेवह्नइतिदक्षिणाग्निमुपस्थायज्योतिषेतंतवेत्वेतिपूर्ववदुपविश्यज्योतिरसितंतंवइतिजपि राम
त्वावेदंवेदतृणानिचोपस्यआधाययेदेवायज्ञहनइत्यतिमोक्षान्जपतिअत्रवाहोतापूर्ववद्देदस्त्रीर्णेपूर्ववद्यजमानभागंप्राश्यक ८१
स्त्वायुनक्तीतिअग्न्यंविमुच्याग्नेव्रतपतेअचारिषमितियथाव्रतंग्रहणंव्रतंविसृज्ययज्ञोबभूवेतिजपित्वागोमानितिप्राङुदे

सजपित्वात्रवायजमानभागंप्राश्पयज्ञशंचमइतिजपित्वाद्वष्टिरसीत्यपउपस्पृश्पब्राह्मणाँस्तर्पयितवाइतिसंप्रेष्यतिप्रवत्स्यंस्तुस्वेस्वेश्रौ
पवसथ्यादिकालेसर्वान्यजमानमंत्रान्जपतितत्रैवप्राचोविष्णुक्रमानृक्रामतिप्राङुदेत्यगोमतींजपति। अत्रत्यमंत्रार्थाः। प्रजापति
र्यजूंषि। विष्णोःक्रमोस्यभिमातिहागायत्रेणछंदसापृथिवीमनुविक्रमेनिर्भक्तःसयंद्विष्मः। हेप्रथमप्रक्रमत्वंअभिमातिहापपाघ्ना
नीविष्णोःक्रमोसिगायत्रीछंदोदेवतयाअनुगृहीतोहमेतत्प्रदेशरूपांपृथिवीमनुसृत्यविक्रमेपादंप्रक्षिपामियमभिमातिंवयंद्वि
ष्मःसोभिमातिर्निर्भक्तोस्मात्प्रदेशान्निःसारितः। विष्णोःक्रमोस्यभिशस्तिहात्रैष्टुभेनछंदसांतरिक्षमनुविक्रमेनिर्भक्तःसयंद्विष्मः।
विष्णोःक्रमोस्यरातीयतोहंताजागतेनछंदसादिवमनुविक्रमेनिर्भक्तःसयंद्विष्मः। विष्णोःक्रमोसिशत्रूयतोहंतानुष्टुभेनछंदसादि
शोनुविक्रमेनिर्भक्तःसयंद्विष्मः। अभिशस्तिरन्यैरापादितोपवादःतदपहंताद्वितीयःप्रक्रमःरातिर्दीनंद्रव्यलाभस्तन्निराकरण
मरातिःतदिछंतःस्वस्यविरोधिनोरातियतस्तान्हंतितृतीयःप्रक्रमःशत्रुत्वंहिंसकत्वंतदिछंतोवैरिणःशत्रूनूयतस्तान्हंतिचतु
र्थःप्रक्रमःशेषंपूर्वेणव्याख्यानंविश्वेदेवायजूंषिअग्निनादेवेनपृतनाजयामिगायत्रेणछंदसात्रिवृतास्तोमेनरथंतरेणसाम्ना
वषट्कारेणवज्रेणपूर्वजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधेप्रत्येनान्नुदेस्मिन्क्षयेस्मिन्भूमिलोकेयोस्मान्द्वेष्टियंचवयंद्वि
ष्मोविष्णोःक्रमेणात्येनान्क्रामामीन्द्रेणदेवेनपृतनाजयामित्रैष्टुभेनछंदसापंचदशेनस्तोमेनबृहतासाम्नावषट्कारेणवज्रेणस

हजानूभ्रातृव्यानित्यादि। विश्वेभिर्देवेभिः एतनाजयामि जागतेन छंदसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेण परजानूभ्रा
मानित्यादि। अग्नि लक्षणेन देवेन गायत्री छंदोऽभिमानी देवतया त्रिवृत्स्तोमाभिमानी देवेन रथंतरसामाभिमानी देवेन वषट्कार लक्ष
णेन वज्रेण एतना शत्रूणां सेनाः जयामि जित्वा च पूर्यजानूमत्तः पूर्वजातान् शत्रून् धरान्पादयामि निकृष्टान् करोमि एतान् शत्रू
न् बाधे एतान् शत्रून् प्रतिनुदे किंच अस्मिन् क्षये ज्ञायतने भूलोके च ये स्मद्द्वेष्टारो स्मद्द्वेष्याश्च शत्रवः संति तान् एतान् विष्णुरूपस्य
ममानेन प्रथमक्रमेणातिक्रामामि एवमुत्तरयोरपि। अनुष्टुभौ। ये देवा यज्ञहनः पृथिव्यामध्यासते। अग्निर्मा तेभ्यो रक्षतु गच्छे
म सुकृतो वयं। ये देवा देवरूपधारिणो यज्ञहंतारः पृथिव्यामधिवसंति तेभ्यो देवेभ्यो मामयमग्निः पृथिव्यभिमानी रक्षतु तथा चाहं
सुयज्ञो भूत्वेष्टं प्राप्स्यां। ये देवा यज्ञमुषः पृथिव्यामित्यादि। यज्ञमुषो यज्ञापहर्त्तारः। शेषं व्याख्यातं। अनुष्टुप्। आगन्म मित्रा
वरुणा वरेण्या वरात्रीणां भागो युवयोर्यो अस्ति नाकं गृह्णाना सुकृतस्य लोके तृतीये पृष्ठे अधिरोचने दिवः। हे वरेण्या वरणीयौ
मित्रावरुणौ देवौ युवयोः संबंधिनीनां रात्रीणामहोरात्राणां यो भागो भोग्यांशोऽस्ति सुकृतस्य लोके भोगस्थाने तृतीये पृष्ठे इतश्च आ र राम
भ्य तृतीयस्थाने। रोचने रोचमाने दिवोऽधि स्वर्गलोके विद्यमानं नाकं सुखरूपं तं भागं गृह्णाना उपधाना इहैवस्तोकुमागन्म रस्थाग ४२
छेम अनुष्टुभौ। ये देवा यज्ञहनोंतरिक्षे ध्यासते। वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं। ये देवा यज्ञमुषोंतरिक्षे स्यादि पूर्वाभ्यां व्या

ख्याते। त्रिष्टुप्। यास्ते रात्रीः सवितर्देवयानीरंतरा द्यावापृथिवी वियंति। गृहैश्च सर्वैः प्रजया न्वग्रे सुवो रुहाणास्तरता रजांसि। हे सवितः सूर्य
ते तव संबंधिन्यो देवयाना पूर्वपक्षादिर्देवयानरूपा रात्रीः रमयंति भूतानीति रात्रयो लोकाः द्यावापृथिव्योर्मध्ये वर्त्तंते सर्वैः गृहैर्गृहजनै
श्च प्रजया च सहाग्रे प्रथमं सुवः सुप्रीयत इति सुरवं रुहाणा आरोहंतो वयं रजांसि पूर्वोक्तान् लोकांस्तरत तरेम प्राप्नवामेत्यर्थः। अनु
ष्टुभौ। ये देवाय यज्ञहनो दिव्यध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयं। ये देवाय यज्ञहनो दिवीत्यादि पूर्ववद्व्याख्येयं। त्रिष्टुप्। येनें
द्राय समभरः पयांस्युत्तमेन हविषा जातवेदः। तेनाग्ने त्वमुत वर्द्धयेमं सजातानां श्रैष्ठ्य आधेह्येनं। हे जातवेदो जातप्रज्ञ सूर्य येन
नमया दत्तेनोत्तमेन हविषा निमित्तेन इंद्राय इंद्रामन्नं धारयतीति इंद्राय वर्षणाय रश्मिभिः पयांस्यादाय समभरः संगृहीतवानसि
हे अग्ने अग्रणीः सूर्य त्वं तेन हविषा इमं यजमानं मां वर्द्धय। उतापि चैनं मां सजातानां श्रैष्ठ्ये आधिपत्ये आधेहि स्थापय। प्रजापति
प्रकृती छंदः। अगन्म सुवः सुवरगन्म संदृशस्ते मा छित्सि यत्ते तपः तस्मै ते मावृक्षि सुभूरसि श्रेष्ठो रश्मीनामायुर्धा असि आयुर्मे धेहि
वर्चोधा असि वर्चो मयि धेहीदमहममुं भ्रातृव्यमाभ्यो दिग्भ्योस्यै दिवोस्मादंतरिक्षादस्यै पृथिव्या अस्मादन्नाद्यान्निर्भजामि निर्भक्तः स
यं द्विष्मः सज्योतिषाभूवं। हे आदित्य त्वत्प्रसादात् प्रथमं सुवः फलभोगस्थानं सपुत्रपौत्रा वयं गम्यास्म ततो मोक्षद्वारं सुवरादित्यलोकं
गम्यास्म संदृश्यमहं तव संदृशः करांशान्मा छित्सि विच्छिन्नो माभूवं तेतदृश्यं यत्तयोस्माभिरनुष्ठास्यते तस्मै तपसे नैनत्वानुग्रहात् मावृक्षि

आसमंतात्ऊक्ष्णोविछिन्नोमाभूवंत्वंसुभूरसिसुष्टुभवस्कदेतीतिसुभूःरश्मीनांरश्मियुक्तानांचेंद्रादीनांमध्येश्रेष्ठोसिआयुषस्थाप
यितासिअतोमय्यायुःस्थापयएवंब्रह्मवर्चसस्यस्थापयितासिअतोमयिब्रह्मवर्चसंस्थापययोभ्रातृव्योमदीयोवैरीपृथिव्या
दिलोकत्रयेप्राच्यादिदिक्षुममविरोधमाचरतिमदीयमन्नाद्यंचापजीहीर्षति।अमुंभ्रातृव्यंततपृथिव्यादेरिदंनिर्भजामि।श्री
43 ब्रमेवनिःसारयामि।इदानींविरोधमनाचरंतमपिकालांतरेतदाचरणशंकयायंभ्रातृव्यंवयंद्विष्मःसोपिनिःसारितःअ
हमादित्यज्योतिषासंभूयासं।विश्वेदेवाअनुष्टुप्।उद्यन्नद्यमित्रमहःसपत्नान्मेअनीनशः।दिवैनान्विद्युताजहिनिम्रोचन्न
धरान्कृधि।हेमित्रमहअनुकूलतेजोयुक्तादित्यत्वमुद्यन्नुदयंगच्छन्।अद्यैवाह्निमेसपत्नान्शत्रूननीनशोनाशयतत्प्रकारउ
च्यते।दिवैनान्विद्युताविद्योतमानयातीक्ष्णभासाएनान्शत्रूंजहिनाशय।अथनिम्रोचन्नस्तंगच्छन्अधरान्निकृष्टान्कुरु।उ
द्यन्नद्यविनोभजपितापुत्रेभ्योयथा।दीर्घायुत्वस्यहेशिषेतस्यनोदेहिसूर्य।हेसूर्यअद्यास्मिन्नेवाह्निउद्यन्त्वंनोस्मभ्यंविभजध
नादिकंपृथक्पृथक्देहितत्रदृष्टांतः।यथालोकेपितापुत्रेभ्योविभज्यददातितद्वत्किंचदीर्घायुत्वस्यहेशिषे।दीर्घायुत्वस्यापित्व राम ४३
मीशिषेसमर्थोसिनोस्मभ्यंतस्यत्दीर्घायुष्ट्वंदेहि।उद्यन्नद्यमित्रमह।आरोहन्नुत्तरांदिवं।हृद्रोगंममसूर्यहरिमाणंचनाशयामि
त्रमहअनुकूलतेजोयुक्तसूर्यअद्यास्मिन्दिनेउद्यन्नुत्तरांअतिशयेनोत्कृष्टांदिवमारोहन्ममहृद्रोगंमनःपीडांहरिमाणंचह

रितंतांशोकप्रभवैवर्णंव्याधिप्रभवंविरूपतंचनाशय। शुकेषुमेहरिमाणंरोपणाकासुदध्मसि। अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि। मेम
दीयंहरिमाणंहरितवर्णंशुकेषुपक्षिविशेषेषुतत्रापिरोपणाकासुत्त्विड्ज्ञातिषुदध्मसिस्थापयतेहिहरिमाणंप्रार्थयंते। अपिचहारिद्र
वेषुहरितालद्रुमेषुहरिमाणंनिदध्मसिनितरांस्थापयामः। उदगादयमादित्योविश्वेनसहसासह। द्विषंतंममरंधयंन्मोअहंद्विषते।
रधंत्र्यमादित्योविश्वेनसहसासर्वेणापिबलेनसहोदगादुदयंप्राप्तवान्किंकुर्वन्ममद्विषंतंशत्रुंरंधयन्हिंसयन्यस्मादयमेवं
कुर्वन्नुदेतितस्मादस्यप्रसादादहंद्विषतःसकाशान्मोरहंमैवंहिंसांप्राप्तवानि। योनःशपादशपतोयश्चनःशपतःशपात्। उषाश्च
तस्मैनिम्रुक्चसर्वंपापंसमूहतां। अशपतोनाक्रोशतोनोस्मान्यःशपात्शपति। अधिक्षिपति। यश्चान्यःशत्रुःशपतोधिक्षेप
तोस्मान्शपात्। प्रत्यधिक्षिपतितस्मैनदर्पंतस्मिन्नस्थापयतुं। उषाश्चनिम्रुक्चउदयास्तमयदेवौअहोरात्रेदेवौवासर्वपापम
स्मदीयंसमूहतीसंगतंकृत्वातस्मिन्नेवस्थापयितां। प्रजापतिर्यजुः। ऐंद्रिमावृतमन्वावर्ते। परमैश्वर्ययोगादादित्यइंद्रःतदीयमा
वर्त्तनं। अन्वहमपिप्रादक्षिण्येनावर्तते। वामदेवोयजुषी। इदमहममुष्यामुष्यायणस्यप्राणंनिवेष्टयामि। अमुष्येतन्नामकस्याम
कस्यामुष्यायणस्यैतद्गोत्रस्यैनदपत्यस्यवाप्राणमहमिदंन्निवेष्टयामि। इदानींनिगृह्यनिवेष्टयामि। पुण्याभवंतुयालक्ष्मीःप
राभवंतुयाःपापीःयालक्ष्मीःसंपदःताःममपुण्याःपुण्यहेतवोभवंतुयाःपापीःपापहेतवःपापफलंचापिपदःताःपराभवंतु। प्र

जापतिर्यजूंषि। सममहं प्रजया सं मया प्राजा सम ह ऽ राय: स्पोषेण सं मया राय स्पोष:। अहं प्रजया संगतो भूयासं। प्रजापि मया संग
ता भूयात्। रायस्पोषेप्येवं योज्यं। समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासं। हे अग्ने अनया समिधा प्रदीप्तस्त्वं मेम दर्थं दी
दिहि दीप्यस्व तव दीपयिताहमपि। त्वत्प्रसादाद्दीप्तभूयासं। वसुमान्यज्ञो वसीयान् भूयासं। हे अग्ने अयं यज्ञस्त्वत्प्रसादाद्वसु
मान् धनवा अहं मपि त्वत्प्रसादाद्वसीयान् वसुमत्तरो भूयासं। विश्वेदेवा अनुष्टुप्। यो नः सपत्नो लीयो रणो मर्त्तोभिदासति दे
वा:। इध्मस्येव प्रक्षायतो मा तस्योच्छेषि किंचन। हे देवा यो मर्त्तो मनुष्यो स्मा कं सपत्न: शत्रुसन्न नर्थं चिंतयति यश्चास्माभि: स
ह रणो युद्धकारि सन्नभिदासति उपजपति। तस्यो भयस्य सर्वं धि किंचन धनादिकं मो च्छोषि अवशिष्टं मा कुरु। किंतु तत्सर्वं वि
नाशय। यथा प्रक्षायत: प्रकर्षेण क्षीयमाणस्य दह्यमानस्येध्मस्य काष्ठस्य न कोप्यंशो वशिष्यते तद्वत्। प्रजापतिर्गायत्र्यो अ
ग्न आयूंऽषि पवस आसुवोर्जमिषं च न:। आरे बाधस्व दुच्छुनां। हे अग्ने पुत्रपौत्रादियुक्तान स्माकमायूंषि पवसे शोधयसि
अपमृत्युं परिहरसीत्यर्थ:। नोस्मभ्यमूर्ज बलमिषमन्नं समंतात्सुव: प्रेरय देहीत्यर्थ:। दुच्छुनां वैरिसेनामारे दूरे बाधस्व निराकुरु। राम ४४
अग्ने पवस्व स्वपा अस्मे वर्च: सुवीर्यं। दधत्पोषं ऽ रयिं मयि। केसरातो प: शद्व:। कर्मवाची शोभनमप: कर्मयस्यासौ स्वपा:। हे
अग्ने त्वं स्वपा: अस्मे अस्मान् पवस्व शोभयमयि ब्रह्मवर्चसं व्यवहारसामर्थ्यं पुष्टिं धनं च स्थापय। यजु:। अग्ने गृहपते सुगृह

पतिरहंत्वया गृहपतिना भूयासं सुगृहपतिर्मया त्वं गृहपतिना भूयाः शतं हिमाः। अयमग्निरस्मिन् गृहे सर्वदा धार्यत इति गृहपतिरि
त्युच्यते। हे गृहपते ग्ने गृपतिना त्वयानुगृहीतोहं शतं हिमाः शतं हेमंतान् शतसंवत्सरान् सुष्ठु गृहपतिर्भूयासं त्वमपि गृहपतिना म
यापूजितः सुष्ठु गृहपतिर्भूयाः। यज्जुषि। तामाशिषमाशासे तंतवे ज्योतिष्मतीं तंतवे अनुत्पन्नपुत्रोत्पत्तये ज्योतिष्मतीं तदुत्प
त्तिप्रकाशनसमर्थां तामाशासे मुष्मै ज्योतिष्मतीं। अमुष्मै देवदत्तादिनामकायोत्पन्नपुत्राय ज्योतिष्मतीमभिवृद्धिप्रकाशन
समर्थां तामाशिषमाशासे। वामदेवो यजुः। ज्योतिषे तंतवे। मानुषात्। असौ देवदत्तादिशर्मे प्रियपुत्रज्योतिषे इष्टप्राप्तौ ज्योति
र्भूताय तंतवे पुत्रादिलाभाय त्वां लब्धवानस्मि त्वं मामनुमामनुसृत्य पुत्रपौत्रादिभिर्विस्तीर्णो भव तत्तवदैव्यो देवसंबंधी। तंतुरा
द्दितो ग्निप्रछिन्नो स्तु मनुष्यः पुत्रादिरूपस्तंतुं समाछेदि विछिन्नो मा भूत्। तथा वाहं व्याख्यामनः सत्कर्मफलभूतात्। स्वर्गादिस्था
नात्। माछित्सि विछिन्नो मा भूयासं। तथा मानुषात् सुसंतानरूपाच्च। धाम्नो माछित्सि विछिन्नो मा भूयासं वामदेव्येगायत्री।
अग्ने वह्नेस्वदितंन्नस्तये ने पितुं पच। शंनोकाय तनुवे स्योनः। हे अग्ने दक्षिणाग्ने वह्ने अन्वाहार्यादेः प्रापकत्वं नस्तनये। पुत्रा
दिरूपे यजमाने स्वदितं सुखादनयोग्यं पितुमन्नमन्वाहार्यादिरूपं पच स्योनः सुखकरः शंनोकायापत्यायतनुवे शरीराय च
शं सुखं प्रयच्छेत्यर्थः यजुः। ज्योतिरसि तंतवे हे पुत्र त्वं ज्योतिपुरुषार्थप्रकाशकं तेजोसि तंतवे संतानाविछेदाय भवेत्यर्थः। प्रजा

पतिर्यजूंषि। कस्त्वायुनक्ति स त्वा विमुञ्चतु। हे यज्ञ पूर्वकः प्रजापतिस्त्वां युनक्ति युक्तवान् स एवेदानीं त्वां विमुञ्चतु। सोमो यजूंषि। अग्ने व्रतपते व्रत
मचारिषं तदशकं तन्मेराधि। वायो व्रतपत इत्यादि। आदित्य व्रतपत इत्यादि। व्रतानां व्रतपत इत्यादि यज्ञरूपस्य व्रतस्य पते। हे अग्ने त्वत्प्रसा
दादिदं व्रतं चरितवानस्मि तद्व्रतं समापयितुमशकं शक्तो भूवं मदीयं तद्व्रतमारोधि समृद्धमभूत्। एवमुत्तरेष्वपि व्याख्येयं। प्रजापतिर्ज।
45 गती। यज्ञो बभूव स आ बभूव स प्रजज्ञे स वावृधे। स देवानामधिपतिर्बभूव सो अस्माँ अधिपतीन्करोतु वयं स्याम पतयो रयीणां। इदा
नीमनुष्ठितोयं यज्ञो बभूव संपूर्णोभूत्। स यज्ञो आ बभूव पुनरावृत्तो भवतु। स यज्ञः प्रजज्ञे। अस्मान्नालस्येनानुष्ठानात् न प्रतिज्ञात गत्।
अत एवास्मत् गृहे स यज्ञो वावृधे पुनः पुनरवर्धत स यज्ञोस्माभिरिज्यमानानां देवानामधिकं पालयिता भवतु। स यज्ञोस्मान्नप्यधिप
तीनधिकमनुष्ठानस्य पालकान्करोतु। वयमपि तस्य यज्ञपुरुषस्य प्रसादाद्रयीणां यज्ञसाधनानां धनानां पतयो भूयास्म। त्रिष्टुप्।।
गोमाँ अग्ने विमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः। इडावाँ एषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान्। हे अग्ने पुन राम
रावर्तमानाय प्रार्थ्यमानो यज्ञ एतैर्विशेषैर्विशिष्टो भूयात्। बहवो गावो यस्य संतीति गोमान्। एनमविमानसीति यो ज्यं नृवत्सर्वैश्च ४५
त्विग्रूपैर्मनुष्यैर्युक्तो देवाः सखायो यस्य यज्ञस्य तादृशः सदमित्सदैव प्रमृष्यो न भिभवनीयः इडावान्नवान् प्रजावान् बहुपत्यप्रदः। दी
र्घः पुनः पुनरनुष्ठानादविच्छिन्नः रयिः बहुधनोपेतः पृथुबुध्नो विस्तीर्णमूलः। मंत्रेष्वनुष्ठाने न च मूलेषु वैकल्य रहितः सभावान्न।

विकलं यज्ञं दृष्टुमिच्छं स्वामहत्या विद्वत्त्वमया युक्तः असुः प्राणः सोस्यास्तीत्यसुरः असुरप्राणवन्न गन्ने एष पुनः प्रार्थ्यमानेयज्ञ उक्ते विशेषेवि
शिष्टो भूयात्। वामदेवो यजुः। यज्ञ शं च म उप च म आयुश्च मे बलं च मे यज्ञ शिवो मे संतिष्ठस्व यज्ञ स्विष्टो मे सं। तिष्ठस्व यज्ञारिष्टो मे सं तिष्ठ
स्व। हे यज्ञ मे मह्यं त्वं शं च सुखात्मा भूयाः मे उप च उपसन्नः सुखसाधनं च भूयाः मे आयुश्च देहि तथा मे बलं च देहि हे यज्ञ मह्यं शिवो मं
गलप्रदः सन् तिष्ठस्व संपूर्णो भव हे यज्ञ मे स्विष्टः सम्यगिष्टः सन् संतिष्ठस्व हे यज्ञ मे अरिष्टः अविकलः सन् संतिष्ठस्व। अग्निर्यजुः।
वृष्टिरसि वृश्च मे पाप्मानमृतात्सत्यमुपागां पाप्मानं मृत्तीति। वृष्टिर्नाम प्रजापतिर्देवता जलेध्यारोप्योच्यते। हे जल यतस्त्वं वृष्टिरसि
अतो मे पाप्मानं वृश्च छेदय। तत् संस्पर्शान्तेन विपाप्माहमृतात्सत्यादित्याराधनरूपाद्यज्ञात्सत्यमवाध्यमात्मतत्त्वमुपागां प्राप्तो भूवं
अनेनान्तोपि मंगलमनुष्ठितं भवति आत्मानुसंधानस्य परममंगलत्वात्। वामदेवो यजुः। ब्राह्मणान् संतर्पयितवै। हे परिवारकाः ब्राह्म
णान् ऋत्विजोन्यांश्च तर्पयितेवै तर्पयत भोजनादिभिः। अत्र तावदाश्वलायनानुसारेण प्रयोगः। यथागतमाहवनीयं प्रत्यागते च ऋत्विक्षु
होताहवनीयवायव्यदेशे तस्थायस्रुवेणाज्यस्थाल्या आज्यमादाया श्रेत्यतो देवाइति द्वाभ्यां व्याहृतीभिर्विहृताभिः समस्ताभिश्चा
नाम्नात स्वाहान्ते स्वाहाकारं प्रक्षिपन्नाहवनीये हुत्वा यजमानेन क्रमेणाग्नये विष्णवेग्नये वायवे सूर्याय प्रजापतये इदस्कद्दिश्यत्यक्ते।
ओं च म इति संस्थाजपेनोपस्थायोत्करे प्रणीतामध्येन निश्च निमयथमः स्यात्। अथाध्वर्युः स्थाल्या ध्रुवायाया वाज्यमवघनं ध्रुवा

५८

याम्नप्रत्यवदानमाप्याययन्स्रुवेणजुहावाजुह्वावेत्समवदायप्रस्ताहुत्यवद्यन्वाब्रह्मप्रतिष्ठित्यारभ्यभूर्भुवः सुवःस्वाहेत्यंतंद्विचत्वारिं
शतमाहवनीयेजुहोतियजमानोयथायोगमुद्दिश्यत्यजति। ब्रह्मप्रतिष्ठा। ब्रह्मणे। आश्रावितं। यज्ञाय। यह्वोदेवाः। मरुद्भ्यः। ततंमआपः।
अभ्युभ्यः। उद्वयं। उदुत्यंचित्रंदेवानां। सूर्याय। इमंमेवरुणतत्त्वायामि। वरुणाय। त्वन्नोअग्नेसत्वन्नोअग्ने। अग्नीवरुणाभ्यां त्वमग्ने
अयासि। अग्नये। प्रजापतेयेनत्वत्। प्रजापतये। इष्टेभ्यइत्यष्टानांप्रजापतयेइष्टेभ्यइत्यादिरूपेणवात्यागः। अयाश्चाग्नेसि। अ
ग्नये। यदस्मिन्यज्ञे०। देवेभ्यः। आज्ञातं। जातवेदसे। यत्कर्म। यदस्यकर्मणः। अग्नयेस्विष्टकृते। यत्तइंद्रस्वस्तिदा। इंद्राय। आभिर्गि
भिः। इंद्रायहरिवते। अनाज्ञातंपुरुषसंमितः। यत्पाकत्रा। अग्नये। यद्विद्वांसः। अग्निश्चह्वादेवीभ्यां। अयाउग्निः। जातवेदसे। येते
शतं। वरुणेंद्रसवितृविष्णुविश्वेदेवमरुद्भ्यः। योभूतानांरुद्राय। उद्बुध्यध्यस्व। उदुत्तमं। वरुणादित्याभ्यां। व्याहृतीनां। अग्नये। वा
यवेसूर्यायप्रजापतयइतिअथाध्वर्युराप्याययतामितिध्रुवामाप्याय्यांतर्वेद्यूर्ध्वस्तिष्ठन्देवागातुविदोगातुंवित्वा०वाचिस्वाहेत्यत्रब्र
हिरनुप्रहरन्वातेधास्वाहेतिध्रुवयातदाज्यंसमिष्टयजुर्जुहोतियदियजमानःप्रवेसेप्रजापतेर्विभान्नितिध्रुवायांयजमानभागमवधा राम
यपूर्ववत्समिष्टयजुषासहजुहोतियजमानोदेवेभ्योगातुविद्भ्योवातायेदंनममेतिउक्त्वावसुर्यज्ञइतिअदइतिपदस्थानेस्वेष्टनामगृह्ण ४६
न्हुतमनुमंत्र्यसंयज्ञपतिराशिषेतियजमानभागंदधिक्राव्णइतिसायंदोहंइदंहविरितिद्वाभ्यांप्रातर्दोहंप्राश्ययथायोगमाचाम

स्वब्राह्मणेनसान्नाय्यंप्राश्यास्याध्वर्युरभिस्तृणीहिं॰ब्रध्नइतिहोतृषदनैर्वेदिमभिस्तीर्यांतर्वेदिप्रणीतासाद्याकोवोयोक्षीदितिना
विमुच्यतासुसंततामुदकधारांस्रावयतियजमानः।सदसिसन्मेभूयाइत्यानीयमानायांजपित्वाप्राच्यांदिशीत्येतैर्यथालिंगंप्र
णीतोदकंव्यकसिञ्चकसिञ्च्यसमुद्रंवइत्यंतर्वेदिशेषंनिनीयंत्याद्दब्धुतेसरस्वतीतिद्वाभ्यांतदुदकेनमुखंविमृज्यापउपस्पृशतिअथाध्व
र्युर्यदेवाः।उपवेषोपविद्धीतिद्वाभ्यांमूलादाभ्योल्करपांसुमुपुरस्ताद्भागेनप्रागग्रंप्रत्यगुपवेषमुपगूहति।यदियजमानोभिचरेद्वोपवे
षइतिद्वेष्यनामामुमित्यत्रद्वितीयांतमुपवेषमुत्करेप्रहृत्यनिरमुंइहितिस्तनः।परमांत्वाहतोसौअवधिष्मामुमितिपंचभिरदः शब्दस्था
नेद्वेष्यनामगृहीत्वानुपवेषंनिरस्पनिरवेनेद्वावसृष्टइतिवानिरस्येन्निरस्वनेद्वायद्वायोपवेषइतिनामगृहीत्वानुत्कासैमेदोवदत्तायेतिनाम
गृहीत्वाप्रहृत्यनिरमुमितिपंचभिरवसृष्टमित्येकेनोपवेषमुत्करेप्रहरेन्निरस्येन्निरस्वनेद्वाअथापउपस्पृशति।यानिघर्मइति।
प्रतिकपालंगणंमंत्रमावृत्यकपालानिविमुच्ययजमानेनसह।यानिघर्मइतिजपित्वाकपालानिसंख्यायोद्वासयति।अथब्रह्म
रिवोभागोसीतिब्रह्मभागंप्राश्याचम्यायाउग्निःप्रणीयस्वेतिद्वाभ्यामाहवनीयमुपस्थायययेतंप्रतिनिष्क्रामति।अथयजमानो
विष्णोःक्रमोस्यभिमातिहाविष्णोःक्रमोस्यभिशस्तिहाविष्णोक्रमोस्यरातीयतइतित्रिभिर्द्विषइत्यंतैःदक्षिणेनैवपदासव्यंपुरस्ता
दनयन्दक्षिणेनैवेदिसीम्निवीन्विक्रमक्रमानुत्तरोत्तरमधिकंप्रागपवर्गमाहवनीयमनतिक्रामन्नक्रांत्वातृतीयेस्थित्वाविष्णोःक्र

मोसि शत्रूयत इति चतुर्थं जपति यद्वा तूष्णीं चतुर्थं क्रमं क्रांत्वा तत्र स्थित्वा चतुर्थं जपति अग्निना देवेन पृतना जयामि गायत्रेण। इंद्रेण देवे
न पृतना जयामि त्रैष्टुभेन विश्वेभिर्देवेभिः पृतना जयामि जागतेनेत्येना क्रामामीत्यंतान् स्त्रीन् विष्णुक्रमानुक्त्वा। ये देवा यज्ञह
47 नः पृथिव्याः ये देवा यज्ञमुषः पृथिव्याः। आगन्म मित्रावरुणेति प्रथमं। ये देवा यज्ञहनोंतरिक्षे। ये देवा यज्ञमुषोंतरिक्षेयास्ते रा
त्रिति द्वितीयं ये देवा यज्ञहनो दिवि। ये देवा यज्ञमुषो दिवि। ये नेंद्राये ति तृतीयमिति त्रीनतिमोक्षान्वदति। यद्वोक्तप्रकारेणैकं विष्णु
क्रममुक्त्वैकं विष्णुक्रमं तिक्रममुक्त्वैकं तृतीयमतिमोक्षमुक्त्वाथ द्वितीयं विष्णुक्रमं क्रांत्वा द्वितीयो विष्णुक्रमतिक्रमातिमोक्षावुक्त्वाथ तृती
यं क्रांत्वाथ तृतीया उक्त्वा यथापूर्वं चतुर्थं जपति यद्वोक्तप्रकारेण केवलान् विष्णुक्रमान् क्रांत्वा चतुर्थं जपित्वा गन्म सुवरिति। उद्यन्नद्ये
ति षड्भिरादित्यमुपस्थायैंद्रीमावृतमिति प्रदक्षिणमावृत्याभिचरंश्चेदिदमहमिति दक्षिणपादपार्ष्णिं भूमिं निपीडयंति। अथ पुण्या
भवं स्वस्तिकृत्वा समहमिति प्रसव्यमावृत्य समिद्धो अग्न इति आहवनीयमुपसमिद्धो अग्न इति आहवनीयमुपसमिध्य वसुमा राम
न् यज्ञो यो नः सपत्न इति। चं। तमुपस्थाय आग्न आयूंषीति द्वाभ्यां अग्ने गृहपत इति च गार्हपत्यमुपस्थाय तत आशिषमाशास्ते ४७
तंतवे ज्योतिष्मतीमित्युक्त्वा विद्यमानपुत्रस्त्वाशिषमाशासे अमुष्मै ज्योतिष्मतीमिति वा अमुष्मा इत्यंते चतुर्थ्यंतं पुत्रनाम गृह्णान्नापु
त्रनाना त्वेक्रमेण नामान्युक्त्वा यावत्पुत्रमावर्तयन्वोक्त्वा विद्यमानप्रियपुत्रस्तु ज्योतिषे तंतवे असावित्यत्र संबुध्यंते सन्नाम गृह्णी

तात न्ना हेमंत्रमावर्त्तयन्नुत्का अग्ने वहूह इति दक्षिणाग्निमुपस्थाय ज्योतिषे त्वं तवेवेत्ते ति पूर्ववदुदनुप विश्य ज्योतिरसि तंत वइ त्तिजपित्वा वेदन्तृणा
न्युपस्थ आधायये देवाइत्यति मोक्षांजपित्वा कस्त्वा युनक्ती ति यज्ञं विमुच्याग्ने व्रतपते व्रतमचारिष मिति यथाव्रतग्रहणेनैतं विसृज्य
यज्ञो वभूवे ति प्राङ्मुखो देवत्यगोमानि ति जपित्वात्र वा पूर्ववद्यजमानभागं प्राश्याचम्य यज्ञं शं च मइ ति जपित्वा वृष्टिरसित्यपउपस्पृश्य
ब्राह्मणाः स्तर्पयितवाइति परिचारकान्संप्रेष्यति प्रवसंस्तु स्वेस्वे औपवसथ्यादिकाले सर्वानूयाजमानमंत्रां जपति। तत्रैव प्राचो वि
ष्णुक्रमान् क्रामति प्राङ् देवत्यगोमतीं जपति। आपस्तंबीये त्वयं विशेषः। न संतिहोतृ प्राय श्चित्तहोमाः। न च संस्थाजपः। अत्र वेदस्त र
णपक्षे यजमानो तं वेदिं वेदमुपस्थ आधायये देवाइत्यति मोक्षांजपित्वा होत्र पूर्ववद्धे देस्त्वी ऐ पूर्ववद्यजमानभागं प्राश्याचम्य कस्त्वा
युनक्ती ति यज्ञं विमुंचति इतरत्र तु वेदतृणान्याधाया ति मोक्षां जपति। यज्ञं विमुंचतीति। सर्वमन्यत्समानं। संतीडासूक्तवाक शंयु
वाकानां होतृनिगदनसंयुक्तास्त्रयः कर्म विशेषाः। ते छिडांतावद्द्रव्यभेदेनो भयोरप्याहवनीय गार्हपत्ययो र्नियता हविरिडा आहव
नीये आज्येडा गार्हपत्य इति तथा सूक्तवाक शंयुवाका नपि सूत्रकारां तयमविकल्पाभ्यामुभयत्रेष्यते। सूत्रकारस्तु तावेकत्रैवेच्छन्
हविरिडानंतरमाहवनीये पूर्वमभिहितवान्। इदानीं तान्ज्येडानंतरं गार्हपत्येयतोस्या तांनाहवनीये इत्याह। शंय्ववंतं वा हवनीयं संस्था
पयदाज्येडांतं गार्हपत्ये इडांतं वाहवनीये शंय्वतं गार्हपत्ये तत्र तावद्वाभ्यां नाशदाभ्यां द्वावेव कल्पौ विकल्प्येते न चत्वारः। आहवनीय।

गार्हपत्यशब्दाभ्यांचगार्हपत्यात्पूर्वापरदेशौलक्ष्यतेअनग्निसंयोगित्वादिडायाःशंयुवंतंपश्चात्त्वादितिलिंगाच्चैतद्यमर्थः।।
यत्पूर्वदेशसंयुक्तमिडादिकर्मतद्यथाप्रसिद्धमेवशंयुवाकांतंकुर्यात्।अपरदेशसंयुक्तमप्याज्यैडांतमितिप्रथमःकल्पःसच
पूर्वोक्तविकल्पः।उत्तरविकल्पार्थमनुदितोवेदितव्यः।यथाचैत्रोभोजयइत्युक्तेचैत्रोवाभोज्यतांमित्रोवेति।द्वितीयस्तुकल्पइ
डांतमेवसंस्थापयेत्पूर्वदेशेनंतुसूक्तवाकशंयुवाकौतत्रभवतः।तौतुत्वपरदेशेभवतइतियदात्वपरदेशेभवतः।तदेवंप्र
योगइत्याह।यदिशंयुवंतंपश्चात्त्वाद्वेदात्तृणमपादायजुह्वामग्रमंज्यात्।स्रुवेमध्यमुपभृतिवाज्यस्थाल्यांमूलंतस्यप्रस्तर
लेवेल्पः।सूक्तवाकाद्याशंयुवाकात्।यदिशंयुवंतंकर्मपश्चाद्देशेस्यात्।तदाज्यैडानंतरंप्रस्तरस्थानेवेदतृणमंक्त्वानद्धदेवप्रह
रतितत्रसूक्तवाकाद्यविकृतावाशंयुवाकादित्यर्थः।प्रस्तरप्रहारस्तुनिवर्ततेप्रत्याम्नानात्।परिधिप्रहारस्तुभवत्येवस्वकालेप्रा
प्तत्वादप्रत्याम्नातत्वाच्चनचैषांगार्हपत्येप्रहारः।शंयुवाकानंगत्वादाहवनीयसंयोगित्वाच्च।तथान्येषामपितत्तद्देशसंयोगिनांत राम ४८
त्तत्तत्रयथाकालंप्रयोगोवगंतव्यः।अत्रप्रयोगः।प्रागुक्तएवप्रथमःकल्पेद्वितीयेत्वयंविशेषः।इडामार्जनानंतरंचतुर्धाकर
णादिपरिध्यंजनानंतरंपत्नीसंयाजाः।आज्यैडांततोवेदात्तृणंन्यपादायजुह्वामग्रंस्रुवमुपभृपभृतिवामध्यमा
ज्यस्थाल्यांमूलमितिअंक्त्वायुषेत्वेतितदेकदेशमपादायप्रज्ञातंनिदध्यात्ततोवेदतृणस्यसूक्तवाकादिशंयुवाकांतोविधिःप्र

स्तरवद्भवतित्ततोनूच्यमानेशंयुवाके आहवनीयेपरिधिप्रहरणंसंस्रावहोमः हविः शेषभक्षणं ततः संपत्नीयदियथापूर्वमीन्तादिति।
केवित्तुसंस्थापनशब्दोचित्याद्दर्शपूर्णमासयोरेवेमौरवंडसंस्थाविकल्पाविद्याचक्षतेतथाहिसंतिष्ठेतेदर्शपूर्वमासाविति पूर्वापरदे।
शसंयुक्तसमग्रसंस्थाकल्पमुक्त्वाशंय्वंतंवाहवनीयेसंस्थापयेदित्यादिनान्यौरवंडसंस्थाकल्पाउच्यंते। तत्रपूर्वदेशसंयुक्तमाध्व
र्यवंतंत्रंशंयुवंतमेवपरदेशसंयुक्तमाज्येडांतमेवेत्यतः कल्पः द्वितीयस्तुपूर्वदेशसंयुक्तंतंत्रंहविरिडांतमेवपरदेशसंयुक्तंशंयु
वंतंतत्राज्येडानंतरंवेदतृणस्यप्रस्तरवद्दाज्यनादिसूक्तवाकेनप्रहारणस्य। तत्रनावत्तूप्रथमकल्पेप्रयोगः। आहवनीयेशंयवंतमित्ति
संस्रावस्यपरिधिप्रहरणांगत्वेसंस्रावांतंनहविः शेषभक्षणंपरिधिप्रहरणानंगत्वेसंस्रावहविः शेषभक्षौनारिष्ठांतहोमेस्वि
ष्टकृतिचधौवाज्यस्यपरिसमाप्तिः। अथपत्नीसंयाजाः देवपत्नीभ्यः पुरस्तादुपरिष्टाद्वासंपत्नीयमेहौ। नाज्येडायायजमानवेदा
भिमर्शनं। अनध्वर्युसंवंधात्। आहवनीयगार्हपत्यसंवंधीतरपरिसंख्यानात् हूयंतेदक्षिणाग्निहोमाः। शंय्वंताज्येडांतादित्ति रि
क्तंतंत्रमात्रपरिसंख्यानान्नदक्षिणाग्निहोमाइत्यन्येहोतुः पत्न्यैवेदप्रदानाद्विवेदस्तरणांतं अथाध्वर्योरन्यः पूर्णपात्रमानयात्ति
मुखविमार्जनादिपत्नीसंस्कारार्थमध्वर्युसंवंधान्निवृत्तिरित्यन्ये अथहोतुः प्रायश्चित्तहोमसंस्थाजपौसंतिसर्वप्रायश्चित्तानि
जुह्वास्रुवेणवाजुहोतीत्येवसिद्धेसर्वप्रायश्चित्तानीतिविशेषाभिधानस्यसर्वसंस्थार्थत्वात्। अज्ञातदोषनिर्घातनार्थत्वस्यचसंन

वात्प्रायश्चित्तप्रश्नेइष्टेस्पइत्यष्टावाहुतयः सर्वप्रायश्चित्तैः प्रत्याम्नाताः तेचेवं एवंडसंस्थार्थास्त एवहोतव्याइत्येके शंयुवंतातिरिक्त
पूर्वदेवसंयुक्तं तंत्रमात्रपरिसंख्यानान्नसर्वप्रायश्चित्तानीत्यन्ये। नसमिष्टयजुः। नचवर्हिरनुप्रहारः। नापिहोतृषदनैःवेद्यभि-
स्तरणं। प्रणीताविमोकमकृत्वाधारांस्त्रावयतिसदसीत्यादियाजमानंपूर्ववत् अध्वर्युसंबंधान्नास्तीत्यन्ये। नोपवेषोद्वासनंक
49 पालविमोचनंनापितज्जपः। ब्रह्मणः प्राशनोपस्थाननिष्क्रमाः। ततोविष्णुक्रमादियाजमानमांतादिति। द्वितीयकल्पप्रयोगे त्वयंविशे
षः। नानूयाजसमित्। यकृक्षोरूपमितिमंत्रयोरभावः। पूर्वप्राशित्रं अपेडा। इडाभक्षमार्जनानंतरं अन्यस्त्रतुर्धाकरोतियाजमानंपूर्व
वत्। अध्वर्युसंबंधान्नास्तीत्यन्येएवमन्वाहार्यमपिनानूयादि। अथाज्यलेपप्रक्षालनादिपत्नीसंयाजाः पुरस्ताद्देवपत्नीभ्यः पुरस्ता
द्वासंपत्नीयहोमः। आज्येडांततोवेदतृणमपादायजुह्वामग्रं स्रुवउपभृतिवामध्यमाज्यस्थाल्यांमूलमित्यंक्तातदवयवमायुषेत्वेत्य
प्यादायनिदधाति अथतस्यसूक्तवाकप्रहारादिशंयुवाकांतोविधिरविकृतः। प्रस्तरवद्भवति। नपरिधिप्रहारसंस्रावहविःशेषभक्षाः। राम
दक्षिणाग्निहोमादिसमानंतरवदांतादिति। संतिदर्शपूर्णमासयोरधिकारः वाक्यानिस्वर्गकामोदर्शपूर्णमासाभ्यांयजेतसर्वेभ्यःका ४९
मेभ्योदर्शपूर्णमासौयावज्जीवंदर्शपूर्णमासाभ्यांयजेतेत्यादीनितानीदानींव्याचष्टे। स्वर्गकामोदर्शपूर्णमासौ। कुर्यादितिशेषः। नि
त्यौदर्शपूर्णमासौयद्यप्यफलार्थिनानुष्ठेयौतथाप्येतौस्वर्गकामयमानस्यतमपिसाधसाधयतमित्यर्थः। एककामः सर्वकामोवा।

एककामइत्यनंतरस्तस्यस्वर्गकामस्यैवोत्तरविकल्पार्थोनुवादः। स्वर्गकामश्रुतेः स्वर्गकामोवा तौ कुर्यात्सर्वेभ्यः कामेभ्य इति श्रुतेश्च सर्व
कामोवेत्यर्थः। यदा तु सर्वकामस्तदा विशेषमाह। युगपत्कामयेताहारपृथक्त्वे वा दर्शपूर्णमासारंभीयमेव सर्वप्रयोगार्थं सर्वा
न्कामान्युगपत्कामयेत। आहारपृथक्त्वे आहारे आहारे प्रतिप्रयोगं वा। पृथग्गेकैकमित्यर्थः। ताभ्यां यावज्जीवं यजेत। आधान
प्रभृति यावत्तं कालं जीवति तावद्यजेत न कदाचिद्विच्छिंद्यादिति विच्छिंद्यात्प्रत्यवेयादित्यर्थः। प्रव्रजितस्य तु दीक्षितवत्प्रतिषेधा
देवनिवृत्तिरनग्निनग्नित्ववचनसामर्थ्याच्च। त्रिंशतं वर्षाण्येव वा यजेत। ततो विरमेत। जीर्णो वा विरमेत। यदा जरसाभिभूतः कर्म-
ण्यसमर्थः स्यात्तदा विरमेत। तद्विरमादेवतद्विकाराणां निवृत्तिर्न तु विरमेदग्निहोत्राद्यस्योक्तं कात्यायनेन। अग्निहोत्रमेव जुहुया
दिति। द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत यः कामयेत उर्ध्नुयामित्युक्त्वाहैकामेव यजेतेति। अथानयोः कर्मणोर्ऋद्धिकामस्य विशे
षः प्रदर्शयते यः कामयेत ऋध्यामिति स पौर्णमासीममावास्यां च स्वे स्वे काले द्वे द्वे यजेत। किमुक्तं भवति एकस्मिन्नेव पर्वणि पौर्णमासी
मभ्यस्येत् पंचदश्यां मेकां प्रतिपदीतरां यद्वा प्रतिपदि प्रथमां द्वितीयायां द्वितीयामिति। यथा स्याममपि यावज्जीवाद्यन्यतरपक्षे-
णेत्यर्थः। अद्वितीयमिति करणं तंत्रेणोपात्तं द्रव्यमित्युक्त्वाह एवमभ्यासमुक्त्वा पुनर्ब्राह्मणमुक्त्वा एकामेव यजेतेति। उभयोरप्येकां
अनभ्यस्तामेव यजेत न तु द्वे द्वे इत्यर्थः। तेन वैकल्पिकोभ्यास इत्युक्तं भवति। अत्र प्रयोगः। दर्शपूर्णमासाभ्यां यक्ष्ये ऋद्धिमवाप्नवानी

ति। पूर्णमासेनयक्ष्येऽहं इमवाप्रवानीति। दर्शेनतुदर्शेनयक्ष्येऽहमद्धिमवाप्रवानीत्येवंद्वयोरपियथापूर्वंचतुर्दश्यांअन्वाधायपर्वणि।
यागः। पुनःपर्वण्यन्वाधायप्रतिपद्यागइति। यद्वापर्वण्यन्वाधायप्रतिपदियागः। पुनःप्रतिपद्यन्वाधायद्वितीयायांयाग।
50 इति। आधिकारंदर्शपूर्णमासव्याख्यासुगंधिभिः। सूक्तिप्रसूनैःपुष्णातुपुमर्थान्पुरुषोत्तमः। इत्यापस्तंबीयाध्वरतंत्रस्वतंत्रव्या
ख्यायांप्रयोगरत्नमालायांतृतीयेप्रश्नेचतुर्थःपटलः॥ ॥कर्मब्रह्माध्वनीनस्यमंत्रिभूपतिभूपतेः। व्याचष्टेचौंडपाचार्योनुनिर्वा
प्यादिसत्क्रियां॥ अथोत्तरेणपटलेनदर्शपूर्णमासयोर्नित्याःकाम्याश्चाग्न्नुनिर्वाप्यगुणविकाराश्चोपदिश्यंते। संस्थाप्यपौर्ण
मासीःइंद्रायवैमृधायपुरोडाशमेकादशकपालमनुनिर्वपति। पौर्णमासीमनुनिर्वपतीतिवचनात्समुदायांगंवैमृधः। तेनपौ
र्णमासविकारेष्वपुनर्भवति। आमावास्येत्वस्यतंत्रमैंद्राग्नविकारत्वात्। समानतंत्रमेकेसमामनंतिसमानतंत्रंपौर्णमास्येकतंत्रं।
तस्ययाथाकामीप्रक्रमेप्रक्रमात्तुनियम्यतोतस्यवैमृधस्यप्रक्रमेयथाकामंदर्शपूर्णमासारंभदशायामेवारभ्यतेवानवा। अ
यंतुविशेषःप्रक्रम्यनियम्यतइति। एतदुक्तंभवतियदारभ्यतेनकदाचित्त्यज्यतेयदिनारभ्यतेनकदाचिद्भुज्यतइति। यथावैवै राम
मृधंप्रकृत्याहकात्यायनःपौर्णमासमन्वितिविकल्पइतिभारद्वाजश्चाहनित्यवदेकेसमामनंतिकाम्यवदेकेतंयदानिर्वपेन्नततं ५०
ऊर्ध्वविरमेदिति। समानतंत्रत्वनानातंत्रत्वयोर्यथाकामत्वंतत्रप्रक्रमान्नियम्यतइत्यन्ये। सप्तदशसामिधेनीकोयथाश्रद्धद

क्षिणः वैमृधइति शेषः। यथाह दक्षिणः अद्धपायऊवादिकं दीयंते सा त्रदक्षिणेत्यर्थः। पृथक्तंत्रत्वे चैमौ गुणौ नसमानतंत्रत्वे प्रधान
गुण विरोधात्। केचित्समानतंत्रेपि दक्षिणा समुच्चयमिछंति। प्रधानदक्षिणाया विरोधाभावात्। शर्धीवत्यौ संयाज्ये। अग्ने शर्द्धेयइति।
संयाज्यइति। सौविष्टकृतयाज्यानुवाक्ययोः समाख्या। पृथक्तंत्रे वैमृधस्य स्विष्टकृतएते शर्द्धवत्यौ याज्यानुवाक्येइत्यर्थः। विश्ववारा
त्रिष्टुप्। अग्ने शर्द्धमहते सौभगाय तव द्युम्नान्युत्तमानि संतु। संजास्पत्यं सुयममाकृणुष्व शत्रूयतामभितिष्ठा महांसि। हे शर्द्धि
वलवन्नग्ने महते सौभाग्याय तवोत्तमानि द्युम्नानि धनानि संतु। त्वंचास्माकं सुयमं सुखेन नियतं संजास्पत्यं समीचीनं ज्यायापत्यंगा
र्हस्थ्यं माकृणुष्व कुरु। किंचास्मान् प्रतिशत्रुत्वं विकीर्षतां। महांसि तेजांसि अभितिष्ठ आक्रम्य वर्त्तस्व। वामदेवो जगती। वातोपधूतइ
षिरोवशां अनु त्रिषु यदन्ना वेविषद्वितिष्ठसे। आतेयतंते रथ्योयथा पृथक् शर्द्धांस्यग्ने अजराणि धक्ष्यतः। हे अग्ने त्वं वातोपधूतो वा
युनोपजीवितइषिरइछावान् वशान् पदार्थाननुसृत्य त्रिषु स्रुक्षिप्रं अन्नानि वेविषद्व्याप्नुवन् तिष्ठसे विविधावर्त्तसेइति यदस्ति तेनते
रथ्यः परकीयारथिका यथायथा पृथग्गायतने पृथक्पावयंते तथा क्षराणि शर्द्धांसि अजेयानि परेषां वलानि धक्ष्यसे किमुक्तं। ना
नाविधं धनवदस्मदमित्रवलानि नाशयेत्यर्थः। अत्र प्रयोग उक्तः समानतंत्रत्वे। पृथक्तंत्रत्वे त्वयं विशेषः। पौर्णमास्यां ब्राह्मणतर्प
णानंतरं पात्राण्युपन्यायतनानि चशोधयित्वा प्रयतो यथापूर्वं प्राणानायम्य देशकालावुत्काइष्ट्यायक्ष्येइति संकल्प्य। विघ्नदसि

ऋत्विग्वरणं विहरणं। देवा गातुविदो जपः। अन्वाधानं अद्य यज्ञाय इमामूर्जं प्रथमां एषं हविः प्रणीतोपायनं बर्हिः इध्मस्त्रम दश सामिधेन्यः
नतस्त्वां त्रयोविंशतिधा वेदः यतः कुतश्चिदुपवेषः। समूहनोपलेपावग्न्यलंकारः परिस्तरणं। उभावग्न इति नास्ती। कर्मणे वामित्या
दि पात्रप्रयोगः। एकादशकपालानि पवित्रकरणं ब्रह्मवरणं प्रणयनादि इंद्राय वैमृधाय जुष्टं निर्वपामीत्यादि इंद्र वैमृध हव्यं रक्षस्व॥
अग्ने हव्यं रक्षस्वेंद्र वैमृध हव्यं रक्षस्वेति वा। इंद्राय वैमृधाय वो जुष्टं प्रोक्षामि। इंद्राय वैमृधाय जुष्टमधिवपामि कपालोपधानमैंद्रा
ग्नवत् इंद्राय वैमृधाय जुष्टं संवपामि सं यो मींद्राय मृधाय त्वेत्यादि तूष्णीमभिधारणं प्रियेणेत्यासादनं अयं यज्ञो यो नः कनीयो
ममाग्न इत्यनुवाकेनाष्टाभिर्वा पंचहोत्रा वाभिमर्शनं अप तमिंद्रो वैमृधो भुवनानुदतां। अयं वेद इत्यादि दृषधुपाजास्तं सवाध इति
धाय्ये पुरस्तात्समिद्वत्यौ। इंद्रं वैमृधमावह। देवां आज्यपामित्यादि। स्वाहेंद्रं वैमृधं स्वाहा देवा आज्यपा इत्यादि अग्निः प्रत्नेन सोम
गीर्भिष्ट्वा याज्यभागावनुवाक्ये इंद्राय वैमृधायानुब्रूहि। इंद्रं वैमृधं यज विन इंद्रेत्यनुवाक्या मृगो न इति याज्या इंद्राय वैमृधायेदं न मम राम
म इंद्रस्य वैमृधस्येत्यनुमंत्रणं। न पार्वणहोमः। नारिष्ठादि। अग्ने शर्द्ध महते इति स्विष्टकृदनुवाक्या इंद्रस्य वैमृधस्य प्रिया धामान्य ५१
याडू देवानां आज्यपानामित्यादि वा तोपधूतइ इति याज्या प्राशित्रादि नवतुर्धाकरणं। यथाश्रद्ध दक्षिणा हविः शेषोद्वासनादि इंद्र।
द्रो वैमृध इदं हविरजुषतावीवृधत महो ज्यायो कृत देवा आज्यपा इत्यादि इंद्रस्य वैमृधस्याहमुज्जितिमनूज्जेषमित्या यज्ञशंच

मइतिनजपः। सर्वमन्यद्यथापूर्वमिति। अग्नीषोमीयमेकादशकपालं पौर्णमास्यामनुनिर्वपतीत्यादित्यं च बृते चरुं। सारस्वतं चरुम
मावास्यायां पौष्णं चैंद्रमेकादशकपालममावास्यायां पौर्णमास्यां चभ्रातृव्यवतोभिचरतो वा। भ्रातृव्यवदाख्यानं परिरक्षितस्तं जिघांसतो।
वाद्वेइमेइष्टी द्वयोः पर्वणोर्निर्वपति। तत्र पौर्णमास्यां वैमृधं संस्थाप्याग्नीषोमीयादित्यौ निर्वाप्यौ सारस्वतपौष्णममावास्यायां ऐंद्रस्तु उ
भयत्र तृतीयाः तेषु च पौष्णः पिष्टैश्चरुः तस्मात्पूषा प्रपिष्टभाग इति विशेषेणाश्रवणात्। पिष्टानां पौष्णं श्रपयतीति प्रदर्शनाच्च भ्रातृव्यव
तइतिनैमित्तिकं अभिचरत इति काम्यं। अदितिर्देवता अस्येत्यादित्यः सरस्वती देवता अस्येति सारस्वतः। अत्र प्रणीतोदकेन यजुरुत्पू
तेनान्येन वा चरुपाकः आदित्यस्य तु प्रणयनकाले अन्यस्मिन् प्रणीतेनाज्येन यजुरुत्पूतेन वा। स्थालीगतेनान्येन वा सोदकेन पाकः।
उदकेन पक्केन वा घृतमानयति। श्रिते नेदीयसी यसी वाज्यमानयतीति बोधायनोक्ते अग्नीषोमीयस्य प्राकृते याज्यानुवाक्ये। अदिति
र्नउरुष्यतु महीमूषु मातरमित्यादित्यस्य। प्रणो देवी सरस्वती। आनो दिवो बृहत इति सारस्वतस्य। पूषा गा अन्वेतु नः। शुक्रं ते अन्यदिति
पौष्णइंद्रं नर इत्यैंद्रस्य। अत्रैंद्राग्नविकारत्वेपि आद्ययोः पूर्णमासविकारत्वौ तृमुख्यानुसारेण पौर्णमासं तंत्रं सारस्वतपौष्णैंद्राणां तु द
र्शविकारत्वाद्दामावास्यं तंत्रं आदित्या अहमित्यादित्यस्यानुमंत्रणं सरस्वत्या अहमिति सारस्वतस्य पूष्णो हमिति पौष्णः सर्वमन्यद्यथा
पूर्वं। अत्रत्य मंत्रार्थाः। अग्नीषोमीययाज्यानुवाक्ये व्याख्याने। विश्वेदेवा अनुष्टुप्। अदितिर्नउरुष्यत्वदितिः शर्म यच्छतु। अदितिः पा

तंऽहसः। अदितिर्देवता नोस्मान् शत्रुभ्यो रक्षतु। स्पष्टमन्यत्। त्रिष्टुप्। महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम। तुवित्रामज
रंतीमुरूचीं सुशर्माणमदितिं सुप्रणीतिं। अदितिं अदितिदेवतां अवसेऽस्मद्रक्षार्थं सुहुवेम सुष्ठु आह्वायामः कीदृशीं महीं महती
यां सुव्रतानां मातरं शोभमानकर्मणां पुरुषाणां मातरं वर्द्धितकारिणि। ऋतस्य पत्नीं सत्यस्य पालयित्रीं तुवित्रां बहुराजपालितां अ
जरंतीं सर्वदा जरारहितां उरूचीं विस्तीर्णगतीं सुशर्माणं समीचीनसुखोपेतां सुप्रणीतिं सुखेन कर्मणि प्रणेत्रीं। गायत्री। प्रणो देवी।
सरस्वती वाजेभिर्वाजिनीवती। धीनामवित्र्यवतु। सरस्वती देवी वाजेभिरन्नैर्नोस्मान् प्रकर्षेणावतु रक्षतु। कीदृशी देवी वाजनीवती
वाजो अस्यां क्रियायामस्तीत्यन्नप्रदयावा जिनासा यस्या अस्ति सा वाजिनीवती धीनामवित्री यज्ञविषयाणामस्मद्बुद्धीनां पालयित्री।
त्रिष्टुप्। आनो दिवो बृहतः पर्वतादा सरस्वती यजता गंतु यज्ञं। हवं देवी जुजुषाणा घृताची शग्मान्नो वाचमुशती शृणोतु। यजताय
ष्टव्या सरस्वती नोस्माकं यज्ञं प्रति दिवः सकाशादागंतु आगच्छतु। बृहतः पर्वतादागच्छतु। यद्यप्येषा द्युलोके मेरुवी तिष्ठति तथा
प्यवश्यमागच्छतु इत्यर्थः। सेयमागता देवी शग्मा सुखप्रापिका नोस्मदीयां स्मृतिरूपां वाचं उशती कामयमाना शृणोतु कीदृशी ह राम
वमस्मदीयमाह्वानं जुजुषाणा सेवमाना घृतमंचती प्राप्नोतीति घृताची। गायत्री। पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः। पूषा वाजं स ५२
नोतु नः। पूषा देवो नः अस्मदीया गा अन्वेतु प्रतिपालयतु। तथा अर्वतः अश्वान् रक्षतु नोस्मभ्यं वाजमन्नं सनोतु ददातु। त्रिष्टुप्।

शुक्रंते अन्यद्यजतंते अन्यद्विषुरूपे अहनी द्यौरिवासि। विश्वाहिमाया अवसिस्वधावो भद्राते पूषन्निहरातिरस्तु। हे पूषन् तव शुक्र
मन्यत्। शुक्रमेकं तथा न वयजतं यज्ञीयमन्यदिति विषुरूपे। नानारूप अहनि अरेहो रात्र्यात्मके स्तः त्वंच द्यौरिव सुखसाधनम।
सिहे स्वधावो न्नवन् त्वंहि यस्माद्विश्वामायां सर्वाणि प्रज्ञानान्यवसि ते तवेह कर्माणि रातिः दत्ताहुतिः भद्रा भजनीयास्तु। गायत्री।
इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः॥ हे ऋत्विग्यजमानाः वो युष्माकं जनेभ्यः पुत्रभृत्यादिजनसिद्ध्यर्थं विश्व
तस्परि सर्वस्य जगत उपरि स्थितमुत्कृष्टत्वेन वर्त्तमानमिंद्रं हवामहे आह्वयामः स चैंद्रोस्माकं केवलोस्तु। असाधारणोस्तु इतर
यजमानेभ्योधिकमनुग्रहमस्मासु करोत्वित्यर्थः। त्रिष्टुप्। इंद्रं नरो नेमधिता हवंते यत्पार्या युनजते धियस्ताः। शूरो नृषाता शवसश्च
कान आ गोमति व्रजे भजा त्वंन्नः। अग्निं चैनं अनुतिष्ठंतो नराः इंद्रं नराः नेमधिताः बह्व्यादिभिर्देवैः सह नेमस्यार्थस्य हविषोधि
ताधारणाय हवंते आह्वयंति अत एव च यन ब्राह्मणं अर्धेंद्राणि जुहोतीति तन्मंत्राश्च मइंद्रश्च मइत्यादयः यद्यस्मात्कारणात् पा
र्यावित्ते अग्नावग्निष्टोमादिपारमर्हंतो यजमानास्ता धियो युनजते तान्यग्निष्टोमादीन्यनुतिष्ठंति ता हशेंद्र त्वं शूरो रक्षोभिरनभि
भूतः नृषाता मनुष्येभ्यः सनिता धनस्य दाता शवसो स्मदीयस्य बलस्य चकानः तर्पको भूत्वा नोस्मान् गोमती बहुगवादियुक्ते व्रजे संघे
आभय आभिमुख्येन स्थापय। वामदेवो यजूंषि। अदित्या अहं देवयज्यया प्रजया च पशुभिश्च जनिषीय। अहमनेनादितिदेवता

यागेन प्रजया च पशुभिश्च प्रजनिषीय समृद्धो भूयासं। सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयं। पूष्णोहं देवयज्यया प्रजनिषीय प्रज
नियापशुभिः। निदगदव्यास्त्वा ते। ~~अनगयोगः~~ पौर्णमास्यां वैमृधयाजी वैमृधं संस्थाप्येन रक्षः पौर्णमासीं संस्थाप्य पश्चात् तव्यवां ग्ने दिष्ट्या
यक्ष्ये। ~~वैमृधयाजी वैमृधं सं~~ अभिचरंस्तु इष्ट्वा यक्ष्ये अमुकं शत्रुं मारयामि। विद्धि दसीत्यादिरेषं हविः बर्हिर्ब्रतोपायनं पूर्णमासवदि
ध्मः। वेदः। उपवेषादिनो भावग्नी। कर्मणे वामित्यादि। द्वाविंशति कपालानि चरुस्थाली स्फ्यश्च द्वंद्वं वृतं चेत्कालयेत् तदा हे प्रणीते। पवित्र
करणादि यथादिस्तस्य प्रणीते वृते पाकनदा द्वयोः प्रणीतयोः प्रक्षालनादि दर्भाद्वादनांतपदार्थानामावृत्तिः। कस्त्वा गृह्णाति स त्वा गृह्णा
तु कस्मै त्वा गृह्णामि तस्मै त्वा गृह्णामि पोषाय त्वेति वृतस्य। देवस्त्वा सविता वृतं देवाग्ने स्वग्ने गइमं यज्ञं नयाग्ने यज्ञपतिं धेहि त्वामिंद्रो वृणी
त वृत्रतूर्ये त्वामिंद्रमवृणीथा वृत्रतूर्ये प्रोक्षितमसि। ब्रह्मन्नपो वृतं च प्रणेष्यामीति। प्रणय यज्ञमित्यनुज्ञाया अनावृत्तिः। कस्त्वा प्रण
यति स त्वा प्रणयतु वृतं देवं प्रणयामि यज्ञं ꣳ स ꣳ साहयं तु नः। इरं मदंती वृत एष्टामुदाकुः सहस्रपोषं यजमानव्येन्यच तू एकाक्षरं पू
र्हं शमं विराट्य दिमं विश्वं भुवनं व्यानट्। तन्नो देवं नरसा संविदानं स्वस्ति यज्ञं यप्रजानन्ब्रह्मपूतमसि कस्त्वा युनक्ति स त्वा युनक्तु विश्वे राम
भ्यः। यत्पुरस्तात्स्वस्त्र वत्कपरिष्टात्सर्वतश्च यत्। तेन रश्मिपवित्रेण अह्रायं यज्ञमारभे। कस्त्वा युनक्ति स त्वा युनक्तु। घृतप्रणयनाभावे प्रण ५३
यनमेवासंविशं तावित्तिमित्यादि। अग्नीषोमाभ्यां जुष्टं निर्वपामि। अदित्यै जुष्टं निर्वपामि। इंद्राय जुष्टं निर्वपामि। अग्नीषोमो हव्यं रक्षे

यां अदितेहव्यंरक्षस्वेंद्रहव्यंरक्षस्व। यद्वा अग्नेहव्यंरक्षस्व अग्नीषोमाभ्यामदित्याइंद्रायेति। अग्नीषोमाभ्यांवोजुष्टंप्रोक्षाम्यदित्याइंद्रायेत।
पात्रप्रोक्षणादि उक्तरेप्रक्षालननिनयनानंतरंयथाभागंव्यावर्तध्वमिति। यथायोगंद्वेधाविभज्यइदमग्नीषोमयोरिंद्रस्येतिपुरोडाशा
यैद्रमदित्याइति। चर्वर्थमभिमृशति। चरौपेवणाद्याप्यलेपनिनयनांतस्यनिवृत्तिः। कृष्णाजिनादानादि अग्नीषोमाभ्यांजुष्टमधिवपा
मींद्रायेति। धृष्टिरसीत्यादि अग्नीषोमीयकपालोपधानस्यापाग्नेग्निमित्यादि। ध्रुवमसिपृथिवीमित्येकेनचरुस्थाल्युपधानंततो।
पाग्नेग्निमित्यादिनेंद्रकपालोपधानंमदंतीरधिश्रयणादि अग्नीषोमाभ्यांजुष्टंसंवपामीद्राय। पिष्टान्युत्पूयतंडुलानुत्पुनाति। समापो
अद्भिरित्यादिसंयोग्यग्नीषोमाभ्यांत्वेंद्राय। मखस्यशिरोसीत्यादि। अग्नीषोमीयाधिश्रयणं। स्रुवेणप्रणीताज्यस्थाल्यांवायजुषोत्पू
तमन्यद्वादायस्थाल्यामानीयमदंतीश्रानीयघर्मोसीतितंडुलानावपति। ऐंद्राधिश्रयणादिसर्वेषांपर्यग्निकरणसंप्रेषसुस्मृतकरणा
निभस्माध्युहनादिसूर्यज्योतिरित्यभिमंत्रणंसर्वेषांअभिधारणंपुरोडाशयोस्तूष्णींमंत्रेणचरोः। पात्र्युपस्तरणादिसहस्थाल्योद्वासना
सादनेचरोः आर्द्रःप्रथस्नुरित्यचिकृतोमंत्रश्चरोरपिघृतात्प्रियेणेत्यासादनंयज्ञोसीत्यादिभिर्यथायोगमासंन्नाभिमर्शनं। अपत
मिंद्रोभुवनान्नुदतां अयंवेदइत्यादि। अग्नीषोमावावहअदितिमावहमिंद्रमावहदेवांआज्यपांइत्यादि। स्वाहाग्नीषोमौस्वाहादितिंस्वा
हेंद्रंस्वाहादेवाआज्यपाइत्यादि। अग्निर्वृत्राणितंसोमासीत्यादिज्यभागानुवाक्ये। उक्तोग्नीषोमीयप्रचारः अदित्या अनुब्रूहि। अदितिं

यज। अदितिर्नइत्यनुवाक्या। महीमूष्विति याज्या। अदित्यै० अदित्या अहं० प्रप्रजया च पशुभिश्च जनिषीय। इंद्रं वो विश्वत इत्यनुवाक्या
इंद्रं नर इति याज्या। इंद्रस्याहं देवयज्ययेंद्रियाव्यन्नादो भूयासमिंद्रस्य नपात्र्वणहोमः नारिष्टादि। अयाळग्नीषोमयोः प्रिया धामान्ययाळ
दित्याः प्रिया धामान्ययाळिंद्रस्य प्रिया धामानीत्यादि अदित्यस्यैव चतुर्द्धीकरणं। अन्वाहार्यादि। अग्नीषोमाविदं हविरजुषेतामवीवृधे
तां महो ज्यायोक्रातां अदितिरिदं हविरजुषतावीवृधत महो ज्यायोकृत इंद्र इदं हविरजुषतावीवृधत महो ज्यायोकृतेत्यादि। अग्नी
षोमयोरहं० अदित्या अहमुज्जितिं० इंद्रस्याहमुज्जितिं। यज्ञशंवमवर्जं सर्वमन्यद्यथापूर्वं। अथ द्वितीयस्या ३ प्रयोगः। अमावास्यां
संस्थाप्य भ्रातृव्यवांश्चेदिष्ट्वायस्ये। अभिचरंस्त इष्ट्वा यक्ष्ये मुकं शत्रुं मारयामि विघ्न दसीत्यादि व्रतोपायनं बर्हिर्ध्मादि एकादशकपा।
लानि चरुस्थाल्यौपवित्रकरणादि। सरस्वत्यै जुष्टं निर्वपामि पूष्णे जुष्टं निर्वपामि इंद्राय जुष्टं निर्वपामीत्यादि। सरस्वति हव्यं ३ रक्षस्वेत्या।
दि अग्ने हव्यं रक्षस्व सरस्वत्यै पूष्ण इंद्रायेति वा। सरस्वत्यै वो जुष्टं निप्रोक्षामि पूष्ण इंद्राय। पात्रप्रोक्षणादि प्रक्षाल्य निनयनानंतरं सार
स्वतस्येतरयोश्च विभागः। इदं सरस्वत्या इति तंडुलभागस्येदं पूष्ण इंद्रस्येतीरस्य कृष्णाजिनादानादि। पूष्णे जुष्टमधिवपामींद्राये। राम
त्यादि। धृष्टिरसीति क्रमेण स्थाल्या रुपधानं ऐंद्रकपालोपधानादि पूष्णे जुष्टं संवपामींद्राय तंडुलानुत्पूय पिष्टोत्पवनादि। संयोमि ५४
पूष्णेत्वेंद्राय यथाभागं व्यावर्तेथामिति पिष्टं विभज्येदं पूष्णः इदमिंद्रस्येत्यभिमृश्यैंद्रस्य मखस्य शिरोसीत्यादि स्रुवेण प्रणीताप्रो।

न्यावायजुरुत्सूतक्रमेणस्थाल्योरानीयान्वाश्रोह्मा आनीयघर्मोतिसिक्रमेणस्थाल्योस्तंतुल्लान्पिष्टांश्रावपतिऐंद्रा धिश्रयणादिश्र
पिघारणंमंत्रेणचर्वेस्तूष्णींपुरोडाशस्यपाश्रुपस्तरणात्। सरस्वतीमावह। पूषणमावह इंद्रमावहेत्यादि। स्वाहासरस्वतींस्वाहापूषं
णंस्वाहेंद्रमित्यादि। वृधन्वंतावाज्यभागौ। सरस्वत्यानुब्रूहि सरस्वतींयज। प्रणोदेवी। आनोदिवः। सरस्वत्यासरस्वत्याअहं० वाचमन्ना
धंपूषेयं। पूष्णेनुब्रूहिपूषणंयज। पूषागाअन्वेतुनः। शुक्रंतेअन्यत्। पूष्णइदं० पूष्णोहं० प्रजनिषीयप्रजयापशुभिः। इंद्रंवोविश्व
तइत्यादि। सरस्वत्याः प्रियाधामान्ययाट्पूष्णः प्रियाधामान्यया। इंद्रस्यप्रियाधामान्ययाट्देवानामाज्यपानामित्यादि। सारस्वत
पूष्णयोः श्रतुर्द्धाकरणे। सरस्वतीदंहविरजुषतावीवृधतमहोज्यायोकृतपूषेदंहविरजुषतावीवृधतमहोज्यायोकृतइंद्रइदंहविरजु
षतावीवृधतमहोज्यायोकृतदेवाआज्यपाइत्यादि। सरस्वत्याअहमुज्जितिमनूज्जेषंपूष्णोहमुज्जितिमनूज्जेषंइंद्रस्याहमुज्जि
तिमनूज्जेषं। सर्वमन्यद्यथापूर्वं। नैमित्तिकमनुनिर्वाप्यांतरमाह। इंद्रायत्रात्रेचरुंद्वितीयंवैमृधस्यकुर्याद्घोमृत्योर्जीन्यावाविभीया
न्मुष्करोदक्षिणाद्वितीयंवैमृधस्येतिवैमृधेनसमानतंत्रमित्यर्थः। तेनवैमृधः पौर्णमासश्चसमानतंत्रोपिसद्वितीयोनिरूप्यते। ज्या
निनीव्याधिपीडामुष्करोंडः तद्वान्बलीवर्द्दोमुष्करः सेचनसमर्थइत्यर्थः। त्रातारमिंद्रं। मातेअस्यामितियाज्यानुवाक्योइंद्रस्यत्रातुर
हमितिहुतानुमंत्रणं। विश्वेदेवाः त्रिष्टुभौ। त्रातारमिंद्रमवितारमिंद्रंऽहवेहवेसुहवंऽशूरमिंद्रं। हुवेनुशक्रंपुरुहूतमिंद्रंऽस्वस्तिनो

मघवा धामत्विंद्रः। त्रातारं मृत्योरक्षितारं भवितारं अरोगतया रक्षितारं शूरं तदुभयतिरस्कारक्षमं हवेहवे सुहवं तस्मिन्नस्मिन् होमे सु
हवेनाह्वातुं शक्यं शक्रं सर्वेषु कार्येषु शक्तियुक्तं पुरुहूतं बहुभिर्यजमानैराहूतं इंद्रं हुवे नु आह्वयामि एवं प्रति विशेषणं मिंद्रशब्दावृत्तिर्वा
क्यभेदार्था सर्ववाक्यभेदः आदरार्थः। मघवा धनवानिंद्रो नोस्मभ्यं स्वस्तिमा स्वस्तियातु अविनाशं ददातु। मा ते अस्याः सहसावन्नूप
रिष्टावघाय भूयहरिवः परादै। त्रायस्व नो वृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम। यैः सहसावन्निंद्र त्वदर्थमस्यां परिष्टौ परित्राणा
र्थं क्रियमाणायामिष्टौ वयमघायवैकल्याय मा भूम अस्मदनुष्ठितकर्मणि वैकल्यं मा भूदित्यर्थः। हे हरिव हरिरश्वः तद्वान् परादानु
त्सामवज्ञातुमयं मा भूः कदाचिदवज्ञां मा करवा मेत्यर्थः। तं नोस्मान् वृकेभिर्मित्रिकेरहितैर्वरूथैः गृहैस्त्रायस्व नाहशान् गृहप्रवेशा
न् प्रयच्छ सूरिषु विद्वत्सु यजमानेषु मध्ये वयं तव प्रिया भवेम। वामदेवो यजुः। इंद्रस्य त्रातुरहं देवयज्यया त्रातो भूयासं त्रातो रक्षितः।
स्पष्टमन्यत्। अत्र प्रयोगः। पौर्णमाससमानं तंत्रमेकवत्। कपालैः सहस्याली इंद्राय त्रात्रे जुष्टं निर्वपामि इंद्रात्रातर्हव्यं रक्षस्व। यद्वा राम
अग्नेहव्यं रक्षस्वाग्नयेग्नीषोमाभ्यामिंद्राय वैमृधायेंद्राय त्रात्रे इति वा। अग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्यामिंद्राय वैमृधायेंद्राय त्रात्रे ५५
प्रक्षालनं निनयनानंतरं यथाभागं व्यावर्तध्वं। इदमग्नीषोमयोरिंद्रस्य वैमृधस्येंद्रस्य त्रातुः कपालान्युपधाय स्थाल्युपधानं पिष्टा
न्युप्य तंडुलानुत्पवनं। पुरोडाशानधिश्रित्य तंडुलावापः तूष्णीमभिघारणं चरोः अपतमिंद्रस्त्राता मा वनोनुदत्तां। इंद्रं त्रातारमाव

हदेवांआज्यपांस्वाहेद्रंत्रातारंस्वाहादेवाःइंद्रायत्रात्रेनुब्रूहिइंद्रंत्रातारंयज।त्रातारमिंद्रंमातेअस्यांइंद्रायत्रात्रइदं।इंद्रस्यत्रातुरहंत्रातोभूयासं।
अयालिंद्रस्य।त्रातुःप्रियाधामान्ययाडूदेवानां।मुष्करोदक्षिणा।ब्रह्मणो।ब्रह्मणस्योब्रह्मणेवांहुताघौमामाऽंहिंसिष्टंहुतौमह्यंशिवौ
भवतं।ब्रध्नपिन्वस्वेत्यविकृतोभागाभिधानात्।इयंऽस्याल्यमृतस्यपूर्णासहस्रधारावुत्सावक्षीयमाणोतौदध्रतुः।पृथिवीमंतरिक्षं
दिवंचताभ्यामोदनमुष्कराभ्यामोऽततिरराणिमृत्यंब्राह्मणाइमावोदनमुष्करौदक्षिणेरुद्रायगांइंद्रस्त्रानोदंहविरजुषतावीवृधतमहो
ज्यायोकृत।देवाःइंद्रस्यत्रातुरहमुज्जितिमनूज्जेषं।सर्वमन्यद्धायापूर्वंदृष्यकंतत्रतेवैदृधेनसहप्रयोगोवैमृधवत्।अयंविशेषः।इष्ट्वा
यद्व्यइस्यादिएकादशकपालानिस्थालीइंद्रायवैमृधायजुष्टंनिर्वपामिइंद्रायत्रात्रेजुष्टंनिर्वपामिअदित्यास्त्वोपस्थेसादयामीद्रावैमृ
धहव्यंऽरक्षस्वेंद्रत्रातर्हव्यंऽरक्षस्व।अग्नेहव्यंऽरक्षस्वेंद्रावैमृधायेंद्रायत्रात्रेइतिवा।इंद्रायवैमृधायवोजुष्टंप्रोक्षामीद्रायत्रात्रेवो।प्र
क्षालननिनयनांतरंयथाभागंव्यावर्तेथां।इदमिंद्रस्यवैमृधस्यइदमिंद्रस्यत्रातुःकपालान्युपधायस्याल्युपधानं।पिष्टान्युत्पूयतं
डुलोत्सवनं।क्रमेणाधिश्रयणं।अपतमिंद्रस्त्रातमुर्वनांनुदतां।इंद्रंत्रातारमावह।देवांआज्यपां।स्वाहेंद्रंत्रातारंस्वाहादेवाःइंद्रायत्रात्रे
नुब्रूहि।त्रातारमिंद्रं।इंद्रंत्रातारंयज।मातेअस्यांइंद्रायत्रात्रेइदं।इंद्रस्यत्रातुरहंदेवयज्ययात्रातोभूयासं।इंद्रस्यत्रातुःप्रियाधामान्यया
डूदेवानोमुष्करोपिदक्षिणेत्यादिरुद्रायगामित्यंतंसमानतंत्रवत्।इंद्रस्त्रातेदंहविरजुषतावीवृधतमहोज्यायोकृतदेवाःइंद्रस्यत्रातुरहमु

ज्जितिमनूज्जेषमिति।काम्यमनुनिर्वाप्यांतरमाहइंद्रायेंद्रियावतेपुरोडाशमेकादशकपालमनुनिर्वपेत्।प्रजाकामःपशुकामःसजात
कामःसजातासंग्रामाःतत्कामःतैःसहवसुकामःग्रामकामइतियावत्।प्रजाकामादयोविकल्पेनदृष्टक्कामश्रुतेः।अयंचानुनिर्वापः
पौर्णमास्यांद्वितीयंवैमृधस्येतिवैमृधप्रक्रमात्एवंचानुनिर्वाप्यमितिवैमृधप्रत्याम्नानाच्च।इंद्रियाणिशतक्रतो।अनुतेदायीति
याज्यानुवाक्ये।विश्वेदेवागायत्री।इंद्रियाणिशतक्रतोयातेजनेषुपंचसु।इंद्रतानितआवृणे।हेशतक्रतोपंचसुजनेषुनिषादपं
56 चमेषुब्राह्मणादिवर्णेषुयानितेतवानुग्रहात्इंद्रियाणिसमर्थानिसंति।हेइंद्रतानिसर्वाणितेतवानुग्रहादावृणेसमंतात्गृह्णानि।
त्रिष्टुप्।अनुतेदायिमहइंद्रियायसत्रातेविश्वमनुवृत्रहत्ये।अनुक्षत्रमनुसहोयजत्रेंद्रदेवेभिरनुतेनृषह्ये।यजत्रयष्टव्यहेइंद्रमहे
महतेसर्वेभ्योदेवेभ्योधिकायतेतुभ्यंसत्रासत्रेषुविश्वंसर्वंहविःदेवेभिरग्न्यादिभिरनुदायी।अनुक्रमेणदीयतेकिमर्थंवृत्रहत्येवृ
त्रवधमनुमतेतवेंद्रियायबलसिद्ध्यर्थंनकेवलंवृत्रवधमनुसृत्यकिंतुक्षत्रमनुबलदीयंक्षत्रियत्वजात्यभिमानमनुसृत्यसहोनुबलदी
यंबलमनुसृत्यनृषह्येवैरिमनुष्यतिरस्कारशीलमनुसृत्यतयियथोक्तान्।गुणान्अवेक्ष्यते।तुभ्यंपुनःपुनःदीयतइतिशेषः।अस्य राम
स्यप्रयोगोवैमृधवत्।अयंमंत्रविशेषःवैमृधवत्संस्थानंतरंइतरस्यपौर्णमासीसंस्थानंतरंइष्ट्वायस्येप्रजावानितिपशूनवाप्नु ५६
वानीतिवा।सजातानवाप्नवानीतिवासंकल्प्यः।पंचदशसामिधेन्यःतंत्रस्तामेकविंशतिधा।इंद्रायेंद्रियावतेजुष्टंनिर्वपामि।इंद्रेंद्रि

यावहव्यꣳरक्षस्व। अग्नेहव्यंरक्षस्वेंद्रायेंद्रियावतइति। इंद्रायेंद्रियावतेवोजुष्टंप्रोक्षामि। इंद्रायेंद्रियावतेजुष्टमधिवपामि। इंद्रायेंद्रि
यावतेजुष्टꣳसंवपामि। संयोमींद्रायेंद्रियावतेत्वा। अपतमिंद्रइंद्रियावानभुवनानुदतां। इंद्रमिंद्रियावंतमावहदेवांआज्यपान्। स्वाहें
द्रमिंद्रियावंतंस्वाहादेवाः। इंद्रायेंद्रियावतेनुब्रूहि। इंद्रियाणिशतक्रतो। इंद्रमिंद्रियावंतंयज्ञ। अनुतेदायि। इंद्रायेंद्रियावतइदं०इं
द्रस्येंद्रियावतोहं०इंद्रियाव्यन्नादोभूयासं। यथाप्रकृतिसंयाज्ये। इंद्रस्येंद्रियावतः प्रियाधामान्ययाटूदेवानां। अन्वाहार्यं। इंद्रइं
द्रियावानिदंहविरजुषतावीवृधतमहोज्यायोकृत। देवाआज्यपाः। इंद्रस्येंद्रियावतोहमुज्जितिमनूज्जेषंमिति। उक्तायाइष्टेरू
पांतरमाह। एवंवानुनिर्वाप्यंकुर्वीत। एतामेंद्रियावंतमेववावैमृधस्यस्थानेनित्यमनुनिर्वाप्यंकुर्वीततद्वत्प्रक्रमेनियमः। समाना
समानत्वेच। अत्रप्रयोगः। समानतंत्रत्वेवैमृधस्थानिइंद्रियावतपदप्रक्षेपेणवैमृधवदेवानुपसंधेयः। इतरत्तूक्तएवंक्रमः संक
ल्पवरहितोवर्गतव्यः। पूर्वोक्तस्यरूपांतरमाह। इतरौवाअनंतरोक्तौवावैमृधत्रात्रौवैमृधस्थानेनित्यावनुनिर्वाप्यौकुर्वीत। शेषंसस
हितावित्यर्थः। अत्रप्रयोगः। उभयविधोप्युक्तएव। नैमित्तिकमनुनिर्वाप्यांतरमाह। यमवसंशयीतसइंद्रायवैमृधायानुनिर्वपेत्।
यंयजमानंप्रनिरोगाभिभवाद्युनिमित्तादिनावासामंशयितलोकः जीवेदयंन्नवेतिसइंद्रायवैमृधायपुरोडाशमेकादशकपालं
मनुनिर्वपेत्। पूर्ववैमृधस्यैवेरूपांतरोपदेशात्समानतंत्रत्वादिकमपिभवति। तथाचानुनिर्वाप्यवतोनुनिर्वाप्यांतरमितरस्यापो

र्णमास्यनंतरंसमानतंत्रेणसमानतंत्रेणवाप्रयोक्तव्यः।प्रयोगस्तुसर्वत्रोक्तएव।नैमित्तिकांतरमाह।योनैववद्योयेन्नैनाम्भृणयात्वइं
द्रायांऽहोमुचेपुरोडाशमेकादशकपालमनुनिर्वपेदित्यनुषंगः।योनैववोषेत्।योरोगवशान्नवोषेद्विदिवनव्यक्तंभाषितंक्षमेत।
नवम्भृणयादिवनव्यक्तंम्भृणयाइत्यर्थः।अस्यचहष्यकृप्रयोगः।अंऽहोमुचेप्रभरेमा।विवेषयन्मेतियाज्यानुवाक्ये।विश्वे
देवास्त्रिष्टुभौ।अंऽहोमुचेप्रभरेमामनीषामोषिष्ठदाव्न्नेसुमतिंगृणानाः।इदमिंद्रप्रतिहव्यंगृभायसत्याःसंतुयजमानस्य।
57 कामाः।गृणानाःस्तुवंतोवयंवोसिष्ठदावनेग्रीष्मेण।कालेदावाग्निनाअत्यंतदग्धभूःप्रदेशोम्योवर्षर्त्तौर्वृष्टिर्मुचते।अंहोमुचे
पायान्मोचयित्रेतुभ्यंमनीषांबुद्धिंप्रहरेमस्वीकुर्मः।कीदृशींसुमतिंत्वांतोषयेमेस्येव।मादृशोजनममन्येपेतां।हेइंद्रइदंदीयमा
नंहव्यंप्रतिगृहाणतेनयजमानस्यकामाःसत्याःसंतु।विवेषयन्माधिषणाजजानस्तवैपुरापार्य्यादिंद्रमह्नः।अंऽहसोयत्रपी
परद्यथानोनावेवयांतमुभयेहवंते।यस्मात्कारणाद्धिषणास्तूनोक्ताबुद्धिर्मांविवेषन्याप्रवतीतस्मादहंसंबुद्धिर्जजानजातवान
स्मिततएवपार्य्यादह्नःपारेभवमरणदिवसात्तांस्तवैआमरणंस्तवानीत्यर्थः।यत्रयस्यांधिषणायांसत्यामिंद्रोस्मान्नंहसः। राम
पायात्।नपीपरत्उत्तारितवतनानूसाधिषाणाविवेशेत्यन्वयः।यद्वायत्राहन्यस्मान्नंहसापारयतितस्मात्पार्य्यादह्नःपुरस्ता ५७
द्वाइत्यन्वयः।यथालोकेननावानद्यांयांतंनाविकउभयकूलवर्त्तिनोहवंतेभोमामुत्तारयेत्याह्वयंतीतथैवांहसोत्रास्मानुभयकू

लप्रभवा आह्वयंतीत्यर्थः। अस्य प्रयोगः ऐंद्रियावतवत्। अयं विशेषः। इंद्रियावत्पदस्थाने ह्नोमुक्पदप्रक्षेपः। इंद्रायांहोमुचे। इंद्रा
होमुक्। इंद्रमंहोमुचं। इंद्रस्यांहोमुचः। अंहोमुचे प्रभरेमा। विश्वे यन्मेति। नैमित्तिकांतरमाह। यो भ्रातृव्यवान्स्यात्स इंद्राय वृ
त्रतुरे। पूर्ववदनुषंगः। इंद्रोयज्ञं वर्द्धयन्। इमं यज्ञं वर्द्धयन्निति याज्यानुवाक्ये। विश्वेदेवास्त्रिष्टुप्। इंद्रो यज्ञं वर्द्धयन्विश्ववेदा पुरो
डाशस्य जुषतां हविर्नः। वृत्रं तीर्त्वा दानवं वज्रबाहुर्दिशो दृंहदृंहिता दृंहणेन। विश्ववेदाः सर्वयज्ञो यमिंद्रो यज्ञमस्मदीयं व
र्द्धयन्नोस्मदीयस्य पुरोडाशस्य सारमयं हविर्जुषतां वज्रबाहुरयं वृत्रास्ख्यं दानवं तीर्त्वा हत्वा दृंहणेन दृढीकरणसाधनेन दृं
हिता दृढीकर्तुमघतः सन्नदृशो दृंहत्वचक्रतोपद्रवेण प्रचलितानां सर्वदिग्वर्त्तिप्रजानां स्थैर्यकृतवानित्यर्थः। इमं यज्ञं वर्द्धय
न्विश्ववेदाः पुरोडाशं प्रतिगृभ्णात्विंद्रः। यदा वृत्रमतरच्छूर इंद्रो पृथेकराजो अभवज्जनानां। स्पष्टोर्थः। अत्र प्रयोगः। इंद्रायस्पेंद्र
साधैंद्रावतवत्। अयं विशेषः। इंद्राय वृत्रतुरे। इंद्र वृत्रतूः। इंद्रो वृत्रतुरः। इंद्रं वृत्रतुरं। इंद्रस्य वृत्रतुरः। इंद्रो यज्ञं वर्द्धयन्। इमं यज्ञं
वर्द्धयन्निति। नैमित्तिकांतरमाह। अपयन्नकुतश्चनानयेत्स इंद्रायैन। पूर्ववदनुषंगः। यं एगोपहत ज्यायैंद्रियं कुतश्चिदपि प्रका
रादुष्ठनस्तेनातपेत्स इंद्राय निरूपपदाय निर्वपेदित्यर्थः। अत्र प्रयोगः ऐंद्रियावतवत्। विशेषस्त इंद्रियावत्पदाभावः। इंद्रं वो।
विश्वतः। इंद्रन्नरइति। नैमित्तिकांतरमाह। यो भ्रातृव्यवान्स्यात्स पौर्णमासं संस्थाप्यैतामिष्टिमनुनिर्वपेत्। आग्नावैष्णवमे

काद्दशकपालंसरस्वत्यैचरुंसरस्वतेचरुंपौर्णमासंऽसंऽस्याप्येतिब्राह्मणानुकरणार्थं। तेनानुनिर्वाप्यवतस्तदनंतरंइतरस्यतुपौर्णमासा
नंतरमित्यर्थः। अग्नाविष्णू अग्नाविष्णूइत्याग्नावैष्णवस्ययाज्यानुवाक्ये। प्रणोदेवी। आनोदिवइतिसरस्वत्याः। पीपिवांऽसं। यस्यव्र
तमितिसरस्वतः पौर्णमासंतंत्रंतद्विकारत्वात्। अग्निर्गायत्री। अग्नाविष्णूसजोषसेमावर्द्धंतुवांगिरः। द्युम्नैर्वाजेभिरागतं। हे अग्नावि
ष्णूइमांसजोषसासमानप्रीतिभवतः। वांयुवयोरिमागिरस्स्तुतिवाचोवृद्धिंप्राप्नुवंतु। युवांचधनैरन्नैश्च। युक्तावागच्छतं। विश्वेदेवा।
स्त्रिष्टुभौ। अग्नाविष्णूमहितद्धाममहित्वंवीतंघृतस्यगुह्यानिनाम। दमेदमेसप्तरत्नादधानाप्रतिवांजिह्वाघृतमाचरण्येहे अग्नाविष्णूवां
युवयोस्तद्धरमाणंमहित्वमहिमोपेतत्वंमहापूजनीयंकथमितितदुच्यते। घृतस्ययानिगुह्यानिनामानिमंत्रेषुगोप्यानिआज्यपृष
दाज्यंसर्पिरित्यादीनितानियूयंवीतंराप्नुतंकृत्वेदंनामश्रवणंदमेदमेसर्वेषांयज्ञानांगृहेगृहेकिंचवांयुवयोजिह्वांप्रतिपत्येकंघृतमा
गत्यप्राप्यचरण्येद्भक्षयतुपिबंत्वित्यर्थः जिह्वासप्तरत्नादधानासप्तसंख्याकान्रत्नसदृशान्ज्वालाविशेषांधारयति। छत्रीन्यायेन। राम
नाग्निसहचर्याहिस्तोरपितथात्वं। अग्नाविष्णूमहिधाममप्रियंवांवीथोघृतस्यगुह्याजुषाणा। दमेदमेसुष्टुतिर्वावृधानाप्रतिवांजिह्वा ५८
घृतमुच्चरण्येतु। हे अग्नाविष्णूवांयुवयोः प्रियंधाम अजमभिपूजनीयंकथमितितदुच्यतेयुवांघृतस्यगुह्यगोप्यमभिधाररूपंजु
षाणासेवमानौवीथः पुरोडाशंभक्षयज्ञः कीदृशौयुवांदमेदमेसर्वेषुयजमानगृहेषुसुष्टुतीर्वावृधानाआयुर्दाइत्यादिकाशोभनस्तु

तिर्वर्द्धयंतो।प्रतिवामित्यादिपूर्ववत्।प्रणोदेवी आनोदिवई इत्यमावास्यानुनिर्वाप्येव्याख्याने। गायत्री। पीपिवांऽसंऽसरस्वतस्त
नंयोविश्वदर्शतः। धुक्षीमहिप्रजामिषं। सरस्वतः सरस्वन्नामकस्यदेवस्ययस्तनोविश्वदर्शन विश्वविषयदर्शनः यतः क्षुधि
तान्बालानिवपालयितुंजानातीत्यर्थः। तादृशस्तनंयज्ञलक्षणंपीपिवांसंअस्मान्वर्द्धितवंतंप्रजांपुत्रादिरूपमिषमन्नंधुक्षि
यथागोरिवपयोदुहंति एतद्देवतानंयागमनुष्ठायप्रजादिकंप्राप्नास्मेत्यर्थः। त्रिष्टुप्। यस्यव्रतंपशवोयंतिसर्वेयस्यव्रतमुपतिष्ठं
तआपः। यस्यव्रतेपुष्टिपतिर्निविष्टस्तंऽसरस्वंतमवसेहुवेम। यस्यसरस्वतः संबंधिव्रतंकर्मपशवोयंतिद्विपादश्चचतुष्पादश्च
सर्वेपशवःप्राप्नुवंति। एतदीयेनकर्मणापशवोलभ्यतइत्यर्थः। तथावृष्टिरूपाआपो। यस्यव्रतमुपतिष्ठंतेसेवंते अग्नौप्रा
स्ताहुतिरितिन्यायेनवृष्टेरेतत्कर्मसाध्यत्वात्। पुष्टिपतिर्धनपोषस्यपालकोयजमानोयस्यव्रतेनिविष्टः एतदीयेनव्रतेनध
नपुष्टेः सुलभत्वात्तादृशंसरस्वंतंदेवमवसे अस्माकंरक्षणायहुवेम। आह्वयेम। अत्रप्रयोगः। पौर्णमास्यामनुनिर्वाप्यवतः
तत्संस्थानंतरंइतरस्यपौर्णमाससंस्थानंतरमिष्टायष्टव्यइत्यर्थः द्विः। पौर्णमासंतंत्रमेकादशकपालानिद्वेचरुस्थाल्यौअग्ना
विष्णुभ्यांजुष्टंनिर्वपामिसरस्वत्यैजुष्टंसरस्वतेजुष्टं। अग्नाविष्णूहव्यंऽरक्षेथांसरस्वतिहव्यंऽरक्षस्वसरस्वन्हव्यंऽरक्षस्व। अ
ग्नाविष्णुभ्यांऽसरस्वत्यैसरस्वते अग्नाविष्णुभ्यांवोजुष्टंप्रोक्षामिसरस्वत्यैसरस्वते। प्रक्षालननिनयनानंतरंयथाभागंव्याव।

त्वेधामिति विभागः। इदमग्नाविष्णोः इदं सरस्वत्याः सरस्वतः चर्वोः पेषणाद्याप्य लेपनिनयनांतस्याभावः अग्नाविष्णुभ्यां जुष्टम
धिवपामि। कपालोपधानंस्थाल्योरुपधान अग्नाविष्णुभ्यां जुष्टं ॑संवपामि। पिष्टतंडुलोत्पवनोसंयौम्यग्नाविष्णुभ्यां त्वापुरो
डाशाधिश्रयणंस्थाल्योरपामानयनंयथाभागंव्यावर्त्तेथां। इदं सरस्वत्याः इदं॑सरस्वतः सर्वेषांपर्यग्निकरणं संप्रेषसुम्मृत्त
करणाभिमंत्रणानि अभिधारणं तूष्णीं पुरोडाशस्य मंत्रेण चर्वोः यज्ञोसि अयंयज्ञः ममाग्नेचतुर्होता अग्नाविष्णू आवह।
सरस्वतीमावह सरस्वंतमावह। स्वाहाग्नाविष्णू स्वाहा सरस्वतिं स्वाहा सरस्वंत। अग्नाविष्णुभ्यामनुब्रूहि। अग्नाविष्णू महि त॥
द्धां। अग्नाविष्णू सजोषसे त्या स्वत्वायनीये। अग्नाविष्णू यज। अग्नाविष्णू महिधाम। अग्नाविष्णुभ्यामिदं न मम। अग्नावि
ष्णोरहं॰ वृत्रहा। सरस्वत्या अनुब्रूहि। प्रणोदेवी। सरस्वतिं यज। आनोदिवः। सरस्वत्या इदं॰ सरस्वत्या अहं॰ वाचमन्नाद्यं पुषे
यं। सरस्वति नुब्रूहि। पीपिवांसं। सरस्वंतं यज। यस्यव्रतं। सरस्वतोहं॰ अन्नादः। अग्नाविष्ण्वोः प्रियाधामान्ययाट् सरस्वत्याः
प्रियाधामान्ययाट् सरस्वतः प्रियाधामानि। चर्वोरिवचतुर्धाकरणं। अग्नाविष्णू इदं हविरजुषेतामवीवृधेत्यां महोज्यायोक्रा।
तां सरस्वतीदं हविरजुषतावीवृधत महोज्यायोकृत। सरस्वान्निदं हविरजुषतावीवृधत महोज्यायोकृत। अग्नाविष्णोरहमुज्जि
तिमनूज्जेषं। सरस्वत्या अहमुज्जिति। सरस्वतोहमुज्जितिमनूज्जेषं। सर्वमन्यद्यथापूर्वं। दर्शपूर्णमासयोर्नैमित्तिकं विधांतरं।

माह। पौर्णमासीमेव यजेत भ्रातृव्यवान्नमावास्यां व्यक्तं। किं तर्हि कृत्स्नमावास्यायां न किंचिदन्यत् पिंडपितृयज्ञादित्याह। पितृयज्ञमेवामावास्यायां कुरुते नन्वमावास्या निषेधाद्देव निवर्त्स्यते। प्रवर्तिष्यते च। पितृयज्ञो नंगत्वे किमर्थो यमारंभः। सत्यं। पौर्णमास्यायाएवामावास्यायामप्रिप्रवर्त्तिसंदेहनिरासार्थकः प्रसंगः। पौर्णमासीमेव यजेतेति ब्राह्मणार्थस्य विषयित्वात् तथा च वोधायनः। उभयत्र ज पौर्णमासं ह विर्यजेति। वोधायन इति। संक्रामे संक्रामे वज्रं भ्रातृव्याय प्रहरतीति विज्ञायते। संक्रामो तिक्रमः दर्शातिक्रमे तिक्रमे वज्रं शत्रवे प्रहरति स एवातिक्रमो वज्री भूत्वा तं हंतीत्यर्थः। व्यवराध्यममावास्याः संक्रामति। त्रयो वरो भागो यस्मिन् कर्मणि तव्यवराध्यं त्र्यवरां दर्शान तिक्रमत एव कामावाप्तिर्नावीगित्यर्थः। दर्शपूर्णमासयोर्गुणविकारमाह। अग्नीषोमीयानि प्रधानानि स्फुरमावास्यां पौर्णमास्यां च भ्रातृव्यवतो भिचरतो वा। यानि प्रधानानि दर्शपूर्णमासयोर्हवींषि तान्यग्नीषोमीयानि स्फुः अग्नीषोमदेवताकत्वेन गुणेन विकृतानि स्फुः तत्र धर्मेषु ये देवतानिगमास्तेषु तत्तद्देवतापनये नाग्नीषोमोपलक्षणं स्याद्दितियावत्। अग्नीषोमाभ्यां जुष्टं निर्वपामीत्यादि। देवतारिक्तस्तु धर्मो यो यस्य स तस्यैव यथा प्रथमस्याष्टाकपालत्वादि द्वितीयस्योपांशुत्वादिरिति तंत्रेणामावास्यायां प्रदानविभवात् तस्याप्रातर्दोहेन समादायेति लिंगाच्च। अनुमंत्रणे तंत्रेण। देवतानिर्देशः सुमुच्चयः। अग्नीषोमयोरहं देवयज्यया अन्नादो भूयासमिति मुख्ये साधर्म्यमिति संसृष्टह विष्णुमुख्ये धर्मदर्शना सूत्रकारे

एसमुच्चयावचनाच्चप्रथमैवासीरित्यन्येपृथक्प्रचारएवपौर्णमास्यांभिन्नधर्मेणोपांशुयाजेनव्यवायात्याज्यानुवाक्येअग्नीषोमीये
एवदेवतानुसारित्वात्तयोः अयंचगुणविकारोनानुनिर्वाप्यस्यतस्याप्राधान्यत्वात्प्रधानानीतिपौर्णमास्यांप्रधानानिअमावास्यायां।
प्रधानानीतिन्यायसूत्रप्रतिपादितप्रत्यभिज्ञानाच्च। अत्रप्रयोगः। अग्नीषोमाभ्यांदेवभागं। अग्नीषोमाभ्यांशरदोदुहानाः अग्नीषो
माभ्यांहविरिंद्रियं अग्नीषोमाभ्यांदेवेभ्यः अग्नीषोमाभ्यांदधि। अग्नीषोमाभ्यांजुष्टंनिर्वपामीत्यनुनिर्वाप्यातिरिक्तहविषां अग्नी
60 षोमौहव्यं रक्षेथां। अग्नेहव्यं रक्षस्वाग्नीषोमाभ्यामितिवा। अग्नीषोमाभ्यांवोजुष्टंप्रोक्षामि अग्नीषोमाभ्यांजुष्टमधिवपामि। अ
ग्नीषोमाभ्यांजुष्टंसंवपामि। संयौम्यग्नीषोमाभ्यांत्वा। इदमग्नीषोमयोरिदमिंद्रस्यवैमृधस्येत्यनुनिर्वाप्यत्वतः। इदमग्नीषोमयोरिद
मग्नीषोमयोरितीतरस्यपौर्णमास्यां अमावास्यायामसंनयतश्च अग्नीषोमाभ्यांजुष्टमभिघारयामि। अपतमग्नीषोमौभुवनानु
देतां। अग्नीषोमावावहेतिपौर्णमास्यांयावद्धविरावृत्तिः। तत्तद्वितीयमुपांशु। अमावास्यायांतुतंत्रेणएवंस्वाहाकारेपि। पृथक्प्रचा
रःपौर्णमास्यां अग्नीषोमाभ्यामनुब्रूहि। अग्नीषोमौयाजेतिसंप्रैषो अग्नीषोमीयएवयाज्यानुवाक्ये अग्नीषोमाभ्यामिदंनममेति याम
सर्वत्र। अग्नीषोमयोरहमन्नादइतिप्रथमस्यदब्धिरसीतिद्वितीयस्य अग्नीषोमयोरहंवृत्रहेतितृतीयस्य। अमावास्यांतुसमवदा ६०
नंतंत्रेणप्रचारःसंप्रैषयाज्यानुवाक्योदेशत्यागानुमंत्रणानितंत्रेण। अग्नीषोमयोरहमन्नादइंद्रियावीभूयासमितीद्वयाजिनः। अ

ग्नीषोमयोरहमन्नादो भूयासं जेमानं महिमानं गमेयमिति महेंद्रयाजिनः। अग्नीषोमयोरहमन्नाद इंद्रियाव्यन्नादो भूयासमित्यसं
न्नयतः। सर्वेषामग्नीषोमयोरहमन्नाद इत्येव वा। अथ पौर्णमास्यामग्नीषोमयोः प्रिया धामान्ययाडिति। अग्नीषोमाविरजु
षेतामवीवृधेतां महो ज्यायोक्रातामिति। अग्नीषोमयोरहमुज्जितिमनूज्जेषमिति च यावद्धविरवीवृधीति तत्र द्वितीयमुपांशु
अमावास्यायां तु तं त्रैणसर्वमन्वद्य यथापूर्वमिति। दर्शे तु गुणविकारमाह साकंप्रस्थायीयेन यजेत पशुकाम इत्यमावास्याविक्रि
यते। साकंप्रस्थायीयेन यजेत पशुकाम इति ब्राह्मणे साकंप्रस्थायीययोर्नामावास्या गुणविकारमात्रं न तु संज्ञपाकर्मांतरं न चो
भयो विकार इत्यर्थः। यत्राध्वर्युः साकं बहुभिः दोहैः प्रस्थाय यजति स साकंप्रस्थायीयः तत्र च गुणफलं पशवः। तेन प्रधानफ
लस्याविरोधः गुणस्य च समुदायविकाररूपत्वान्न तत्फलस्य कृत्वादावेव कामः। द्वौ सायंदोहावेवं प्रातः। यथोक्तेन दोहविधिना।
दोहयोर्द्वयोरभ्यासः कार्यः तत्तत्सर्वेष्वपि दोहधर्मेषु विभवतां तंत्रत्वमविभवतां चावृत्तीयथायथमनुसंधातव्यं। सायंसायंदोहा।
भ्यां चरंति प्रातः प्रातः दोहाभ्यां। सायंसायं पूर्वेद्युः रात्रौ सायंदोहाभ्यां चरंति प्रातरपरेद्युः यथाकालं प्रातदोहाभ्यामित्येकीयः प
क्षः तत्र प्रधानं व्यत्यासोपदेशात् ऐंद्रमुख्यता। ततः साधारणस्य रादुपकारकस्य प्राचीनतंत्रस्य प्रतिकर्षः पात्रप्रयोगादेशादु
पकारदिणोपि विभज्य कालद्वयप्रयोग इति केचित्। उभयत्रापि संभवतां तंत्रता असंभवतामावृत्तिः संभवति। पक्षांतरमाह। स

वैर्वाप्रातः पूर्वस्मिन्कृतिपयप्रतिकर्षेण नानाकालत्वात्प्रधानानां तंत्रस्य प्रतिकर्षोत्कर्षाभ्यामावृत्त्यादिबहुन्यायविप्रनिषेधाद्यमेवपक्षः
सूत्रकृतांगीकृतइतिविज्ञायते। तत्रैवप्रयोगविधानात्। पात्रसंसादनकाले चत्वार्यौदुंबराणि प्रयुनक्ति। चत्वारिहोमार्थानि पात्राणि
जुहूंसहैकीकृत्य प्रयुनक्ति प्रागुक्तन्यायात्। तावैतेषां जुहूवत्कल्पः। तेषां संमार्जनादिसंस्कारो जुहूवत्कार्यः। तत्र वाचं प्राणमिति मंत्रो
वाजिवत्सपत्नसाहमित्यूह्यते। गुणविकृतित्वात्। लिंगाविवक्षायां सामान्याभिधानान्येत्येके। आज्यभागाभ्यां प्रचर्याग्नेयेनच
पुरोडाशेनाग्नीध्रेस्कौप्रदायसहकुंभीभिरतिक्रामन्नाहेंद्रायानुब्रूह्याश्रावयेंद्रं यजेतिसंप्रैषौ। आश्रावणवचनवद्धिस्पष्टा
61 र्थमाज्यभागावचनं सायंदोहयोः सायंप्रचारपक्षार्थमितिकेचित् तदयुक्तं कुंभीभिरिति। बहुवचनविरोधात्। आग्नेयेनच पुरोडाशे
नेतिसमुच्चयवचनाच्च आग्नेयप्रचारानुवादस्तत्रैवं विशेषविवक्षया वेदितव्यः। यथाग्नेयेन प्रचर्यानंतरमग्नीध्रेस्कौदत्वा कुं
भीरादाय दक्षिणातिक्रामन्पुरोनुवाक्यां संप्रेष्यतीति इंद्रग्रहणं महेंद्रस्याप्युपलक्षणं प्रकृतदेवतानुवादत्वात्। यावत्यः कुंभ्यस्ता
वंतो ब्राह्मणाः दक्षिणत उपवीतिन उपोत्थाय कुंभीभ्यः पात्राणि पूरयित्वा तैरध्वर्युं जुहुतमनुजुह्वति। यावत्यः कुंभ्य इति विशेषणं राम
ब्राह्मणानां सहसाध्यं तंचर्त्विजो प्रोताः। अधिका अध्वर्युं जुह्वतमिति लिंगाच्च। दक्षिणत उपवीतिन इति यज्ञोपवीतिन इत्यर्थः। ६१
दक्षिणत उपवीय्योपविश्य अजिनं वासो वा दक्षिणत उपवीयेत्यादौ। अपवीतोपवीतिनो दक्षिणत उपोत्थायनत्वपरेण हवनीय

मतिक्रम्येत्यर्थः। उपवीतवचनमुत्तरीयनियमार्थमामूत्सूत्रविकल्पः। अपि वा सूत्रमेवोपवीतार्थमिति। कर्मार्थं वा द्वितीयमुपवीतं
विधीयते। तथा कर्मार्थयज्ञोपवीतविधिं प्रकृत्य बोधायनः अजिनं वासः सूत्रं वा द्वितीयं यस्य भवति तेन स उपह्वयत इति श्रौत।
प्राय श्चित्तार्थं उपवीतवचनमिति केचित् स्विष्टकृद्भक्षाश्च न विद्यन्ते। दोहानामिति शेषः तेन दोहाः सर्वहुता इत्यर्थः समानमन्तऊ
र्ध्वं संतिष्ठन्ते साकं प्रस्थायीयः। व्यक्तं। अत्र प्रयोगस्तावत्सूत्रकारमते सन्नयन्यजमानो दर्शेन साकं प्रस्थायीयेन यक्ष्य पशून्
वा प्रवानिति अमुकपशून्वा प्रवानीत्य नित्यपक्षे स्वर्गं पशून्वा प्रवानीत्येककामपक्षे। सर्वान्कामानुपशून्वा प्रवानीति युग
पत्कामे अमुकं पशूनवा प्रवानीत्याहारं पृथक्के विघ्नः दसी। स्यादि दोहयोः पृथग्वत्सोपाकरणसायंदोहे द्वे कुंभ्यौ द्वे अपिधाने
तं त्रेणेतराणि प्रोक्षणनिष्टपनोपवेषादानादि तंत्रेण। अंगारनिरूहणं कुंभ्यधिश्रयणपर्य्यूहणानि क्रमेण शाखापवित्रा
भ्याधानादि संक्षालननिनयनांतस्य द्वयोरावृत्तिः क्रमेणोद्वासने आतंचनद्रव्यविभागः सर्वाण्यातंचनान्येकैकस्यां आतंचन
क्रियैकत्वात् अमृन्मयमित्यावृत्तिः पृथग्वत्सापाकरणं एवं प्रातर्द्वौ दोहौ। पात्रप्रयोगे च समाकृतीनां पृथग्विकानां चतुर्णामुदुंबर।
दारुपात्राणां जुह्वा सह प्रयोगः। जुहूवत्संस्कारः वाजितासपत्नसाहवाजिनीत्येतिवा। यस्त आत्मेति दोहयोरावृत्तिरिदमिन्द्रियं
यत्पृथिवीमिति वा। आग्नेयप्रचारानंतरं त्रयो ब्राह्मणा आहवनीयदक्षिणत उपविशंति प्रस्त्या क्रम्याग्नीध्रे स्रुचौ प्रदाय वत्सः

कुंभीः पात्राणि चादायैंद्रायानुब्रूहि महेंद्रायानुब्रूहीति वा। संप्रेष्य दक्षिणातिक्रम्य तिस्रः कुंभीः त्रीणि पात्राणि ब्राह्मणेभ्यो ददाति
सर्वेषां दोहनानामशेषाणां पात्रेषु पूरणं आश्राव्य प्रत्याश्राविते इंद्रं यज महेंद्रं यजेति वा संप्रैषः। वषट्कृते ध्वर्युमुखेभ्यो होमः॥ न
दोहेभ्यः शेषकार्याणि सर्वमन्यद्यथापूर्वमिति। मतांतरे त्वयं विशेषः। सायंदोहपरिस्तरणानंतरं पाणिप्रक्षालनानंतरं जुह्वा
सह प्रयोगः। द्वे च कुंभ्यौ ब्रह्मवरणादि पात्रसंमर्शानंतरं यज्ञयोगः। प्रोक्षणीः संस्कारः ब्रह्मामंत्रणं तदनुज्ञातेन पात्रप्रोक्षण
63 प्रोक्षणीशेषनिधानानंतरं वेदिकरणादि उदुंबरपात्राणां जुहुवत्संमार्गः पत्नीसंनहनादि न प्रस्तरे पवित्रत्यागस्तस्य प्रज्ञा
तं निधायाद्भैर्वेघंतध्वनादि आज्याभिमंत्रणानंतरं दोहयोरासादनं पंचहोत्रा। यस्त्वष्टिवी मित्याहुतिः। अयं यज्ञोत माग्ने पं
चहोतावेदनिधानादि सोममावह इंद्रमावह महेंद्रमावहेति वा अग्निमावह इंद्रमावह महेंद्रमावहेति वा देवां आज्यपां आवह।
उद्गग्वेदेर्भूत्ये तृणानीत्यादि स्वाहा सोमं स्वाहेंद्रं स्वाहा महेंद्रमिति वा स्वाहाग्निं स्वाहेंद्रं महेंद्रमिति वा स्वाहा देवा आज्यपा इत्या राम
दि आज्यभागानंतरं यजमानेन पंचहोतर्युक्ते अग्नीधे स्तनौ प्रदाय। कुंभ्या उदुंबरपात्रे चादायैंद्रायेंद्रायानुब्रूहि महेंद्राया ६२
नुब्रूहीति। संप्रेष्य नु दक्षिणातिक्रम्यैकां कुंभीपात्रं च दक्षिणत उपविष्टाय ब्राह्मणाय प्रददाति अध्वर्युर्ब्राह्मणो पात्रयोर्दोहाव
शेषं पूरयित्वा तिष्ठतः आश्राव्य प्रत्याश्राविते इंद्रं यज महेंद्रं यजेति वा संप्रेष्य वषट्कृते हुते ब्राह्मणो नु जुहोति इंद्राय महेंद्रा

येतिवेदंनममेत्यादिनततः शेषकार्याणि आग्नीध्रस्रक्स्रुचावधोनिदधाति। अथप्रातरावश्यकानंतरंवानस्पत्येत्यग्निहोत्रह
वण्यादानादिहविरूपसादनानंतरंसम्मृकायामग्निहोत्रहवण्यामित्यादिहविः प्रोक्षणानंतरंदेवस्यत्वेतिकृष्णाजिनादानादि
कपालोपधानानंतरंअंगाराध्यूहनानंतरंवा। एताआचरंतीत्यादिपूर्ववद्दोहद्वयंसंक्षालननिनयनांतमदंत्यधिश्रयणा
दिआप्यलेपनिनयनानंतरंअंगारापोहणादिआसन्नहविरभिमर्शनानंतरंजुहूपभृतावादायेत्यादि आग्नेयप्रचारा
नंतरंप्रत्याक्रम्याग्नीधेस्रक्चौप्रदायकुंभ्याउदुंबरपात्रेचादायेंद्रायानुब्रूहिमहेंद्रायानुब्रूहितिवासप्रेष्यदक्षिणातिक्रम्यो
ए९६ कांकुंभीपात्रंचादक्षिणतउपविष्टायब्राह्मणायप्रददातिस्वयंब्राह्मणश्चपात्रयोर्दोहावशेषंपूरयित्वोत्तिष्ठतः आश्राव्यप्रत्या
श्रावितेंद्रंयजमहेंद्रंयजेतिवासंप्रेष्यवषट्कृतेहुतेब्राह्मणेनुजुहोतिइंद्रायमहेंद्रायवेदंनममेत्यादि। अयादसोमस्यप्रि
याधामान्ययाळिंद्रस्यप्रियाधामान्ययाण्महेंद्रस्यप्रियाधामान्ययाडदेवानामित्यादिसोमइंद्रंहविरजुषताविवृधतमहो
ज्यायोकृतइंद्रइंद्रंहविः०महेंद्रइंद्रंहविः देवाआज्यपाइत्यादिसोमस्याहमुज्जितिमनूज्जेषंइंद्रस्याहमुज्जितिंमहेंद्रस्याहमु
ज्जितिंअग्नेःस्विष्टकृतोहमित्यादि। सर्वमन्यद्यथापूर्वमिति। अस्मिन्पक्षेकेचित्यात्रप्रयोगसंमार्गदेवतावाहनादीनांके
षांचित्कालद्वयेयथायोगंपृथक्प्रयोगः। सामिधेन्याघारप्रायाजादीनांपूर्वेद्युरेवप्रयोगःप्रणीतादीनांपरेद्युरेवेत्याहुः॥अ

न्येतु पूर्वेद्युः रूलपराजिप्रस्तराज्यग्रहणाघारप्रवरस्रुक्गादानप्रयाजाज्यभागपार्वणहोमाः बर्हिःपरिधीर्दोहासादनसामिधेनी
दोहदेवतावाहनदोहप्रचारपशिधिप्रहारविक्षक्रमणाद्येव परेद्युः यथाप्रकृति सर्वमित्याहुः। अपरे तु केवलं स्याग्निहोत्रहवण्य
दुंबरपात्रप्रयोगः प्रोक्षणीसंमार्गदोहासादनयागा एव पूर्वेद्युः नेध्माबर्हिरादि परेद्युः सर्वं यथापूर्वमित्याहुरत्र सर्वत्र गुणदो
षौ विद्वद्भिर्विवेचनीयौ। गुणविकारान्तरमाह। दाक्षायणयज्ञेन सुवर्गकामः। यजेतेति शेषः। दाक्षायणेन दृष्टो यज्ञो दाक्षाय
63 णयज्ञः। कर्मधारय इति केचित्। तन्न। शोभनं तेदाक्षायणनाम्नो विशेषणस्याप्रसिद्धेर्यज्ञो दाक्षायणस्येति मानववचनात्सा
र्वसेनीयज्ञो वसिष्ठयज्ञः शौनकयज्ञ इत्यादिभिर्वैरूप्यायोगाच्च। अयमपि दर्शपूर्णमासयोरेव गुणविकारकर्मान्तरमित्येके
तथा चाह कात्यायनः। नामफलगुणयोगात्कर्मान्तरं गुणविधानं वा सन्निधिसंपद्भ्यचनाभ्यामिति द्वे पौर्णमास्यौ द्वे अमावा
स्ये यजेतव्या स्यात्तमिदमृद्धिकामप्रयोगसूत्रेण। आग्नेयोष्टाकपालोग्नीषोमीय एकादशकपालः पूर्वस्यां पौर्णमास्यामा राम
ग्नेयोष्टाकपाल ऐन्द्रं दध्युत्तरस्यामाग्नेयोष्टाकपाल ऐन्द्राग्न एकादशकपालः पूर्वस्याममावास्यायामाग्नेयोष्टाकपालो मै ई३
त्रावरुणपामिक्षा द्वितीयोत्तरस्यां अत्र पुनर्विधानादसोमयाजिनोपि ब्राह्मणस्याग्नीषोमीयः पुरोडाशो भवति संनयतोप्यैं
द्राग्नः सांनाय्यं च निद्रत्यैन्द्रं च न तस्वेर्वेषां। तथाश्रितं चोपांशुयाजस्थाने भवतः सर्वहविषां पुनरनुक्रमणात्। ऐन्द्रं पौर्णमास्यां

द्वितीयमितिस्थानादुपांशुयाजविकारइतिनशंकनीयंप्राकरणिकोपदिष्टसर्वधर्मत्वेनाविकृतात्वात्।विकृतित्वेपिस्कत्यादिभिरैं
द्रविकारत्वात्।द्वितीयमित्यादिविशेषानुपादानेनस्थानाभावाच्च।शृतदधियोगआमिक्षा।तस्मैप्रातर्दोहेसायंदोहमानयति।
यत्संवर्त्ततेसामिक्षेति।वक्ष्यमाणत्वात्साचेहद्वितीयेतिवचनात्सान्नाय्यविकारोनवैश्वदेव्याः।सान्नाय्यस्यैववास्यधर्मयुक्त
स्यस्वरूपदेवताविकारमात्रोपदेशः।अतोनामिक्षाधर्माःप्रसृमयादयःवाजसनेयिवचनात्तुवाजिनेज्याभवति।व्यावृत्का
मइत्यक्तं।व्यावृत्कामएतेनयज्ञेनयजेतेत्यादिब्राह्मणेयदुक्तंमांतादनुवाकस्यतदप्यनुसंधातव्यमित्यर्थः।व्यावृत्कामःस
मानेभ्यआत्मनोव्यावृत्तिमीप्सुः।क्षुरस्यविरसिधाराताजकृसद्यःपल्पूलनमम्लादिभिर्विनाहस्तादिभिर्मर्दनेनशोधनं।अम
त्वेवाजायामुपेयात्।यदुक्तंब्राह्मणेनस्त्रियमुपेयादितितत्रतुअमतावुपेयाद्वापत्नीमित्यर्थः।अत्रदर्शपूर्णमासव्रतवत्कर्म
कालान्येवव्रतावितानिव्रतानीत्युक्त्वापुनराहभरद्वाजःतेनमन्यामहेतरकालप्रैव्रतानियथाचातुर्मास्येष्विति।सोयंदर्शपू
र्णमासयोःप्रक्रमेविकल्पोनेनदर्शपूर्णमासाभ्यांवायजेतअयमपियज्ञोवैमृधवस्त्रक्रमएवदर्शपूर्णमासाभ्यांविकल्प
तेआदितएवप्रक्रम्यानेनयजेतताभ्यांवायतुप्रक्रांतस्यत्यागस्तप्राक्रांतस्यवाग्रहणंअनुनिर्वाप्यंचपूर्ववत्।तेनपंचद
शवर्षाणीष्ट्वाविरमेद्यजेतवा।पंचदशवर्षतावास्यदर्शपूर्णमासयोस्त्रिंशद्वर्षतयासंमितावेदितव्या।प्रयोगतोद्वेगुणपाद्यजे

64

तवायावजीवमितिशेषः। संतिष्ठते दक्षायणयज्ञः। व्यक्तं। अत्रानो मित्रावरुणा प्रवाहवेतिमैत्रावरुण्यायाज्यानुवाक्ये। यद्वंहिष्ठेति

वायाज्या संस्रावानंतरं वाजिनपात्रउपस्तीर्य तर्वेद्विर्हिरविषिंचन्स कृत्सर्वं गृह्णातिनाभिघारयतिवाजिभ्योनुब्रूहिवाजिनायजे।

तिसंप्रैषौ शंनाभवंतुवाजेवाजेतियाज्यानुवाक्ये ऊर्द्ध्वं जुरनवानं होतायजतिवाजिनस्याग्नेवीहीतिअनुवषट्कारशेषेणदिशःस्वा

हेत्यादिपस्युवद्धुलांतर्वेदिशेषंहोत्रे प्रयच्छतिहोतेडावत्प्रतिगृह्णातिसर्वेसमुपहूयभर्यंतिवाजिनांभक्षइति। यन्मेरेतइतिहोता

विश्वेदेवागायत्री। आनोमित्रावरुणा घृतैर्गव्यूतिमुक्षतं। मध्वारजांसिसुक्रतू। हेमित्रावरुणौ गव्यूतिं अस्मदीयं गोयूथं घृतैः

प्रभूतासमंतादुक्षतं सिंचतं हेसुक्रतू शोभनक्रतुयुक्तौ रजांसि अस्मदीयक्षुद्रक्षेत्रगतान्यांस नू मध्वा मधुनाजलेनोक्षतं॥ त्रि

ष्टुप्। प्रवाहवासिसृतंजीवसेन आनोगव्यूतिमुक्षतं घृतेन। आनोजनेश्रवयतं युवानाश्रुतंमेमित्रावरुणाहवेमा। हेमित्रावरुणौ

नोस्मान्जीवसेजीवयितुंवाहवाधनपूर्णेन बाहुनासहप्रकर्षेणसिसृतं प्राप्नुतं आगत्य चनोस्माकं गोयूथं घृतेनसिंचतं। हेयुवा। राम

नापरस्परंस्कृतोयुवांजनेब्राह्मणादियजमानसहायानोस्मान्श्रवयतं प्रख्यापयतंहेमित्रावरुणौ मेमदीयामिमामाह्वहएत्त ६४

द्राह्वानंश्रुणुतं। श्रुतमितित्रिष्टुप्। यद्वंहिष्ठंनातिविदेसुदानूअच्छिद्रं शर्मभुवनस्यगोपा। तेननोमित्रावरुणावविष्टं सिषासंतोजि

गीवांसःस्याम। भुवनगोपालोकस्यरक्षकौ सुदानूशोभनस्यफलस्यदातारौ। हेमित्रावरुणौयद्यस्मात्कारणाद्वंहिष्ठंप्रस्त्यंतवहु

लं अछिद्रं विनाशरहितं शर्मसुखं नातिविधेः भवदनुग्रहं विना प्रकारांतरेण स्मान्निनीत्यं तं लब्धं तेन कारणेन हे मित्रावरुणौ नोस्मान विष्ठंर
क्षितवंतौ सिषासंतो भवद्दत्तं फलं लब्धुमिछंतो वयं जिगीवांसः यो जित्तवंतः प्राप्तवंतः स्याम। वसिष्ठु पू शंनो भवंतु वाजिनो हवेषु देवता
तामितद्रवः स्वर्क्काः। जंभयंतो हिंवृकं रक्षांसि सनेम्यस्मद्युक पवन्नेमीवाः। मितं द्रवं तिगछंती त्ति मितद्रवः स्वर्क्का शीघ्रधावनेन सुष्ठुर्चनी
याः वाजिनो देवा देवतायज्ञेहवेषु आह्वानेषु नोस्माकं शं सुखकरा भवंतु। अहिंवृके रक्षासि सर्पवदरण्यवश्व वत्तू वाधकान्नाक्षसा
नूजंभयंतो जयं भंतः वर्णव्यत्ययः सनेमि क्षिप्रमेव अमीवा अरोगान स्मद्युक यवनू अस्मत्तो वाजीवयो जिवैंतवंतः। वाजेवाजेव
तवाजिनो नोधनेषु विप्रा अमृता ऋतज्ञाः। अस्यमध्वः पिवत वाजयध्वं तृप्ता यात पथिभिर्देवयानैः। हेवाजिनो देवाः वाजेवाजेत
तरं ननिमित्तं धननिमित्तं च नीस्मानवत विप्राः ब्राह्मणवत्स्मानेन स्तुद्धाः अमृताः मरणरहिताः ऋतज्ञाः सत्यज्ञाः हे देवा अ
स्य मध्वः पिवत इदं मधु समानं वाजिनं पिवत पीत्वा मादयध्वं हृष्टा भवतत तृप्ताः संतो देवयानैः पथिभिः यात प्रतियाता। वामदे
वः यजुषी वाजिभ्यो नुब्रूहि वाजिनो यजे ति निगदव्याख्याते। सोमः दिशः स्वाहा। प्रतिदिशः आदिशः विदिशः उद्दिशः स्वाहा दिग्भ्यः
नमो दिग्भ्यः। दिशः प्राच्यै दिशे स्वाहुतमस्तु प्रदिशो दक्षिणायै आदिशः प्रतीच्यै विदिशः उदीच्यै उद्दिशः दिग्भ्यः सर्वाभ्यः नमो दि
ग्भ्यः स्पष्टं वामदेवः। अध्वर्य उपह्वयस्व। हे अध्वर्यो अनुजानीही एवं ब्रह्मानुपह्वयस्वेत्यादि उपहूतः। मयानुज्ञातस्त्वं भक्षयेत्यर्थः।

वाजिनामिति त्रिष्टुप्। तस्य तइति यजुः। वानां भक्षा वतु वाजो अस्मान्नेतः शिक्तममृतं बलायु। सन इंद्रियं द्रविणं दधातु मा रिषाम वाजिनं भक्षय
तः। तस्य ते वाजिभिर्भक्षं कृतस्य वाजिभिसुतस्य वाजिपीतस्य वाजिनस्योपहूतस्योपहूतो भक्षयामि वाजिनां देवानां भक्षोयं वाजिनरूपो
वाजोन्नमस्यानूरक्षतु तद्रक्षणेनास्माभिः सिक्तरेतः अमृतमक्षीणसद्बलायोस्यादनसामर्थ्यायास्त्क स वाजो नोस्माकमिंद्रियं द्रविणं
65 च दधातु पुष्णातु तद्वाजिनं भक्षयंतो वयमा रिषाम क्षीणामाभूम। हे वाजिन वाजिभिः कृतस्य वाजिभिरभिषुतस्य वाजिभिः पितस्यन्न
लिग्भिरुपहूतस्य नादृशस्य तेन तव वाजिनस्य भक्षं भक्ष्यं भागं उपहूतो नुज्ञातोहं भक्षयामि यन्मे रेत इति पङ्क्तिः स्तस्य तइति यजुः। य
न्मे रेतः प्रसिच्यते यद्वा मे अपिगच्छति यद्वा जायते पुनः। तेन मा शिवमाविशामतेन मा वाजिनं कुरु। तस्य ते वाजि० पीतस्योपहूतस्योप
हूतो भक्षयामि मे मम यद्रेतः। अपत्यार्थं सिंचते मे यद्वरेतो गर्भाशयं गच्छति यच्च पुनः पुत्ररूपेण जायते हे वाजिन स्तेन पुत्ररूपेण शि
वं कल्याणवं तं मामाविशतेन सह मां वाजिनमन्नवंतं कुरु। तस्य त इत्यादि पूर्ववत्। अत्र प्रयोगः। पौर्णमास्यां दर्शे च सोमयाजिनो सन्न
यत्संनयतश्च दाक्षायणयज्ञेन यक्ष्येसर्गस्तोकमवाप्रवानिश्यावृत मवाप्रवानीति वा चतुर्दश्यामन्वाधाय पर्वणि प्रथमेष्टिः पुनः राम
पर्वण्यन्वाधाय प्रतिपदि द्वितीयेष्टिरिति अथवा पर्वण्यन्वाधाय पर्वणि प्रथमेष्टिः पुनः प्रतिपद्यन्वाधाय द्वितीयायां द्वितीयेष्टिरि ६५
ति दाक्षायणीयं हविः उपांसुयाजार्जं सोमयाजी पौर्णमास पौर्णमासनस्थमा पौर्णमासीत्यादिब्राह्मणतर्पणांतां। द्वितीयायां विद्धक

दादिपौर्णमासपौर्णमासंतंत्रंवत्सापाकरणादिदर्शवत्प्रातर्दोहमहेंद्रयाजिनोपिनिगमेषुइंद्रएवयवाग्वाग्निहोत्रादिअग्निरिंद्रस्यप्रधा
नदेवतेसर्वमन्यद्यथापूर्वंब्राह्मणतर्पणांतमितिअसंशयतएवंविद्धदादिब्राह्मणतर्पणांतासर्वेषांप्रथमामावास्याऐंद्राग्नएकादश
कपालएवेतितुविशेषः द्वितीयायांतुविद्धदादिमित्रावरुणाभ्यांदेवभागंमित्रावरुणाभ्यांशरदंमित्रावरुणाभ्यांहविः कुर्वेवंतइतिवा
मित्रावरुणयोरमतांगावः मित्रावरुणाभ्यांऽमृतंदधिमित्रावरुणाभ्यांऽहविरिंद्रियंमित्रावरुणाभ्यांदेवेभ्यः मित्रावरुणाभ्यांदधिपाला
श्पस्यचमसाकृतेः जुह्वाकृतेर्वावाजिनपात्रस्यसान्नायपात्रैः प्रयोगः पुरोडाशमधिश्रित्यतेप्रातर्दोहेसायंदोहमानयतिउद्वास्यामिक्षां
संहत्यसायंहपात्रेनिधायपूर्ववदासादयतितूष्णिः मुत्करेवाजिनंइदमिंद्रियममृतंवीर्यमनेनैंद्रायपशवोचिकित्सनूतयादेवाइवात्मा
मिक्षामैश्रयतां। याष्टथिवीमचरत्साप्रविष्टाययासिंचत्तुद्रयसाम्भुक्तामधुवाजिनीवतीययोपरिष्टादितिवाआमिक्षामांघिनोतु।
अग्निमावहमित्रावरुणावावह। स्वाहाग्निंस्वाहामित्रावरुणौमित्रावरुणाहभ्यांमनुब्रूहि। आनोमित्रावरुणा। मित्रावरुणौयजायद्व
हिष्ठमित्याश्वलायने। प्रवाहवासितीनरास्मिनूमित्रावरुणाभ्यामिदं॰ मित्रावरुणयोरहमिंद्रियावीभूयासमित्यसन्नयदिंद्रयाजि
नोजेमानंमहिमानंगमेयंमितिमहेंद्रयाजिनः। अयाउग्नेप्रियाधामान्ययाट्मित्रावरुणयोः प्रियाधामानि। अग्निरिदंहविरजुषता
वीवृधतमहोज्यायोकृतमित्रावरुणाविदंहविरजुषेतांमवीवृधेतांमहोज्यायोक्रातांअग्नेदहमुज्जितिंमित्रावरुणयोरहं। संस्त्रावानंत

रंवाजिनपात्रउपस्तीर्यांतर्वेदिवर्हिरनुविषिंचन्वाजिनंसकृत्सर्वंनिगृह्णाति।नाभिघारयतिवाजिभ्योनुब्रूहीतिसंप्रेष्यहोत्राशान्नो
भवंत्वित्युच्यमानेदक्षिणातिक्रम्याश्राव्यप्रत्याश्राविते वाजिनोयजेतिसंप्रेष्यहोत्रायेयजामहेवाजिनइत्युक्तोर्द्ध्वबाहुनाननानं।
वाजेवाजइतिवषट्कृतेकिंचिज्जुहोति।वाजिभ्यइदंनमम।आमिक्षावदनुमंत्रणंवाजिनस्याग्नेविहीवौषडितिहोत्रोपविश्यानु
वषट्कृतेशेषंकिंचिज्जुहोति।अग्नयेस्विष्टकृतइदं० अग्नेस्विष्टकृतोहमित्यनुमंत्रणं।अथाध्वर्युःशेषंदिशःस्वाहेत्यादिभि
श्चतुर्भिःप्रागादिप्रतिदिशंउद्दिशइतिमध्येस्वाहादिग्भ्यइति।प्रांचंहुत्वानमोदिग्भ्यइत्युपस्थायांतर्वेदिशेषंहोत्रेप्रयच्छतिहोत्रे
डावत्।प्रतिगृह्याध्वर्यउपह्वयस्वब्रह्मन्नुपह्वयस्वाग्नीदुपह्वयस्वयजमानोपह्वयस्वइतरेचोपहूतइतिब्रूयुः।एवमध्वर्युब्रह्माग्नी
ग्नीद्यजमानाःस्वेतरानूहोत्रादीनुपह्वयंते।इतरेचोपहूतइति।अथसर्वेहस्तेप्यानीयन्मेरेतइत्याश्वलायनश्रुतेहोताप्राणभ
क्षंवाजिनंभक्षइतीतरेसर्वेहोतृप्रथमायजमानोत्तमायजमानप्रथमायजमानोत्तमावाभक्षयंतिहविःशेषभक्षादिसर्वम॰ राम
न्यद्यथापूर्वंसन्नयदमावास्यावत्।उक्तस्यगुणविकारस्यसंज्ञांतएवाह।एतेनैडादधस्सार्वसेनियज्ञोवसिष्ठयज्ञःशौनकय॰ ६६
ज्ञश्चव्याख्याताः।इडादधेनदृष्टइडादधः एवमुत्तरेष्वपिगंतव्याः।तेचदाक्षायणयज्ञेनव्याख्याताः।तत्समानप्रयोगास्तत्समा
नफलाश्चेत्यर्थः।नामधेयप्रयोजनंतुऐडादधीयहविरिदमेषांमयीत्यादिद्रष्टव्यंप्रयोगस्त्वृक्तएव।इतिशौनकयज्ञांतंतंत्रव्याख्या

सुगंधिभिः। सूक्तिप्रसूनैः पुष्पातु पुमर्थान्पुरुषोत्तमः। इत्यापस्तंबीयाध्वरमंत्रव्याख्यायां प्रयोगरत्नमालायां तृतीये प्रश्ने पंचमः
पटलः॥ ॥ कर्म ब्रह्माध्वनीनस्य मंत्रि भूपति भूपतेः। व्याचष्टे चौंडपाचार्यो ब्रह्मा तंत्र मथेष्टिकं॥ ॥ दर्शपौर्णमासिकमिदानीं ब्र
ह्मत्वमुपदिश्यते। ब्रह्मिष्ठो ब्रह्मा दर्शपूर्णमासयोः। यो ब्रह्मिष्ठो ब्रह्मगुणैः प्रकृष्टः स ब्रह्मा भवति। तं वृणीते भूपत॰ वृणीमह इति य
जमान इति शेषः। तथा याजमानेन वादात् ब्रह्मवरणमध्वर्युयजमानाभ्यां कर्तव्यं। उभयत्र समाम्नानादित्येके। अत्र त्रयमंत्रा
र्थीः प्रागेवोक्ताः। वृतो जपति। यद्वेवं वृतः तदोत्तरं मंत्रं जपतीत्यर्थः। वृतो जपतीति वचनात् यत्र प्रायणीयादौ वरणाभावस्तत्र
जपाभावः। अहं भूपतिः यज्ञं गोपायेत्युक्त्वा परेणाहवनीयं दक्षिणातिक्रम्य निरस्तः॰ पाप्मनेति ब्रह्मसदनात् तृणं निरस्येदमहं
तस्ट धिष्ण्यादित्युपविशति उत्तरतो वेदेस्तिष्ठन्नेवं जपमुक्त्वा ततो दक्षिणातिक्रम्योपविशति। आहवनीयमभ्यावृत्यास्त उपवि।
शन्नावृत्याहवनीयाभिमुख आस्ते प्राङ्मुख उपविश्य तत आवृत्यास्त इति वोचितु कर्मणि कर्मणि वाचंयच्छति। कर्म कर्मणि स
र्वेष्वेव कर्मसु मंत्रवत्सु वा कर्मसु यावत्कामी तूष्णीकेषु। अथवा मंत्रवत्स्वेव तिर्ग्यजमानकर्मसु वाग्यमनियमस्तूष्णीकेषु
तुपात्रप्रक्षालनादिष्व नियम इत्यर्थः। यदि प्रमत्तो व्याहरेद्वैष्णवीमृचं व्याहृतीश्च जपित्वा वाचंयच्छेत्। प्रमादे प्रायश्चित्तमेतत्।
वैष्णवीमृचं मिदं विष्णुरिति व्याहृतीस्तिस्रो ब्रह्मनपः प्रणेष्यत्युच्यमाने प्रणय यज्ञं ॐ प्रणयेति प्रसौतीत्युच्यमान इति वर्तमा

नसामीत्येनामंत्रणानंतर्यं विवक्ष्यते। नवर्त्तमानकाल आमंत्रणमध्येनुज्ञानुपपत्तेः प्रसौति अनुजानातियाजुर्वेदिकत्वादुपांशु
जपमुक्तोच्चैः प्रसवाः सच प्रणवादिः यज्ञेषु चतद्दादयः प्रसवाइतिवचनात् ॐमिति ब्रह्मा प्रसौतीति तिङ्क्ते श्रुः। सर्वेष्वामंत्रणेष्वे
वंप्रसवस्तेन तेन कर्मणा यस्मिन्नामंत्रयते। यत्र यत्र कर्मण्येनयेनमध्वर्युरामंत्रयते। ब्रह्मन्प्रोक्षिष्यामीत्यादिभिर्निगदैः तत्र
तत्रामंत्रितेनैवतेनैव तेन तेनामंत्रणद्विषयेण प्रोक्षणादिना कर्मणा विशिष्टः प्रसवः कार्यः। यथा ओं प्रोक्ष। ओंपरिगृहा
67 णेत्यादिभिः प्रोक्षयज्ञमितिह विषइध्मावर्हिषश्चप्रोक्ष्य। बृहस्पते० पृथिवीदेव्यस्तक इत्यन्तरस्मिन् परिग्राह प्रजापतेरनुब्रूहि
यज्ञमिति सामिधेनीरनुवक्ष्यं वाचस्पते मनुष्येष्विति प्रवरे। एतेषु कर्मस्वामंत्रितएतान्मंत्रानुजपित्वा प्रसौति सामिधेनी
रनुवक्ष्यन्तमिति मितिहोतारमिति शेषः। सयत्र ब्रूयात् ब्रह्मन्सामिधेनीरनुवक्ष्यामीति तदा प्रजापतेरनुब्रूहीतिप्रसौति
देवतावर्द्धयत्वमिति सर्वत्रानुषजति। व्यक्तं। मित्रस्यत्वा चक्षुषा प्रेक्षइति प्राशित्रमवदीयमानं प्रेक्षते। प्रेरक्षणेसकृदेवमंत्रोहविर्गणेपि
अकरणत्वाद्व्यवायाच्च। प्रतिद्रव्यमवदानभेदेन कालभेदाद्दावृत्तिरिति केचित्। अतस्य पथा पर्येहीति परिह्रियमाणं परिह्रियमा राम
णमग्रेण हवनीयं ह्रीयमाणं प्रतीक्षत इत्यनुषंगः। सूर्यस्यत्वा चक्षुषा प्रतिपश्यामीत्याह्रीयमाणं पूर्ववदनुषंगः। आह्रियमाणमास ६०
न्नं ह्रीयमाणं। सावित्रेण प्रतिगृह्य पृथिव्याः पदइत्यंतर्वेदिभूम्यां तृणानि प्रागग्रं उंसादयित्वा अदब्धेनत्वा चक्षुषावेक्षइत्यवेक्ष्य सा

वित्रेणांगुष्ठेनोपमध्यमया चांगुल्यादाया ग्नेस्त्वास्येन प्राश्नामि० सादयामीत्यसंस्कृत्यापि गिरति। सा वित्रं प्रतिगृह्णामीत्यंतः प्रतिग्र
हदेवब्राह्मणेपाठात् आदानेत्वाद दद्वित्यंतः तत्यादर्शिनत्वात्। उपमध्यमानामिकाग्रसंस्कृत्य प्राशित्रं दंतै रनभिमृश्य अपि गिरति।
या अस्त्वंतः स्वाहेत्यद्भिरभ्यवनीयाचम्य घसीना सादयामीतिनाभिदेशमभिमृशति उच्छिष्ट एवाह्रियप्राशित्रमभ्यवनीयांतर्नी
त्वातत आचामतिवाङ्म आसनितियथालिंगमंगानि तत्तल्लिंगेन मंत्रेण न तदंगमभिमृशति अरिष्टा विश्वानीत्यत्र शिष्टानि
विश्वशब्दोत्र सामर्थ्यादवशिष्टविश्वांगाभिधायीतिभावं प्राक्षाल्यपात्रं पूरयित्वा दिशो जिन्वेति पराचीनं निनयति पराचीनमनि
वर्त्तयन्नेकप्रयत्नेन निनयति मां जिन्वेत्यस्य आत्मं पुनरपो गृहीत्वाभ्यात्ममात्मन उपरि निनयति शेषमित्यवचनात् अपर पूरयति
शारवांतरवचनाच्चयत्रास्मै ब्रह्मभागमाहरति तं प्रतिगृह्य नासंस्थिते भक्षयति नासंस्थितेन कपाल विमोचनात् पूर्वमित्यर्थः। तं
त्रसंस्थावचनात्संडसंस्थास्वप्यध्वर्युरेव संस्थित इत्यर्थः। ब्रह्मन्त्राति शिवो भवेत्यंत वैद्यन्वाहार्यमासन्नमभिमृशति विकृतिषु
दक्षिणानेकत्वे ब्राह्मणो ब्राह्मस्येत्यादि यथार्थमूहो द्रष्टव्यः ब्रह्मन् प्रस्थास्यामि इत्युच्यमाने ओं प्रतिष्ठेति प्रसौति ब्रह्मणय
जमानेन वाभिमृष्टे अन्वाहार्ये अध्वर्युः प्रैषः न नु सर्वेषां मंत्रे एवं प्रसप्रसव इत्येनेनैव सिद्धः प्रसवस्येह पुनर्वचनं ततोपकृष्येह
पूर्वजपविधानं च किमर्थं। ब्रह्मन् प्रस्थास्यामि इति बहुवचनेनामंत्रयतः प्रतिष्ठेत्येकवचनेन प्रसवः पूर्वजपस्यादेवतावद्धृयत्वमित्य

नुषंगलोपश्चयथास्यातामित्येवमर्थं अन्यथा हि विपरीतः प्रयोगो भवेत् प्रतिष्ठित्येकवचनं त्वनुज्ञा तेन ब्रह्मणा ग्नीध्र इत्यत्रैव व्याख्या।
तं भूमिर्भूमिं सं भिद्यतामिति यत्किंच यज्ञे मृन्मयं भिद्येत तदभिमंत्रयेत अनेनाभिमंत्रितमनेनैवापोभ्यवहरेदध्वर्युरयमेको मंत्र
68 पूर्वमव्याख्यातादत्र व्याख्या क्रियते वामदेवोनुष्टुप् भूमिर्भूमिमगान्माता मातरमप्यगात् भूयास्म पुत्रैः पशुभिर्योनो द्वेष्टि स भि-
द्यतां इयं मृत्यात्ररूपा भूमिर्भूमिं स्वोपादानरूपामगात् अपि च द्यौः पिता पृथिवी मातेति मंत्रवर्णात्मतां मातरमेवागादतो वयं
पुत्रैश्च पशुभिश्च भूयास्म समृद्धाः स्यामः। अनेन पात्रभेदेन योस्मान्द्वेष्टि स एव भिद्यतां ब्रह्मभागं प्राश्यपायाउग्निवाजवस्ये
त्याहवनीयमुपस्थाय यथेतं प्रतिनिष्क्रामति कपालविमोचनांते दिवो भागोसीति ब्रह्मभागं प्राश्य चम्याया उग्निरित्यृचा प्र-
णीयक्षीति यजुषा चोपस्थाय येन मार्गेण प्रविष्टः तेन प्रतिनिष्क्रामति। एवं विहितमिष्टिपशुबंधानां ब्रह्मत्वं ब्रह्मत्वं। यदेवं विहि
तं दर्शपूर्णमासयोर्ब्रह्मत्वं इदमेव सर्वेष्टीनां पशुबंधानां च ब्रह्मत्वं विशेषस्तु तत्र तत्र वक्ष्यंते। अतोन्यत्र सर्व्याहृतीनो ब्रह्मयजमाना राम
विति यदुक्तं तदकरणे प्यदोष इत्यर्थः। प्रयोगस्तूक्त एव॥ इति ब्रह्मत्वांततंत्रमत्र व्याख्यासुगंधिभिः॥ सूक्तिप्रसूनैः पुष्णातु पुमर्था ६८
न्पुरुषोत्तमः॥ प्राशित्रादि ब्रह्मत्वांतपदार्थोक्ति समुच्चलः॥ तृतीयो व्याकृतः प्रश्नोनुनिर्वापादिसत्क्रियः॥ इत्यापस्तंबीयाध्वरतंत्र
व्याख्यायां प्रयोगरत्नमालायां तृतीये प्रश्ने षष्ठः पटलः॥ ॥समाप्तश्च तृतीयः प्रश्नः॥ ॥रामः॥ ॥ ॥श्रीराम॥